Remarks:—The Ms. is in good condition. There is also a loose sheet dealing with the musical instruments used in Sāmagāna.

॥ आश्वलायनसर्वपृष्ठाप्तोर्यामसप्तहौत्रप्रयोगः ॥

2550. ĀŚVALĀYANASARVAPṚṢṬHĀPTORYĀMASAPTAHAUTRAPRAYOGAḤ.

Burnell's Catalogue No. 4145. Page 25. Left column.
Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{3}{4}$ inches. Sheets—45.

Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—875. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ।

हरिः ॐ । अथ सर्वस्तोमसर्वपृष्ठाप्तोर्यामस्य सप्तहौत्रप्रयोग उच्यते ।

वरणादिसवनीयवपायागान्तं कृत्वा । आग्नेयोऽग्निष्टोम ऐन्द्राग्न उक्थ्ये द्वितीय ऐन्द्रो वृष्णिः षोळशिनि तृतीयः सारस्वती मेष्यतिरात्रे चतुर्थीति क्रतुपशवः । मार्जनादि तस्य प्रागाज्यशस्त्रादतिरात्रवत् । आज्यशस्त्रे सो अध्वराकरति जातवेदो ३ मित्यन्तं प्रकृतिवत्कृत्वा "अग्निं नरो दीधितिभिररण्योः" इति सूक्तं पञ्चविंशतिऋचं अर्धर्चशः शंसेत् ॥

End:

अथ होता षोडशिनं विहृतमविहृतं वा छन्दोगानुसारेण । ततः पर्यायाद्यश्विनान्तमतिरात्रवत् । अप्तोर्यामपक्षे अश्विनोर्ध्वं अतिरिक्तोक्थ्यसंज्ञकानि चत्वारि शस्त्राणि भवन्ति । तेषां पदाभ्यासवर्जं पर्यायवच्छंसनविधिः । ततोऽनूयाजाद्युदवसानीयान्तमग्निष्टोमवत् ॥

Colophon: Nil.

Subject: Sarvapṛṣṭhāptoryāmasaptahautraprayoga, giving the following seven important Śastras in the Sarvapṛṣṭhāptoryāma sacrifice:—

(1) आज्यशस्त्रम् (4) निष्केवल्यशस्त्रम्

(2) प्रउगशस्त्रम् (5) मैत्रावरुणशस्त्रम्

(3) अच्छावाकशस्त्रम् (6) ब्राह्मणाच्छंसिशस्त्रम् ॥

(7) आग्निमारुतशस्त्रम्

Remarks :—The Ms. is in good condition.

॥ आश्वलायनसर्वपृष्ठाप्तोर्यामसप्तहौत्रप्रयोगः ॥

2551. ĀŚVALĀYANASARVAPṚṢṬHĀPTORYĀMA-SAPTAHAUTRAPRAYOGAḤ.

Burnell's Catalogue No. 4146. Page 25 Left column. Substance—Paper. Size—$10 \times 4\frac{7}{8}$ inches. Sheets—45. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—875. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2550.

Remarks :—The Ms. is in good condition.

॥ आश्वलायनसर्वपृष्ठाप्तोर्यामसप्तहौत्रप्रयोगः ॥

2552. ĀŚVALĀYANASARVAPṚṢṬHĀPTORYĀMA-SAPTAHAUTRAPRAYOGAḤ.

Burnell's Catalogue No. 4147. Page 25. Left column. Substance—Paper. Size—$10\frac{3}{4} \times 4\frac{3}{4}$ inches. Sheets—39. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—875. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2550.

Remarks :—The Ms. is in good condition.

॥ आश्वलायनसर्वपृष्ठाप्तोर्यामसप्तहौत्रप्रयोगः ॥

2553. ĀŚVALĀYANASARVAPṚṢṬHĀPTORYĀMA-SAPTAHAUTRAPRAYOGAḤ.

Burnell's Catalogue No. 4148. Page 25. Left column. Substance—Paper. Size—10 × 4¾ inches. Sheets—25. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—?. Incomplete.

Beginning and subject—Same as No. 2550.

End:

इरज्यन्त यच्छुरधो विवाचोम् ३ । न हि श्वमायुश्चिकिते जनेषु । तानीदं हांस्यति पर्षसोम् ३ । युजेरथं गवेषणं हरिभ्यां उपब्रह्माणि जुजुषाणमस्थोम् ३ । विवाधिष्टस्य रोदसी महित्वा । इन्द्रो वृत्राण्यप्रती च धन्वोम् ३ । आप श्चित्पिप्यु............ ॥

Colophon : Nil.

Remarks :—The Ms. is in good condition. It breaks off in the middle.

॥ सर्वपृष्ठाप्तोर्यामौद्गात्रप्रयोगः ॥

2554. SARVAPṚṢṬHĀPTORYĀMAUDGĀTRA-PRAYOGAḤ.

Burnell's Catalogue No. 4188b. Page 25. Left column. Substance—Paper. Size—11⅓ × 3⅞ inches. Sheets—13

(9-21). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—960 Author—(?). Complete.

Beginning:

नमो रामाय सीतायै लक्ष्मणाय हनूमते ।
द्राह्यायणमुखेभ्यश्च कर्तृभ्यः सूत्रसंहतेः ॥
आलोच्य ब्राह्मणं सूत्रं तद्भाष्यं चासकृत्तथा ।
अप्तोर्यामक्रतोः क्लृप्तिः क्रियते सामगप्रिया ॥

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविंशं होतुः पृष्ठं छन्दो मा इतराणि त्रिणव आर्भवस्त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहिण्युक्थ्यानि त्रिणवम्प्रथममथैकविंशमथ सप्तदशमेकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिस्त्रिवृत्प्रथममतिरिक्तस्तोत्रमथ पञ्चदशमथ सप्तदशमथैकविंशं प्रजापतिः पशूनसृजत ।

End:

तद्धौ हो वा । इति स्तावः । शं यत् । हा । औ हो इ गा वा इ । इति प्रतिहारः । ए । किरे । इति सर्वे । एवमुत्तरयोः । यजमानवाचनादिभक्षणान्तं कृत्वा । पूर्ववन्निष्क्रम्य समस्तोपस्थानादि यजमानोपहवान्तं कृत्वा । वारवन्तीयस्य साम्नः इन्द्र ऋषिः । गायत्री छन्दः । विष्णुर्देवता । विधायकादि पूर्ववत् । अग्नेरुद्गीथ इत्यादि । सम्भ्यो हिङ्करोतीत्यादिकुशाविधिः । इदं विष्णा । औ हो हा इ । इति प्रस्तावः । सामूढम् । आ इति प्रतिहारः । डा इति सर्वे । एवमुत्तरयोः । यजमानवाचनादि-

भक्षणान्तं कृत्वा स्तोमविमोचनाद्युदवसानीयान्तं ज्योतिष्टोमवत् हार्योजनभक्षणे तिरोह्नस्थेति विशेषः ।

Colophon :

इति क्रत्वन्तरसर्वस्तोमसर्वपृष्ठाप्तोर्यामः समाप्तः ।

Subject: Āptoryāmasarvapṛṣṭhaudgātraprayoga, giving the duties of the Udgātṛ priest in the Aptoryāma sacrifice.

Remarks :— The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 2545.

॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

2555. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

J. L. Collection No. 250. Substance—Paper. Size—9¼ × 4 inches. Sheets—57. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4387. Author—(?). Complete.

Beginning:

अग्निश्चेष्यमाणोऽमावास्यायां पौर्णमास्यामेकाष्टकायां वोखाꣳसम्भरति । त्र्यहादिदीक्षापक्षे उखासम्भरणप्रभृत्याभिक्षापर्यन्तं कर्माणि । वसन्ते यथा भविष्यति तथोपक्रमः कार्यः । एकाष्टकायाञ्चेदुखासम्भरणन्तदा तस्यामुखासम्भरणं कृत्वा पश्विष्ट्यादि सर्वं वसन्ते कार्यम् । चतुरो मास इत्यस्मिन् पक्षे एकाष्टकायात्र लभ्यते । मासादिपक्षेषूखासम्भरणप्रभृति सर्वं वसन्ते कार्यं पशुश्च यथा भवति । एवं स्मृत्वारम्भः कार्यः । अथाग्निप्रयोग उच्यते ॥

End :

प्रयास्यन्नाग्निभिरग्निं यजमान उपतिष्ठते। "अयं ते योनिः" इति प्राजहित॑ समारोप्य प्रागुदग्वोदवसाय। "उप॑ त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि ॥ राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमान॑ स्वे दमे ॥ स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये ॥" तिसृभिरन्येषां यजमानानां चित्यग्निं दृष्ट्वानुपतिष्ठते। "इदमूनुः श्रेयोऽवसानमागन्म" इत्यादि। अथ सायमग्निहोत्रं जुहोतीत्यन्तं समानम्। सन्तिष्ठतेऽग्निः। अग्निं चित्वा अनन्तरपर्वणि सौत्रामण्या यजेत। अपरेद्युर्मैत्रावरुण्याचामिक्षया ॥

Colophon :

अग्निचयनं समाप्तम् ॥

Subject : Āpastambamahāgnicayanaprayoga, based on 16th and 17th praśnas of the Āpastambaśrautasūtras.

Remarks :—The Ms. is in a fairly good condition.

॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

2556. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9174 a. Page 25. Right column.

Substance—Palm leaf. Size—$16 \times 1\frac{3}{8}$ inches. Leaves—36 (1—36). Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—600. Author—(?). Complete.

Beginning:

ॐ यज्ञेश्वरचरणारविन्दाभ्यां नमः। लक्ष्मीनारायणा-

भ्यां नमः । सिद्धिविनायकाय नमः । सीतारामाभ्यां नमः । अग्निञ्चेष्यमाणोऽमावास्यायां पौर्णमास्यां पूर्वपक्षे वा पुण्ये नक्षत्रे उखां सम्भरति । आषाढामधिकृतेभ्य...श्चेष्यमाण उपकल्पयते वैणव्यभ्रिररत्निमात्री अश्वगर्दभरशने अश्वगर्दभौ मृत्खननं वल्मीकवपाहिरण्यं पुष्करपर्णानि कृष्णाजिनानि क्षौमदाम मौञ्जदाम वा पुष्पफलवत्य ओषधयः कूर्मे कपालपिष्टानि वेण्वङ्गारपिष्टानि व्रीहि तुषाः पलाशकषायं पिष्टाः शर्कराः अजलोमानि कृष्णाजिनलोमानि वराहविहतं पूतीका अष्टाश्रयुखा अपरिमिताः सिकताः अषाढापाद्या सप्ताश्वशकानि लोहितपचनीयानि अजाक्षीरं एकविंशतिर्माषा हिरण्मयं मृन्मयं वा पुरुषशिरश्वेतपशुरभृङ्गः पलाशशाखाः प्लक्षशाखा उदुम्बरशाखाः स्वधितिर्यूपस्सचषालस्त्वरुरधिमन्थनश्च शकलः पौतुद्रवाः परिधयः गुग्गुलुसुगन्धिनेजनं श्वेतोर्णास्तुका प्रणयनीयमिध्मं द्वे स ते(?) अपरिमितं बर्हिस्त्रय इध्मौ आश्ववालः प्रस्तर ऐक्षवी विधृती- कार्ष्मर्यमयाः परिधयः ।

End :

आद्यस्य च तृतीयस्य ब्रह्महेत्यनुमन्त्रणम् ।
इन्द्रियाण्यन्नाद इति सप्तमस्यानुमन्त्रणम् ॥
इतरेषां भवे[त्] षण्णामन्नादस्त्वनुमन्त्रणम् ॥
सद्दावदाय सर्वेभ्यः स्विष्टकृत्तु प्रचर्यते ।
अग्निः केवल एव स्यात्स्विष्टकृत्प्रैषवानपि ॥
रौद्रशेषं क्षिपेदप्सु प्राशित्रेडन्न तस्य तु ।

पशुपुरोडाशं मैत्रावरुणषष्ठा भक्षयन्ति मैत्रावरुणवर्ज-
मितरान् भक्षयन्ति । इडान्तात्पशुपुरोडाशः सन्तिष्ठन्ते ।
स्रुवेण पृषदाज्यस्येत्यादि पत्नीसंयाजान्तोऽग्नीषोमी-
यस्सन्तिष्ठते । वसतीवरीपरिहरणादि सवनीयस्य पशोः
परिस्तरणान्तम् । महारात्रे बुध्वेत्यादि हृदेत्वा सोमराज-
न्निति ॥ २० ॥

Colophon : Nil.

Subject : Āpastambamahāgnicayanaprayoga, based on the 16th & 17th Praśnas of the Āpastamba Śrauta Sūtras. This Ms. contains two main sections:—

1. प्रथमचितिः 1—26 Khaṇḍas

2. द्वितीयचितिः 1—20 ,,

Remarks :—The Ms. is in a decaying condition.

॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

2557. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9174 b. Page 25. Right column. Substance—Palm leaf. Size—$16 \times 1\frac{3}{8}$ inches. Leaves—5 (37-41). Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—80. Author—(?). Prathamaciti only. Incomplete.

Beginning—Same as No. 2556.

End :

अग्निंभ्यः कामाय पशूनालभते मुष्करान् अपि वा
सर्वेषामेतेषां स्थाने वायवे नियुत्वते श्वेतमजन्तूपरमाल-

भते । देशकालौ सङ्कीर्त्य परमेश्वरप्रीत्यर्थं वायव्येन पशुना यक्ष्ये + बृहद्भा इत्यादि समानमावपाया होमात् ।
विहारभेदादेतस्मिन् पाशुकीदक्षिणा मता ।
प्राजापत्यः पुरोडाशस्याद्द्वादशकपालकः ॥
कपालयुग्ममन्त्राणां द्विद्विरावृत्तिरिष्यते ।
धर्तुश्चिन्मरुतां शर्धश्चितस्थेति तु युग्मकाः ।

Colophon : Nil.

Subject : Āpastambamahāgnicayanaprayoga, prathamaciti—1—7 Khaṇḍas only.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly ends in the middle of the Seventh Khaṇḍa of the First citi. The other work contained herein is **बोधायनमहाग्निचयनम्** . At the end of the work, there are 19 fragmentary leaves dealing with ten different subjects quite related to Śrautaprayogas, as follows :—

Beginning of the subject		No. of Leaves.
1	पुच्छाग्ररीतावर्धैका सा वायव्यदिगग्रका तदुदक् षोडशी प्राग्ग्रा चोदगग्रा च संमता ॥	1
2	पञ्चम्यन्त्याक्रमण्याख्या तुर्या मध्या तु मण्डला । आरोहेदुत्तरे वामा द्वितीया सप्तमावलौ ॥	2
3	आद्या नवम्या क्रमणी द्वादश्याद्या तु मण्डला ; अन्वारोहे आदिमायां दशम्येकादशी त्वपि ॥ १ ॥ (1-32 verses)	2
4	अथ द्वितीये प्रस्तारे शुल्बोपहितिरुच्यते । पुच्छाग्ररीतावर्धैका सा वायव्यदिगग्रका ॥	2
5	........वटीयत: पश्चादवशिष्येत्त सञ्चरम् ।	

शङ्कुस्त्वनुशिरोग्रीवस्तत्पश्चात्प्रक्रमद्वये ॥ 1

6 उपवेषोद्वावसनेवमृथकर्म भवेदिह ।

परिस्तराहुतिः पूर्वं ततश्च परिभोजिनीम ॥ 1

7 ॐ देशकालौ सङ्कीर्त्य एकाहं सवनत्रयं गणैर्होष्ये इति प्रथमं सङ्कल्प्य प्रातःसवनिकैर्गणैर्होष्य इति द्वितीयम्...... Leaves 3

8 எற்கலகம்—௪ கொடம்—௩

காகம்—௫ பாத்ரசெருச—௫

ஸ்தாலீபிங்கா—௪ பெரியபாத்ர—௫

பால்ச்சட்டி—௪ பசகும்ஸீ—௨

கரிச்சட்டி—௫ அரிக்கம் செட்டி—௨

பெரியதீர்த்தச்சால்—4 Leaves—5

9 अथैतमग्निं प्रत्यञ्चं यूपवाटी···च्छाकोर्वामिमीते ।

अथ वेदिमानानन्तरमाहुतिविशेषे सङ्कल्पिते एतमग्निम् । 1

(6th leaf only)

10 यो अश्वत्थः अश्वत्थः हव्यवाहाद्धि वैश्वानरस्य

॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

2558. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9175&9173. Page 25. Right column. Substance--Palm leaf. Size—14¾ × 1¼ inches. Leaves—83. Lines—7 to a Page. Script—Grantha. No. of Granthas—1450. Author—(?). Incomplete wants end.

Beginning :

अग्निञ्चेष्यमाणः अग्निरिति स्थण्डिलमिष्टकाकृतमुच्यते ।

तश्रेष्यमाणः त्र्यहदीक्षापक्षे उखासम्भरणप्रभृति आमिक्षापर्यन्तानि कर्माणि वसन्ते यथाभवन्ति। पर्वण्युखासम्भरणपक्षे एकाष्टकायाश्चेत्तस्यामुखासम्भरणम्; पश्विष्ट्यादि सर्वं वसन्ते। चतुरो मासो दीक्षित इत्यस्मिन् पक्षे एकाष्टकायां न लभ्यते। साग्निचित्यस्य क्रतोः प्रयोग उच्यते ॥

पर्वणोरेकाष्टकायां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पं करोति। द्वादशाहेनाहीनभूतेन साग्निचित्येन यक्ष्ये सर्वपृष्ठेन सर्वस्तोमेनान्वहन्द्वादशशतदक्षिणेन। प्रजायेय स्वर्गं लोकमवाप्नवानि ॥

End:

पुरस्तात् प्रातरनुवाकादग्निं युनज्मीति तिसृभिरभिमृशन्नग्निं युनक्ति।

"अग्निं युनज्मि शवसा घृतेन दिव्यं सुपर्णं वयसा बृहन्तम्।
तेन वयं पतेम ब्रध्नस्य विष्टपं सुवो रुहाणा अधिनाक उत्तमे ॥
इमौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहंस्यग्ने।
ताभ्यां पतेम सुकृतामुलोकं यत्रर्षयः प्रथमजा ये पुराणाः ॥
चिदसि समुद्रयोनिरिन्दुर्दक्षश्श्येन ऋतावा।
हिरण्यपक्षश्शकुनो भुरण्युर्महान्त्सधस्थे(ध्रुव आनिषत्तः) ॥"

Colophon: (Leaf 46).

चतुर्थी चितिस्समाप्ता ॥

Subject: Āpastambamahāgnicayanaprayoga consisting of the following divisions :—

I	16th	Praśna.	प्रथमा चितिः	Leaf No.	1—37
II	17th	,,	द्वितीया चितिः	,,	37—40
III	,,	,,	तृतीया चितिः	,,	40—43

IV 17th Praśna चतुर्थी चितिः Leaf No. 43—46

V ,, ,, पञ्चमी चितिः ,, 46—?

Remarks :—The Ms. is in a fairly good condition. The two Mss. Nos. 9175 and 9173 form one work, and are here treated as one Ms. There are 3 loose broken leaves at the end of this Ms. which however treats of the measurements of Somaciti and various dīkṣās in Soma sacrifices.

॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

2559. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9171 b.

Substance—Palm leaf. Size—15½ × 1½ inches. Leaves—8. Lines—8 to a Page. Script—Grantha. No. of Granthas—110. Author—Prathamaciti only. Incomplete.

Beginning:

(साग्निचित्य)स्य क्रतोः प्रयोग उच्यते । पर्वणोरेकाष्टकायां प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पं कृत्वा द्वादशाहेनाहीनभूतेन साग्निचित्येन यक्ष्ये । सर्वपृष्ठस्तोमेनान्वहन्द्वादशशतदक्षिणेन प्रजायेय स्वर्गं लोकमवाप्नवानि । विद्युदसि । अस्मिन्नहीनभूतद्वादशाहे सोमप्रवाकं त्वां वृणीमहे ॥

End:

एकैकमुदपात्रं सर्वासु सीतासु निनयति कर्षक्रमेण । "या जाता ओषधयः" इति चतुर्दशभिरोषधीर्वपत्यनुसीतमित्यु(क्तम् । सप्तग्राम्याः कृष्टे वपति, स)प्तारण्या अकृष्टे । या जाता ओष+प्तच । द्वादशसु सीतासु तिला-

न्वपति । एवमुत्तरानावपति । शतं वो+कृत । माषान् । पुष्पवतीः+ष्णवः । व्रीहीन् । ओषधी....न् (+चातयमानाः । यवान्) अश्वत्थे +पूरुषम् । प्रियङ्गून् । यदहम् + यथा दारुमान्(अणून्) ॥

Colophon : Nil.

Subject: Mahāgnicayanaprayoga—Prathamaciti only.

Remarks:—The Ms. is in a decaying condition. This abruptly ends in the middle of the first Citi. For the other works contained herein see Remarks under No. 2326.

॥ बोधायनमहाग्निचयनप्रयोगः ॥

2560. BODHĀYANAMAHĀGNICAYANA-PRAYOGAḤ.

J. L. Collection No. 251. Substance—Paper. Size—13⅛ × 5½ inches. Sheets—42. Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—?. Incomplete.

Beginning:

श्रीमहागणपतये नमः । श्रीमद्दिव्यलक्ष्मीनृसिंहाय परमगुरवे चित्सभापतये नमः ।

बोधायनीयकर्मान्तद्वैधकल्पानुसारतः ।
वक्रपक्षः श्येनचितः प्रयोगः प्रवितन्यते ॥

“ उखास्सम्भरिष्यन्नुपकल्पयते + अधिकरणीमुखाकृतं कुशलम्” इति । अथामावास्येन वा हविषेष्ट्वा नक्षत्रे वोखां सम्भरति । अमावास्यायां पौर्णमास्यां वेति कल्पान्तरम् ।

नान्दीमुखादिषट्कञ्च श्रद्धाहानादिषट्तयम् ।
अग्नेरित्थं विशेषेण वक्ष्येऽहं क्रतुनेति च ॥

सङ्कल्प्य ऋत्विग्वरणं मधुपर्केण चाहर्णम् ।
ततश्च सर्वकामोऽग्निं चेष्य इत्यागुरुं वदेत् ॥
उखासम्भरणार्थान्या शालाग्न्याषेयिकी तु वा ।
गत्वा शालां मथित्वाग्नीन्विहृत्वाथ मनस्वती ॥
अथाध्वर्युः "इडादेवहूः" इति जपित्वाऽग्रेण शालां
शम्यान्यासे गर्तं खानयति ॥

End :

अथ स्वयमातृण्णामश्वमवघ्राप्याविदुषा ब्राह्मणेन सहाधिहृत्योपदधाति सुवरायोस्त्वा सदने सादयाम्यव तश्छायाया नमः समुद्राय नमः समुद्रस्य चक्षसे परमेष्ठीत्वा सादयतु दिवः पृष्ठे व्यचस्वतीं प्रथस्वतीं विभूमतीं प्रभूमतीं(परिभूमतीं दिवं यच्छ) ॥

Colophon : (Sheet 40)

चतुर्दशोऽध्यायः ॥

Subject : Mahāgnicayanaprayoga, based on 1-46 Khaṇḍas of the 15th Adhyāya of the 14th (10th) Praśna (Agnicayanapraśna) of the Bodhāyana school of the Black Yajur-Veda.

Remarks :—The Ms. is in a fairly good condition. It breaks off towards the close of the 46th Khaṇḍa of the 15th Adhyāya of the Agnicayanaprayoga.

॥ बोधायनमहाग्निचयनप्रयोगः ॥

2560. BODHĀYANAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3758. Page 25. Right column.

Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{3}{4}$ inches. Sheets—72. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1220. Author—Venkaṭeśvara dīkṣita. Complete.

Beginning:

श्रीरामचन्द्राय नमः ॥ अविघ्नमस्तु ॥

विश्वेश्वरं नमस्कृत्य लक्ष्मीनारायणौ गुरू ।
वाणीं यज्ञेश्वराचार्यं दक्षिणामूर्तिमेव च ॥
बोधायनं भवस्वामिं भाष्यकारं मुहुर्मुहुः ।
प्रयोक्तृकण्ठपाठाय प्रयोगं वेङ्कटेश्वरः ॥
बोधायनीयवक्राग्नेस्तनुते हि यथामति ॥

हरिः ॐ ॥ उखाः सम्भरिष्यन्नुपकल्पयतेऽश्वञ्च श्वेतं कृष्णञ्च गर्दभञ्च तयोरवे रशने मौञ्ज्यौ वा कुशमय्यौ वाभ्रिञ्च ब्राह्मणसम्पन्नां वैष्णवीं कृष्णबिन्दूचितां व्याममात्रीं सुषिरामुभयतः क्ष्णुमिति मृदञ्च भावितां करणीयां सप्तच्छिद्रामच्छिद्राञ्च वल्मीकवपां कृष्णाजिनानि पुष्करपर्णानि मौञ्जं योक्त्रमुदकुम्भं कुशतरुणकानि दूर्वाग्रन्थीनर्मकपालानि पिष्टानि शर्करा अवाञ्जनपिष्टा अजलोमानि कृष्णजिनलोमानि वैश्यं सप्तदशं स्रुनामधिकरणीमुखाकृतं कुशलं यूपांस्त्रीन् सचपालान्नवाधिमन्थनशकलान् पशून् श्वेतमग्रं गाञ्च लोलोहं तूपरं श्मश्रुणञ्च कृष्णग्रीवञ्च मेषीञ्च कपिलञ्च श्यामञ्च शुक्लपृष्ठञ्च नानावर्णञ्च सन्ध्यावर्णञ्च श्वेतं कृष्णबिन्दूचितञ्च + अन्यानि च पाशुकानाग्निष्टोमिकाश्च सम्भारानिति ॥ १ ॥

End:

अथैनमन्यत आसी(सि)भिरुपतिष्ठते । आपं त्वाग्ने मन-

सेति नवभिरनुष्छन्दसं पूर्वाग्निसमारोपणादि पूर्णाहुत्वा यज्ञं व्रतश्च विमुच्य पुनरालम्भगोमतीब्राह्मणान्यथोदव-सानीयया यजतेऽग्न(ग्नि)समारोपणादि सायम्प्रातरग्निहोत्रे प्रतिजुहोत्यथानन्तरे दिने पर्वणि शुक्लपक्षदेवनक्षत्रे वा देविकाहविर्भिरिष्ट्वा वा त्रैधातवीयया यजतेऽथ सौत्रा-मण्या यजते संवत्सरं न कश्चन प्रत्यवरोहति नाग्नि-ञ्चित्वा रामामुपेयात् । न वर्षति धावेत् । यदि धावेदु-पावर्तेत "अन्नाद्यमेवाभ्युपावर्तत इति ब्राह्मणम् ॥ ६१ ॥

Colophon :

इति श्री गोविन्दपुरवास्तव्य बोधायनादि षट्सूत्रपारवारपारीण-लक्ष्मीनारायणश्रौतिवर्य गर्भसम्भव रघुनाथदीक्षित-सर्वतन्त्रस्वतन्त्र श्रीयज्ञेश्वराचार्य कृपाप्राप्त श्रौतशास्त्रधुरन्धर-श्रीमन्महाराजश्रीशरभेन्द्राश्रितश्रीवेङ्कटेश्वरदीक्षितविरचित-बोधायनीयमहाग्निचयनप्रयोग: समाप्तिमगमत् ॥

Subject: Bodhāyanamahāgnicayanaprayoga, based on the 14th (10th) Praśna of the Bodhāyana sūtras of the Black Yajur-Veda. 1-61 (59) Khaṇḍas.

Remarks :—The Ms. is in good condition.

॥ बोधायनमहाग्निचयनप्रयोगः ॥

2561. BODHĀYANAMAHĀGNICAYANA-PRAYOGAḤ.

J. L. Collection No, 252. Substance—Paper. Size—9½ × 4 inches. Sheets—91 (26th missing). Lines—6 to a Page.

Script—Devanāgarī. No. of Granthas—1200. Author—Venkaṭeśvaradīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 2560.

Remarks :—The Ms. is in a fairly good condition.

॥ बोधायनमहाग्निचयनमन्त्रानुक्रमणी ॥

2562. BODHĀYANAMAHĀGNICAYANA-MANTRĀNUKRAMAṆĪ.

Burnell's Catalogue No. 3757. Page 25. Right column. **Substance**—Paper. **Size**—$10\frac{1}{2} \times 4\frac{7}{8}$ **inches.** Sheets—78. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—1500. Author—Veṅkaṭeśvaradīkṣita. Complete.

Beginning:

श्रीगणेशाय नमः ॥

विघ्नेश्वरं नमस्कृत्य लक्ष्मीनारायणौ गुरू ।
वाणीं यज्ञेश्वराचार्यं भाष्यकारं मुहुर्मुहुः ॥
प्रयोक्तृकण्ठपाठाय बोधायनमतानुगम् ।
प्रयोगः सहसोमस्य चित्यग्नेर्वेङ्कटेश्वरः ॥
तनुते सुखबोधार्थं यथामति विचारयन् ।
मन्त्रानुक्रमरूपं तं पूर्वमेवं प्रदर्श्यते ॥

श्रीगुरवे नमः । श्रीगणपतये सहस्रकृत्वो नमः ॥ नान्दीमुखा भूर्भुवः प्रजापतिः प्रीयतां यः पुरस्ताच्चित्यौ श्रीपरमेश्वरप्रीत्यर्थं सर्वकामोऽग्निं चेष्ये ॥ तन्म० आदित्यो देव० चन्द्रमादेव ॐ कल्पयत ॥

End:

अग्नय इदं० । येऽग्नयः पुरीष्याः प्रविष्टाः पृथिवी-
मनु । तेषां त्वमस्युत्तमः प्र णो जीवातवे सुव ॥ आपन्त्वाग्ने
मनसापन्त्वाग्ने तपसापन्त्वाग्ने दीक्षयापं ह्यग्ने उपसद्भि-
रापं त्वाग्ने सुत्ययापं त्वाग्ने दक्षिणाभिरापं त्वाग्नेऽवभृथे-
नापं त्वाग्ने वशयापं त्वाग्ने स्वगाकारेण अयं ते ज्योतिष
इदं यदाकूतास्त्रयोविंशतिः । एकादशिन पशुवपाहविःप्रचा-
रादि देविका हविरन्तः पञ्चदशः ॥ १५ ॥ अग्नाविष्णू
वाजस्यमेमृताषाड्कर्मणे वामे हि यजमान पञ्चदश ॥

Colophon:

इति श्रीवेङ्कटेश्वरदीक्षितकृतवौधायनचयनमन्त्रानुक्रमणी
समाप्ता ॥ हरिः ॐ ॥

Subject: Bodhāyanacayan amantrānukramaṇikā—an index of mantras used in the Cayana sacrifice.

Remarks :— The Ms. is in good condition.

॥ आपस्तम्बकाठकचयनप्रयोगः ॥

2563. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9176. Page 25. Right column. Substance—Palm leaf. Size—16×1 inches. Leaves—40. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—800. Author—(?). Sāvitra, Nāciketa and Cāturhotra only—incomplete.

Beginning:

सावित्रचयनप्रयोगः ।

सावित्रं स्वर्गकामश्चिन्वीत । पशुबन्धे चीयते । प्रावृषि पर्वणोः पूर्वपक्षस्य वा पुण्ये नक्षत्रे प्रातरग्निहोत्रं हुत्वा गणेशपूजां पुण्याहञ्च वाचयित्वाऽपरेण गार्हपत्यं पत्न्या सहोपविश्य पवित्रपाणिः[पाणिः] प्राणानायम्य देशकालौ सङ्कीर्त्य मम+उपात्त+त्यर्थं । पशुबन्धेन यक्ष्ये इत्यादि । आत्मन्यरण्योर्वा अग्निं समारोप्य देवयजनं यागोपकरणैः सह गत्वायतनानि कल्पयित्वा उद्धृत्यापोक्ष्याग्निं मथित्वोपावरोह्य । विद्युत । आत्मसमारोपणपक्षे लौकिकेऽग्नावुपावरोह्य । विद्युत् । पुनस्त्वादित्याः+कामाः । अग्निमुपसमिन्ध्यात् । विद्युदसि + पैमि । अथ चयनसङ्कल्पः ॥

End:

राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथं वैश्वानरः प्रत्नथानाकमारुहत् । दिवः पृष्ठं भन्दमानस्सुमन्मभिः । स पूर्ववज्जनयज्जन्तवेधनं समानमज्मापरियाति जागृविहि राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथं तेनामृतत्वमश्यां+प्रतिगृह्णातु । तया+सीद । एवं ब्राह्मणपक्षे । प्रतिगृह्णे । राजा+णेनिर्ऋत्यो अश्वतरम् । निर्ऋत्यै गर्दभम् । गन्धर्वेभ्यस्स्रजम् । अप्सराभ्यो ऽलङ्करणम् । एवमनुषङ्गमिच्छन्ति केचित् दा···उपकल्पनकाले तद(?)शतमिष्टका उपकल्पयितव्याः । अन्यत्सर्वं समानं स्वयमातृण्णादि ॥

Colophon:

चातुर्होत्रप्रयोगः समाप्तः ॥

Subject: Kāṭhakacayana. 1-3 citis only.

1	सावित्रचयनप्रयोगः	Leaf	1
2	नाचिकेतप्रयोगः	,,	15
3	चातुर्होत्रप्रयोगः	,,	25

Remarks:— The Ms. is in good condition. There are five Kāṭhaka citīs. (1) Sāvitra, (2) Nāciketa, (3) Cāturhotra, (4) Vaiśvasṛja, (5) Āruṇaketuka, of which the first three are dealt with in this Ms.

॥ आपस्तम्बकाठकचयनप्रयोगः ॥

2564. ĀPASTAMBAKĀTHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9519 g.

Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{3}{8}$ inches. Leaves—11. Lines—9 or 10 to a Page. Script—Grantha. No. of Granthas—325. Author—(?). Āruṇaketuka only—incomplete.

Beginning:

....काठकाः सावित्रनाचिकेतचातुर्होत्रवैश्वसृजाः । तथाऽरुणकेतुकः पञ्चमः काठकः ब्राह्मणे व्याख्यातः । प्रायेण तस्य प्रयोग उच्यते । स इह दे(वाचार्या)भिप्रायेणाग्निहोत्रदर्शपूर्णमासपशुबन्धचातुर्मास्यादिषु चेतव्यः । अथ पुरश्चरणम् । यजमानस्याज्याऽनुवाके यदुदीरितं तत्संवत्सरमेतद्व्रतञ्चरेदित्यादि संवत्सरं वा मासद्वयं वा द्वादशरात्रं वा अध्वर्युर्यजमानं प्रतिकारयेत् ।

* * * *

पुनर्मामैत्विन्द्रियमिति तिस्रः समिधः ।

अथारुणकेतुकञ्चेष्यमाण उपकल्पयते ।

End:

वैश्रवणयज्ञो ब्राह्मणव्याख्यातो न कामस्य वा पर्वणि वैश्रवणाय यज्ञस्सोत्तरवेदि....क्षु क्रतुषु चिन्वीतेति यथा ब्राह्मणन्तस्यैतस्य व्रतमिति यथा ब्राह्मण सस्मितश्च वृत्तसमुच्चयः । आपो न बीभत्स्याद्यथा ब्राह्मणकामस्सर्वकामो वा । आपो वा इदं सर्वमिति ब्राह्मणं विज्ञायते । ब्रह्म वा आपो यदाप उपधीयन्ते ब्रह्म वै तदात्माऽध्वरे ब्रह्मणस्सायु(ज्य)..............................

Colophon : Nil.

Subject:—Kāṭhakacayanaprayoga. Fifth citi—Āruṇaketuka.

Remarks :—The Ms. is in a most decaying condition. This work closely follows the work of Tālavṛntanivāsin.

॥ आपस्तम्बकाठकचयनप्रयोगः ॥

2565. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 2530. Page—25. Left column. Substance—Paper. Size —$11\frac{1}{2} \times 6$ inches. Sheets—22. Lines—10 to 11 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—(?). Āruṇaketuka only.

Beginning :

श्रीगणेशाय नमः ॥

अथारुणकेतुकस्याग्नेः प्रयोग उच्यते ।

तत्र तावत् तत्र "भद्रं कर्णेभिः" इति प्रश्नसमधीतानां मन्त्राणामारुणकेतुकेऽग्नौ विनियोजकानि बोधायनसूत्रवाक्यानि भट्टभास्करमिश्राः माधवाचार्या वर्णानुपूर्वतोऽर्थतश्च परस्परविरुद्धान्युदाहरन्ति ॥ तथा बोधायनीयकेशवस्वमी तदुभयविरुद्धमेवारुणकेतुकप्रयोगमाचष्टे । परिदृश्यमानबोधायनसूत्रे तु तत्रितयविरुद्धप्रयोगोऽवगम्यते । बोधायनाचार्यशैली च तत्र न दृश्यते । प्रत्यक्षब्राह्मणविरोधश्च तत्र तत्र बहुलमुपलभ्यते । तत्र दिङ्मात्रं प्रदर्शयामः । तत्र तावत् "स्मृतिः प्रत्यक्षम्" इत्यष्टौ दिश्याः । "शुक्रन्ते अन्यत्" इति चेति माधवीये । केशवीये परिदृश्यमानसूत्रे च दृश्यते । भट्टभास्करीये तु "अथोभयतो दर्भस्तम्बस्याष्टावुपदधाति । स्मृतिः प्रत्यक्षमिति" इत्युक्त्वा "शुक्रन्ते अन्यत्" इत्येषा ऋक् "शुक्रकृष्णे संवत्सरस्य" इत्यादि ब्राह्मणशेषत्वेन व्याख्याता । न तूपधानार्थत्वेन । तथा "आरोग" इत्यष्टौ पदशोधने(त्ते)शिल्पमिति चेति । माधवीये परिदृश्यमानसूत्रे च दृश्यते । भट्टभास्करीयेतु अथ दक्षिण(त) उदीचीरात्मन्युपदधाति आरोगादिभिः सप्तसूर्यनामभिरित्युक्त्वा । "कश्योऽष्टम" इत्यादिब्राह्मणशेषत्वेन "यत्ते शिल्पम्" इत्येषा व्याख्याता । तथा परिदृश्यमानसूत्रे पञ्चस्वपि चितिषु सञ्चितासु अग्निप्रणयनमाम्नातम् । ब्राह्मणे तु । "ब्रह्मवादिनो वदन्ति । तस्मात्प्रणेतेयमग्निश्चीयत" इति

प्रश्नमवतार्य असौ भुवनेष्वनाहिताग्निरेतेति चयनानन्तरमग्निप्रणयने दोषमभिधाय 'तमभित एता अबीष्टका उपदधातीति अग्निन[ः]प्रणयनानन्तरमेव चयनमाम्नायते । तथा सूत्रकारेण वैश्रवणयज्ञस्य अन्यथाप्रयोग उक्तः स ब्राह्मणविरोधाश्चि इति नोक्त इति । भट्टभास्करीयभाष्यात् वैश्रवणयज्ञो ब्राह्मणव्याख्यात इति माधवोदाहृतस्य परिदृश्यमानसूत्रीयस्य च वचनस्याप्रामाणिकत्वमेवावगम्यते । एवमन्यत्रापि ।

एवमन्यत्रापि बहवो विरोधाः परीक्षकाणां सुस्पष्टावगम इति दिङ्मात्रमेव दर्शितम् ॥

End :

तेजस्कामो यशस्कामः तदवरुन्ध इति । एतत्प्रजापश्वादिकं स्वर्गान्तं यावत्फलमुक्तं एतावदेव लोके विमानं फलमुत्तममतो यावदुत्तममस्ति तत्सर्वमनेन च धनेन प्राप्नोति ॥ अथारुणकेतुकाग्निचितो नियमविशेषं विधत्ते । तस्यैतद्व्रतम् ॥ स्योनं तरित्वा इति ।

* * * *

नियमान्तरं विधत्ते । न कूर्मस्याश्नीयात् । मेवं वेदेति । कूर्मस्याङ्गं किंचिदपि न भुञ्जीत । उदकशब्देन तत्रत्यो मीनादिरुपलक्ष्यते । तदायमस्याङ्गनाऽश्नीयात् य एतमारुणकेतुकमग्निं चिनुते यश्चैनं वेद तमेनं प्रत्ये दकानि । उदकवर्तीनि मीनादीनि अघातुकान्यहिंसकानि भवन्ति । आपोऽप्यघातुका उदकमरणञ्च न भवेदित्यर्थः ॥

Colophon:

षड्विंशोऽनुवाकः ॥

Subject : Kāṭhakacayanaprayoga— Fifth citi— Āruṇaketuka based on the 21 (?) to 26 Anuvākas of the first Praśna of the Taittirīyāraṇyaka.

Remarks :—The Ms. is in a fairly good condition. A transcribed copy of this Ms. in paper is also available in this library. See Transcript Volume No. the date of copying being T. V. No. 460. (No. 31 ?).

॥ आपस्तम्बकाठकचयनप्रयोगः ॥

2567. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3804. Page 25. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{7}{8}$ inches. Sheets—30. Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—?. Āruṇaketuka only.

Beginning, end, colophon and subject—Same as No. 2566.

Remarks :—The Ms. is in a fairly good condition. On the title page is given ' राजमान्यराजे श्रीचिदम्बररायाणामिदं पुस्तकम् ' i. e. the Ms. originally belongd to one Rājamānyarāja Śri Cidambararāya.

॥ आपस्तम्बकाठकचयनप्रयोगः ॥

2568. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3805. Page 25. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 4$ inches. Sheets—11. Lines — 8 to a Page. Script—Devanāgarī. No. of Granthas —210. Author—?. Āruṇaketuka only—Incomplete.

Beginning :— Same as No 2566.

End:

तत्र प्रकारः । "आपमापम्" इति पञ्चभिः प्रतिमन्त्रं प्रतिदिशं मध्ये चोपदधाति । तया देवतं कृत्वा ध्रुवदोहसः करोति । स्वयमातृण्णादि अवद्रवणान्तश्चित्यन्तः लोकं पृणुयाद्वितीयाग्निचितिं चिनुते स्वयमातृण्ण........त्यंतः त इन्द्रघोषावो वसुभिरिति पञ्चभिः प्रतिमन्त्रं प्रतिदिशं मध्ये उपरिष्टाच्च उपदधाति ॥

* * *

ततः हिरण्यशकलप्रोक्षणादि । सर्वं सावित्रवत् । ततस्तत्कर्माणि समाप्ते अह्नि महानिशायां वा वैश्रावणयज्ञः ब्राह्मणे स्पष्टः ॥

Subject: Kāṭhakacayanaprayoga. Fifth citi—Āruṇaketuka. This Ms. contains three important sections:—

(1)	आरुणकेतुकप्रयोगोपोद्घातः	Sheets	1—5
(2)	आरुणकेतुकप्रयोगः	,,	5-11
(3)	आरुणकेतुकप्रयोगक्लृप्तिः (मानम्)	,,	11

Remarks :— The Ms. is in good condition. On the ittle page is given 'राजमान्यराजे श्रीचिदम्बररायाणामिदं पुस्तकम्' i. e. the Ms. originally belonged to one Rājamānyarāja Śri Cidambararāya.

॥ आपस्तम्बकाठकचयनप्रयोगः ॥

2569. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3807. Page 25. Left column.

Substance.—Paper. Size—11½×6 inches. Sheets—9. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas —210. Author—(?). Āruṇaketuka only—Incomplete.

Beginning, end and subject—Same as No. 2568.

Remarks:—The Ms. is in good condition.

॥ बोधायनकाठकचयनप्रयोगः ॥

2570. BODHĀYANAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3801. Page 25. Right column. Substance—Paper. Size—10½×4¾ inches. Sheets—23. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Bālādīkṣita. Sāvitracayana only.

Beginning:

श्रीमहागणपतिर्जयति ।

प्रणम्य बोधायनसूत्रकारं
तदुक्तकर्माचरणाय सम्यक् ।
शिवाजिपृथ्वीपतिबोधितोऽहं
करोमि बालाध्वरकृत्प्रयोगम् ॥

सावित्रं स्वर्गकामश्चिन्वीत । पशुबन्धेचेश्चीयते चेष्यमाण उपकल्पयते पञ्चाशीतिशतं हिरण्येष्टकाः शर्करा वा घृताक्तास्तावत्यो लोकम्पृणाः अपरिमिता वा चतस्रः स्वयमातृण्णाः सहस्रं हिरण्यशुल्कान् * पाशुकांश्च सम्भारान् । अथामावास्येन वा हविषेष्ट्वा नक्षत्रे वा पूर्वेद्युः करिष्यमा-

णस्य कर्मणोऽविघ्नेन परिसमाप्त्यर्थमादौ श्रीमहागण-
पतिपूजां करिष्ये इति सङ्कल्प्य

* * * *

ममोपात्त॰ परमेश्वरप्रीत्यर्थं सकाठकाग्निना निरूढप-
शुना यक्ष्ये । तन्म ऋध्यतां॰ तत्त ऋध्यतां॰ ॐ तथेति
ऋत्विजो वृणीते ॥

End:

अध्वर्यो धेनुमृषभमनड्वाहमन्विष्टकं दक्षिणाश्च ददाति
तूष्णीं प्रतिगृह्णाति । अग्नीदौपयजानङ्गारानित्यादि पशु-
कर्म प्रतिपद्यते॰ ब्राह्मणतर्पणान्तं समानम् । सन्तिष्ठते
सावित्रः ॥

Colophon:

इति बोधायनसावित्रचयनप्रयोगः सम्पूर्णः ॥

Subject: Kāṭhakacayanaprayoga, First citi—Sāvitra only.

Remarks:—The Ms. is in good condition.

॥ बोधायनकाठकचयनप्रयोगः ॥

2571. BODHĀYANAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3802. Page 25. Right column.

Substance—Paper. Size—10¾ × 4¾ inches. Sheets—25. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Bālādikṣita. Sāvitracayana only.

Beginning, end, colophon and subject—Same as No. 2570.

Remarks:—The Ms. is in good condition.

॥ बोधायनकाठकचयनप्रयोगः ॥

2572. BODHĀYANAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3803. Page 25. Right column. Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{3}{4}$ inches. Sheets—23. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Bālādīkṣita. Sāvītracayana only.

Beginning, end, colophon and subject—Same as No. 2570.

Remarks:—The Ms. is in good condition.

॥ बोधायनकाठकचयनप्रयोगः ॥

2573. BODHĀYANAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9177. Substance—Palm Leaf. Size—$17 \times 1\frac{1}{8}$ inches. Leaves—15. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—360. Author—(?). Vaiśvasṛjacayana and Samaṣṭicayana only.

Beginning :

वैश्वसृजचयनप्रयोगः ॥

एतेनवैश्वसृजो व्याख्यातः । वैश्वसृज इत्यग्निचित्यस्य नामधेयम् । विश्वसृड्भिश्चितोऽग्निः वैश्वसृजः । "आदर्शमग्निं चिन्वानाः पूर्वे विश्वसृजो मृताः" इति मन्त्रवर्णात् । एतेनसावित्रेग वैश्वसृजो व्याख्यातः । पशुबन्धे चीयते प्रावृषि पौर्णमास्याममावस्यायां वैन्द्राग्नेन निरूढपशुबन्धेन यक्ष्ये इति सङ्कल्प्यारण्योरग्निं समारोप्य

यागदेशं गत्वायतनानि कल्पयित्वा अग्निं मथित्वा आयतने निधाययोपावरोह्य । त्रिवृत् । अथ चयनसङ्कल्पः । दर्भेष्वासीनः दर्भान् धारयमाणः + परमेश्वरप्रीत्यर्थं वैश्वसृजमग्निं चेष्य इति सङ्कल्प्य चेष्यमाण उपकल्पयते ।

End:

"भूरग्निम्" इत्यादिश्चतस्रः स्वयमातृण्णा उपधाय लोकं पृणाभिः प्रच्छाद्य चत्वालात्पुरीषमाहृत्य "पृष्ठोदिवि" इति वैश्वानर्यर्चा चितावनुव्यूहति । "भूर्भुवस्सुवः" इत्यनुवाकेनानुशंसनमग्निप्रणयनादि । सा चितिर्भवति । चातुर्होत्रः पञ्चमीचितिः । अवरोहणजपादिदक्षिणाकालो उभयीर्दक्षिणा ददाति । क्रतुदक्षिणा अग्निदक्षिणाश्च । पूर्ववत् दक्षिणा प्रतिग्रहः । अन्यत्सर्वं समानम् ब्राह्मणतर्पणान्तम् ॥

Colophon:

समष्टिचयनप्रयोगः समाप्तः ॥

Subject: Kāṭhakacayanaprayoga, consists of

(a) Vaiśvasṛjacayana. Leaves 1—13

(b) Samaṣṭicayana. ,, 14—15

Remarks:—The Ms. is in a very good condition. Dr. Burnell put this No. in the 'Errata et addenda' under the heading 'fragments on prayoga.

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

2574. ĀŚVALĀYANAŚRAUTAPRAYOGAVṚTTIḤ.

J. L. Collection No. 11. Substance—Paper. Size—9¼ × 4¼

inches. Sheets—89. Lines—19 to a Page. Script—Devanāgarī. No. of Granthas—2475. Author—Tālavṛntanivāsin. Pūrvaṣaṭka only.

Beginning:

श्रीगणेशाय नमः ॥

समस्तप्राणिजातस्य हृत्पद्मनिलयस्थितम् ।
वेदार्थविदुषां ज्ञेयं यज्ञात्मानं नमाम्यहम् ॥

देवस्वामिसिद्धान्तिनारायणादिव्याख्याकारानुसारेणाश्वलायनसूत्रस्यादित आरभ्य प्रयोगवृत्तिः क्रियते। अनादेशे होत्रा कर्तव्याः पा(प)दार्थाः। अस्मिञ्छास्त्रे स होता सूत्रोक्तर्त्विग्लक्षणसहितः यज्ञोपवीती शुचिश्च भवति। कर्मार्थे ऋचं पादा(द)ग्रहणे सूक्तं सूक्तादौ हीने पादे अधिके तृचं एतदपि सामान्यं जपानुमन्त्रणाप्यायनोपस्थानान्युपांशु मन्त्राश्च कर्मकारणाः । अथ कर्मक्रमः । होतरेहीत्युक्तो होता प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीती भूत्वाचम्य तीर्थेन दक्षिणावृद्भूत्वाहवनीयोत्करयोरन्तरा (पूर्वेणोत्करावपरेण प्रणीता इध्ममपरेणाप्रणीते कर्मणि चात्वालवत्सु कर्मसु चात्वालमपरेण गत्वा उत्तरया) वेदिश्रोण्या अपरेण तिष्ठन् "अग्नये समिध्यमानायानुब्रूहि "इत्युक्तो जपति ॥

End:

माध्यन्दिने मरुत्वतीयप्रगाथानन्तरमाहूय एकस्य चिन्म इति सूत्रमुखीयांश्चस्त्वा इन्द्रमरुत्व इति तिस्रः स-

निविर्त्कं शस्त्वा अन्त्यया परिधानीया ॥ निष्केवल्यस्य सामप्रगाथान्तमाविष्कृतं शस्त्वाहूय "एकं नुत्वा" इति सूक्तमुखीयां शस्त्वाहूय "नृणामुत्वा" इति तृचं एकांशस्त्वा-निवित् अन्त्या परिधानीया ॥ मैत्रावरुणस्य सर्वं बृहस्पति-सववत् ॥ अथ ब्राह्मणाच्छंसिनः श्रायन्त इव सूर्यं बण्महाँ असि सूर्येति स्तोत्रीयानुरूपौ ॥ शोंसावोमुदुत्येमधुमत्तमा इत्यादि सर्वं बृहस्पतिसववत् ॥ अथाच्छावाकस्य सर्वं बृहस्पतिसववत् ॥ केचिदत्रापि ब्राह्मणाच्छंसिनः एक-स्तोत्रीयानुरूपैवेति वदन्ति । स्तोत्रीयानुरूपाः सर्वास्तृचा एवेति वदन्ति अपरे ॥ तृतीयसवनं सर्वं बृहस्पति-सवेन व्याख्यातम् ॥ एकत्रिकः समाप्तः ॥

हरिः ओँ ॥

Colophon : (Sheets. 25)

आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका ।
कृता वैविद्यवृद्धेन तालवृन्तनिवासिना ॥
चातुर्मास्यानि समाप्तानि ॥

आश्वलायनसूत्रस्योपरितन(!)षट्कं समाप्तम् ॥ श्रीकृष्णार्पणमस्तु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥ श्रीः ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥

Subject: Āśvalāyanaśrautaprayogavṛtti—an independent Prayoga treatise on the Āśvalāyanaśrautasūtra 1—6 Adhyāyas.

This Ms. contains the following sections:

Serial No.	Subject.	Sheets	Serial No.	Subject	Sheets
1	दर्शपूर्णमासहौत्रम्	1	11	सौत्रामणी	33
2	अग्न्याधेयम्	6	12	सोमप्रयोगः	42
3	अग्निहोत्रम्	9	13	माध्यन्दिनसवनम्	60
4	पिण्डपितृयज्ञः	11	14	तृतीयसवनम्	64
5	अन्वारम्भणीयम्	12	15	उदयनीयेष्टिः	69
6	पुनराधेयम्	13	16	षोडशीसंस्था	70
7	आग्रयणम्	14	17	अतिरात्रप्रयोगः	78
8	काम्येष्टयः	14	18	पुनस्तोमः	84—85
9	चातुर्मास्यम्	20	19	बृहस्पतिसवः	85—87
10	पशुबन्धः	25	20	एकत्रिकः	87—88

Remarks:—The Ms. is in good condition. The author of this work is Āṇḍapillayār otherwise known as Tālavṛntanivāsin. He is unrivalled in vedic scholarship, which he has made a fair display in his prayoga work. He is no doubt later than Devasvāmin, Siddhāntin, Nārāyaṇa and others, whom he abundantly quotes in his work. On the title page is given 'गङ्गाधरनायकान्नामिदं पुस्तकम्' i.e., the Ms. belonged to Gaṅgādharanāyaka.

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

2575. ĀŚVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 4071. Page 14. Left column.

Substance—Paper. Size—10⅜ × 5⅜ inches. Sheets—82. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Tālavṛntanivāsin. First Five Adhyāyas—incomplete.

Beginning—Same as No. 2574.

End :

एषा परिधानीया सर्वशस्त्रपरिधानीया स्वाहा वोनित्यः। उक्थम्। वाचि "घोषाय त्वा" इति शस्त्वा जपति। षट्पदे-त्रिपदे वा। प्रतिगरे विशेषः। ओथा मो दैवोमिति व्यत्यासेन। शेषं यथा प्रकृति। "अग्न इन्द्रश्च दाशुषो दुरोण" इति याज्यानवानम्(?)। अनुवषट्कारश्च। द्विर्वा-गोजः। अथाहृतमुक्थ पात्रमध्वर्युणा भक्षयत्यध्वर्योरुपहव-मिष्ट्वा भक्षयति ॥

Colophon: (sheet No. 36)

आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका।
कृता त्रैविद्यवृद्धेन तालवृन्तनिवासिना ॥
समाप्तानि चातुर्मास्यानि ॥

Subject: Āśvalāyanaśrautaprayogavṛtti. 1—5 Adhyāyas.

This Ms. contains the following:

Serial No.	Subject	Sheets	Serial No.	Subject	Sheets
1	दर्शपूर्णमासौ	1	m	वर्षकाम्येष्टिः (कारीरेष्टिः)	24
2	आधानम्	8	n	तुरायणम्	24
3	अग्निहोत्रम	11	o	दाक्षायणम्	25
4	प्रवासहोमः	14	p	द्यावापृथिव्ययनम	,,

Serial No.	Subject	Sheets
5	पिण्डपितृयज्ञः	16
6	अन्वारम्भणीयम्	17
7	उत्सर्गेष्टिः	18
8	पुनराधेयम्	18
9	आग्रयणम्	20
10	काम्येष्टयः	,,
a	आयुष्कामेष्टयः	,,
b	स्वस्त्ययनेष्टिः	21
c	पुत्रकामेष्टिः	,,
d	उत्तरेष्टिः	,,
e	वित्तकामेष्टिः	,,
f	उत्तरालोकेष्टिः	,,
g	उत्तरामित्रवन्देष्टिः	,,
h	स्नुषाश्वशुरीयेष्टिः	22
i	भेदकामेष्टिः	,,
j	सम्पत्तिकामेष्टिः	,,
k	ज्ञात्र्वभिभूयमानेष्टिः	,,
l	पवित्रेष्टिः	28
q	यज्ञविभ्रष्टेष्टिः	26
r	सोमतनेष्टिः	,,
s	हिरण्यनाशेष्टिः	,,
t	अभ्युदयेष्टिः	,,
11	चातुर्मास्यम्	26
12	वैश्वदेवः	,,
13	पशुबन्धः	36
14	पश्वेकादशिनी	41
15	सौत्रामणी	44
16	हविर्यज्ञप्रायचित्तम् (विष्यपराधप्रायश्चित्तम)	46
a	हविर्विषयप्रायश्चित्तम्	,,
b	अग्निहोत्रकालातिक्रमप्रायश्चित्तम्	52
c	कर्तृविषयप्रायश्चित्तम	53
d	अग्निविच्छेदप्रायश्चित्तम	,,
e	विपर्यासप्रायश्चित्तम	
17	अग्निष्टोमप्रयोगः	59

Remarks :—The Ms. is in very good condition. This Ms. abruptly ends in the middle of the Agniṣṭomaprayoga (5th Adhyāya). The name of the author of this work as given on the side margin of this Ms. is Viṣṇugūḍha which might have misled Dr. Burnell to ascribe it wholly to one Viṣṇu or Viṣṇuugūḍha

bhaṭṭa. Evidently Viṣṇugūḍhabhaṭṭa is the author of the Uttaraṣaṭkaprayoga. See No. 2578.

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

2576. ĀŚVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 9110 c. Substance—Palm Leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—11 (40—50). Lines—8 to a page. Script—Telugu. No. of Granthas—300. Author—Tālavṛntanivāsin. Śrautaprāyaścitta only.

Beginning:

अथ हविर्यज्ञप्रायश्चित्तान्युच्यन्ते ।

विष्यपराधे प्रायश्चित्तिरित्यादिनोक्तानि विहितपदार्थनामन्यथाकरणे प्रायश्चित्तम्। शिष्टाभावे प्रतिनिधिः श्रुतद्रव्यापचारे प्रतिनिधिना कर्तव्यं सदृशेनाप्रतिषिद्धेन। अन्याभावे पशुप्रसवेन दध्ना पयसा वा तैलादिना उक्ताः शर्करा इत्यत्र । एवं सिद्धान्तिनो मतिः। अन्वाहिताग्नेः प्रयाणोपपत्तौ अस्मिन् देशे वसनाशक्त्या पृथक् स तेषु भाण्डेषु समोप्य पुरुषाः प्रत्यक्षमेव हरेयुः। अथवा "तुभ्यं ता आङ्गिरस्तम" इत्येतयर्चा आहवनीये चतसृन् पात्रमाज्यं प्रत्यगुदग्देशे स्थित्वा हुत्वा पृथगरणीषु आरण्यौ पृथग्वा सकृद्वा "अयं ते योनिर्ऋत्वियः" इत्येतयर्चा समारोपयते ॥

End:

अग्निहोत्रहोमद्वययोरन्तराळे आहवनीयानुगतौ हि-

रण्यं प्रतिनिधिमुपादाय तद्धिरण्यमाहवनीयाय तस्मिन्नि-
धाय तस्मिन् हिरण्यमुत्तरमाहुतिं जुहुयात् वाचनिकोऽयं
प्रतिनिधिः ॥ देशान्तर उक्तं प्रायश्चित्तमुच्यते । अग्नि-
होत्रहोमे "मनो ज्योतिः" इत्याहवनीये जुहुयात् प्रतिहोमं
कुर्यात् ॥

Colophon :

प्रायश्चित्तानि समाप्तानि ॥

आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका ।
कृता त्रैविद्यवृद्धेन तालवृन्तनिवासिना ॥

Subject :

.. ...प्रायश्चित्तानि	Leaf	No.	42
साम्नाय्यदोषप्रायश्चित्तानि	,,	,,	,,
सान्नाय्यहविष्यन्दनप्रायश्चित्तम्	,,	,,	,,
सायंदोषदुष्टप्रायश्चित्तम्	,,	,,	,,
प्रातर्दोषदुष्टप्रायश्चित्तम्	,,	,,	,,
वत्सपानदुष्टप्रायश्चित्तम्	,,	,,	,,
स्थालीस्नात्रे गोरुपवेशने प्रा०	,,	,,	,,
गोर्वाश्वेतशोणितदोहे प्रा०	,,	,,	,,
स्कन्नसेकयोः प्रा०	,,	,,	43
पर्यस्कन्ने प्रा०	,,	,,	,,
अप्रहाणाग्निहोत्रशब्दे प्रा०	,,	,,	,,
अग्निहोत्रविष्यन्दने प्रा०	,,	,,	43
केशाहिसंसर्गे प्रा०	,,	,,	,,
उत्तराहुतिस्कन्ने प्रा०	,,	,,	,,

सायङ्कालातिक्रमप्रायश्चित्तम्	Leaf	No.	44
अश्रुपाते प्रा०	,,	,,	45
सायङ्कालाप्रणयने प्रा०	,,	,,	,,
प्रातरप्रणयने प्रा०	,,	,,	,,
गार्हपत्यानुगमप्रायश्चित्तम्	,,	,,	,,
प्रणयनानन्तरमाहवनीयानुगमनप्रायश्चित्तम्	,,	,,	46
समारूढप्रवणनाशे प्रा०	,,	,,	,,
युगपदनुगमने प्रा०	,,	,,	,,
समारूढारणीनाशे प्रा०	,,	,,	47
ग्रहदाहे प्रा०	,,	,,	,,
अग्निसंसर्गे प्रा०	,,	,,	,,
गार्हपत्याहवनीययोरविवेके प्रा०	,,	,,	,,
मृतिशब्दे प्रा०			
यवजनने प्रा०			
अमावास्यानागतपरीष्टिप्रारम्भे प्रा०	,,	,,	48
पूर्णाहुतिः			
अग्नेरन्यत्राहुतिहवने प्रा०	,,	,,	,,
विपर्यासप्रायश्चित्तम्	,,	,,	,,
आवहनविस्मृतौ प्रा०	,,	,,	,,
कृत्स्नदग्धे प्रा०	,,	,,	,,
आवाहनात्प्राक्हविर्दोषे प्रा०	,,	,,	,,
आवाहनानन्तरं हविर्दोषेप्रा०	,,	,,	,,
........भेदे प्रा०	,,	,,	,,

Remarks: —The Ms. is in good condition. For the other works contained herein see the list under Remarks on No. 2099.

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

2577. ĀŚVALAYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 4059. **Page** 27. Right column. **Substance**—Paper. Size—10⅝ × 5¼ **inches.** Sheets—2. Lines—16 or 17 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Tālavṛntanivāsin. Śrautaprāyaścitta—a fragment only.

Beginning:

... इन्द्रवृत्रघ्नानन्तरं यद्वाग्वदन्तीति षट्सूक्तोक्ता वाग्देवत्याः पशुरस्ति काण्डे तैत्तिरीये । ❀ ❀ अवीवृधतेति एतानि पदानि देवतावाचीन्युपांशु प्रयोक्तव्यानि ॥ इति पशुतन्त्रं समाप्तम् ॥ सौत्रामण्याः कर्म । तत्राश्विनसारस्वतैन्द्राः पशवः बार्हस्पत्यो वा विकल्पेन । तेषां पाश्विष्ट्यादि संस्थाजपान्तम् ॥

End:

"मित्रावरुणयोः प्रिया धामान्ययाड्देवानाम्" इत्यादि "मित्रावरुणाविदं हविरजुषेतां देवा आज्यपाः" इत्यादि शंयुवाकान्ते वाजिनचर्या । शन्नो भवन्तु । वाजे वाजे । वाजिनस्याग्नेवीहीत्यनुवषट्कारः ॥ समाप्ता सौत्रामणी पयस्या च ॥ अथ हविर्यज्ञप्रायश्चित्तान्युच्यन्ते । विध्यपराधे प्रायश्चित्तिरित्यादिनोक्तानि । विहितपदार्थानाम-

करणेन्यथाकरणेचानन्तरंप्रायश्चित्तम् । शिष्टाभावे प्रति-
निधिः श्रुतिद्रव्यापचारे प्रतिनिधिना कर्तव्यं सुसदृशेन प्र-
तिषिद्धेन आज्याभावे पशुप्रभवे ...

Colophon:

समाप्ता सौत्रामणी पयस्या च ॥

Subject: Āśvalāyanaśrautaprayogavṛtti based on 8—10 Khaṇḍas of the third Adhyāya of the **Āśvalāyana-śrautasūtras.**

Remarks:—The Ms. is in good condition.

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

2578. ĀŚVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No. 254. Substance—Paper. Size—10×4¾ inches. Sheets—118 (25 to 30 107 and 108 are missing). Lines—10 to a Page. Script—Devanāgarī. No. of **Granthas**—2675. Author—Viṣṇu (gūḍha) bhaṭṭa. Uttaraṣaṭka only.

Beginning:

श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्तिगुरवे नमः ॥

शुक्लाम्बरधरं विष्णुं + उपशान्तये ॥

श्रीगुरुभ्यो नमः ॥

आश्वलायनसूत्रस्योपरितनषट्कस्य देवस्वाम्यादि-
व्याख्याकारानुसारेण प्रयोग उच्यते। सत्राणामुक्तदीक्षोप-
सदइत्यारभ्य दीक्षोपसद उक्ताः । पूर्वमेव सत्राणां सामा-
न्येन अस्मिन्नुक्ता इत्यनुवादो गवामयनार्थम् । प्रथमं

गवामयनमुच्यते । प्रायणीयोऽतिरात्रः प्रथममहः पूर्वषट्के विस्तरेणोक्तमुदयनीयोऽप्येषः । एवं कथं गम्यते । अथमेकैकाहोऽतिरात्रइत्यारभ्यादौ प्रायणीय एषोऽन्त्य उदयनीय इति वचनात् । महाव्रतं तु 'महाव्रतस्य पञ्चविंशतिम' इत्यारभ्य आरण्यकैस्त्रिभिरध्यायैरुपादिष्टम् ॥ इतराण्यहानि सप्तमाष्टमाभ्यामुक्तानि । एवं सर्वेषामह्नां क्लृप्तिः ॥

End:

सर्वतोमुखेऽनेकधर्मविधानात् कामेऽप्यैकादशिनी प्राप्तेतीच्छन्ति । आग्नेयैन्द्रौ सविता च यथासंस्थं केचित्कापेयाः सर्वा आलब्धव्याः । तदा याज्यानुवाक्याः पशुप्रकरणे द्रष्टव्याः । केचिदाश्वलायनक्रतुपश्चव एवेच्छान्ति । सर्वतोमुखः समाप्तः सर्वतो मुखः ।

Colophon:

इति श्रीआश्वलायनसूत्रप्रयोगवृत्त्यां विष्णुभट्टकृतायां सर्वतोमुख समाप्तः ॥ हरिः ॐ ॥ शुभमस्तु ॥ नमः शौनकाय नमः शौनकाय ॥ ॐ सरस्वत्यै नमः ॥ श्रीदक्षिणामूर्तिगुरवे नमः ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

(Sheet 76) इति देवस्वामिप्रसादकृतौ विष्णुगूढभट्टोपाध्यायगूढविरचिते आश्वलायनप्रयोगबन्धौ आरण्यके प्रथमोऽध्यायः ॥

Subject: Āśvalāyanaśrautasūtraprayogavṛtti, based on 7-12 Adhyāyas of Āśvalāyanaśrautasūtras. This Ms. contains the following important sections—

		Sheets			Sheets
1	गवामयनम्	1	7	ऋहकृच्छः	36 to 42
2	चतुर्विंशमहः	4	8	अभिजित्	47
3	अभिप्लवषळहः	7	9	विश्वजित्	54
4	पृष्ठ्यषळहः	15	10	दशरात्रम्	71
5	महाबालभित्	33	11	महाव्रतम्	71
6	पञ्चः	33 to 36	12	एकादशाहीनम्	100
			13	सर्वतोमुखम्	(?) to 118

Remarks :—The Ms. is in good condition. According to the two colophons given above, the authorship of this commentary on the Uttaraṣaṭka is attributed to one Viṣṇugūḍhabhaṭṭācārya, perhaps a disciple of Devasvāmin, the famous commentator of Āśvalāyanaśrautasūtras. On the first and last pages of this Ms. the following is given— " आश्वलायनसूत्रं विष्णुगूढं (ढीयं) उत्तरषट्कं, गङ्गाधरनायकस्येदं पुस्तकम " i. e. the Ms. belonged originally to one Gaṅgādhara Nāyaka.

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

2579. ĀŚVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 9132. Page 14. Left column. Substance—Palm Leaf. Size —16½ × 1½ inches. Leaves—153. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas – 5150. Authors—Tālavṛntanivāsin and Viṣṇugūḍhabhaṭṭa. Complete.

Beginning:— Same as No. 2574.

End—Same as No. 2578.

Colophon:—(Leaf No. 64)

एकत्रिक: समाप्ता (प्त:) हरि: ॐ ॥ शुभमस्तु ॥

गुरुभ्यो नम: ॥ शिवाय परमगुरवे नम: ॥

आश्वलायनम् । आण्डपिळ्ळै । ரங்கநாதபுரத்திலிருக்கும் சேஷா

வதாநி स्वहस्तलिखितम् ॥ श्री कृष्णो रक्षतु । शुभमस्तु ॥

Subject: Same as Nos. 2574 & 2578.

Remarks:—The Ms. is in decaying condition. Dr. Burnell observes that this Ms. might have been written about 1650 A. D. The scribe of this Ms. is one Śeṣāvadhānin of Raṅganāthapura.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2580. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

J. L. Collection No. 255. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—181. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4400. Author—Tālavṛntanivasin. First nine Praśnas.

Beginning:

॥ श्रीमहागुरुभ्यो नमः ॥

गङ्गाप्रवाहपरिपूतजटाकलाप-

क्रीडत्फणीन्द्रचकितेन्दुमणिप्रभाभिः ।

प्रज्वालितस्फुरिततक्षकहारबन्ध-

प्रच्छन्नकालविषकण्ठहरं नमामि ॥

आपस्तम्बीयसूत्रस्य धूर्तस्वामिव्याख्यानुसारेण शास्त्रा-

न्तरसिद्धानपेक्षितानविरुद्धानप्युपसंहृत्य दर्शपूर्णमासा- वारभ्याग्निचयनपर्यन्तानां कर्मणां प्रयोगवृत्तिः क्रियते। सोमान्तानित्यान्य फलार्थिनापि कर्तव्यानि "नैयमिकं ह्येतदृणसंस्तुतम्" इति वसिष्ठवचनात् सर्वाङ्गोपसंहारे असमर्थस्यापि कर्तव्यानि अनधीतस्यापि साधोः कर्तव्यानि दर्शपूर्णमाससत्रादौ कालविशेषगोर्वाचिनौ तयोः कालविशेषयोराग्नेयादयः क्रियते लक्षणया कर्मणि प्रवृत्तिः "काले मुख्यः कर्मणि लक्षणा" इति सूत्रकाराणां मतम्। मीमांसकानां विपर्यासेन यस्मिन्नहनि मध्यन्दिनात्पूर्वं पौर्णमासी समा वा तदा पूर्वेद्युरुपक्रमः सद्यो वा एवं सत्यमावास्या चेन्मध्यंदिनात्पूर्वं समाप्यते समा वा तदा पूर्वेद्युरेव यदा तु मध्यंदिनात्परतस्तदा तस्मिन्नेवाहन्युपक्रमः उत्तरेद्युरिष्या ॥

End:

सर्वप्रायश्चित्ते कृते पश्चात्राम्रियतेः भूर्भुवः सुवरित्याहवनीयः स्वतन्त्रेषु सर्वप्रायश्चित्तं जैमिनीनां ब्राह्मण उक्तम्।

एषात्रैविद्यवृद्धेन तालवृन्तनिवासिना।
सोमपेन कृतावृत्तिः प्रयोगस्य प्रदीपिका॥

तत्र श्लोकः।

उदुत्तुतिष्ठ इत्यादौ द्विबहुष्वेव नोह्यतेः।
उच्छागतिष्ट इत्यादौ द्विबहुष्वेव नोह्यते॥

* * *

मन्त्रेण गर्भष्टोपं च भस्मनोपसमूह्य च।
एतं युवानमंत्रेण वानस्पत्यादिपाशुकम्॥

यूपे विरूढे प्राप्ते च यस्मिन्यस्य पशोः क्रियाः ।
तत्र त्वाष्ट्र उपालभ्यो गणेनात्र यथाविधि ॥

Colophon:

समाप्तं प्रायश्चित्तम् ॥ शुभमस्तु ॥
देवळे रामस्येदं पुस्तकम् ॥

Subject: Āpastambaśrautaprayogadīpikā, a popular Śrautaprayoga treatise based on the 1—9 Praśnas of the Āpastambaśrautasūtras of the Black yajur-Veda.

Remarks:—The Ms. is in a fairly good condition. The Ms. originally belonged to Devale Rāma.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2581. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9163. Page 18. Left column. Substance—Palm Leaf. Size—16 × 1½ inches. Leaves—214 (1-214). Lines—9 to a Page. Script—Grantha. No. of Granthas—8500. Author—Tālavṛntanivāsin. First fifteen Praśnas—Incomplete.

Beginning—Same as No. 2580.

End:

(मरुतश्च मन्त्राः सा)मानि च अस्य नित्यो होमः । एवं हुत्वा यथेष्टगमनम् । अभिचरतो दशहो(?)ग्नीध्रीये आहिताग्निरसोमयाजीयः (परं सोमेन वा यजेत ।) तस्य नैमित्तिकं परिभक्षकर्म स सोमयाजिनोऽत्रापि याजयितुर्नैमित्तिकमिति शाण्डिल्यमतिः । यज्ञं समाप्य परिभक्षं

क(र्म करिष्य इति सङ्कल्प्य । अग्नी)न्विहृत्यापां पुष्पमि-
ति जुहोति त्रिभिर्मन्त्रैः । अग्निरिन्द्रो विश्वेदेवा देवता ।
हुत्वा हुत्वाज्यशेषमन्यत्र निनयति (वयं सोमव्रते तवेति
भक्षयन्ति शेषम् । अन्यमाज्यमानीय दक्षिणाग्नौ प्रतिमन्त्रं
जुहोति ॥)

Colophon:—(Leaf 65).

चातुर्मास्यहौत्रं समाप्तम् ॥

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

ரங்கநாயவாராத்ரிவிர க்கா வெங்கிடராயரு வாத்ரு
ஶேஷரு ஸ்வஹஸ்தலிகிதம்.

Subject: Āpastambaśrautasūtraprayogadīpikā based on the 1—15 Praśnas of the Āpastambaśrautasūtras of the Black Yajur-Veda.

Remarks: —The Ms. is in a decaying condition. Many leaves in the beginning are eaten away by rats. The scribe is one Śeṣa, son of Veṅkaṭarāya of Raṅganāthapura. At the begining of this Ms. there are nearly 20 fully damaged leaves which contain extracts from Bodhāyana Aptoryāma, Cāturmāsya and Paśubandha prayogas.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2582. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9136. Page 18. Left column. **Substance**—Palm leaf. Size—$15\frac{7}{8} \times 1\frac{1}{4}$ **inches**. Leaves—81 (83—163). **Lines**—7 or 8 to a **Page**. Script—Grantha. No.

of Granthas—2200. Author—Tālavṛntanivāsin. Third fourth, fifth and sixth Praśnas Incomplete.

Beginning:

तस्यामेवरात्र्यां सौरीष्ट्या यक्ष्ये समानानां प्रतिष्ठास्यामिति सङ्कल्पः । वि + पौर्णः । सौर्यञ्चरुराग्नेयविकारः । सूर्याय नक्षत्रेभ्यो जुष्टम् । सूर्यनक्षत्र हव्यं रक्षस्व । मन्त्रेणाभिघारणम् । रात्रौ हविरासादनं कृत्वोदितेसूर्ये आचर्य, सूर्याय नक्षत्रेभ्योऽनुब्रूहि सूर्यं नक्षत्राणि यज । "उदुत्यम्, चित्रम्" इति याज्यानुवाक्ये । सूर्यनक्षत्राणामहमन्नादः । सूर्याय स्वाहेति त्रय उपहोमाः । सूर्योनक्षत्राणीदं हविरजुषेत्यादि सन्तिष्ठते । आदित्येष्ट्या यक्ष्ये भूम्यां प्रतिष्ठां विदेयामिति । वि + पौर्णः + न्त्रं आग्नेयविकारः आदित्यैः जुष्टम् । अदिते हव्यम् + म + णं अमावास्यतन्त्रममावास्यन्तन्त्रमिति तत्र तत्रोक्तम् । नक्षत्रहविषामाग्नेयविकारोऽयमैन्द्राग्नविकारोऽयमिति च तत्र तत्रोक्तम् । तेषां तन्त्राणामितिकर्तव्यताश्चोक्ताः । यथामति तत्सर्वं तत्रानुसन्धातव्यम् ॥

नक्षत्रेष्टिषु वक्तव्यं कर्तव्यञ्च विशेषतः ।
तत्रैकादश एवोक्तो मन्दबुद्धिमतां यथा ॥

मोहादज्ञानतो वापि यन्मया किञ्चिदीरितम् ।
शुचिं वीक्ष्यानुगृह्णन्तु सन्तस्तां वीतमत्सराः ॥

(नक्षत्रेष्टिं) प्राह बोधायनस्त-
तन्त्रं चापस्तम्बसूत्रोक्तमार्गे ।
प्राहाल्पानां बोध[ाय]नायप्रयोगं
भारद्वाजः केशवः सोमयाजी ॥

Colophon :

नक्षत्रेष्टिप्रयोगः ॥

Subject : Prayogasāra—Nakṣatreṣṭiprayoga only.

Remarks :—The Ms. is in a decaying condition. For the other works contained herein see Remarks under No. 2057.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2612. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 3695. Page 24. Left column. Substance—Paper. Size—10 × 5⅝ inches. Sheets—105. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Mahādevavājapeyayājin. Darśapūrṇamāsa only.

Beginning :

श्रीगणेशाय नमः ॥

श्रीसरस्वत्यै नमः ॥

ॐ ॥ इष्टेर्वृष्टिरुदेति वृष्ट्युपचयादन्नानि तेभ्यः प्रजा-
स्ताभ्यो यज्ञसमुद्भवः पुनरिति प्रक्रान्तचक्रक्रमः ।
अत्रामुत्र समीहितार्थघटनाबद्धव्रतो यो जग-
ज्जन्मस्थेमलयोत्सवः स दिशतु श्रेयांसि यज्ञेश्वरः ॥

वेदोदधेर्विनिर्माय योधात्कल्पाभिधां सुधाम् ।
विबुधेभ्यो नमस्तस्मै बोधायनमहात्मने ॥

बोधायनाय मुनये मुनिसङ्घाहृताङ्घ्रये ।
कर्माम्बुधितितीर्षूणां कल्पनौकाकृते नमः ॥

अस्ति बोधायनं सूत्रमाद्यमाध्वर्यवाश्रितम् ।
अधीतिबोधाचरणप्रचारैस्त(त्प्रवक्ष्ययन)....॥

भारद्वाजान्वयाम्भोधिसुधांशुस्सत्सुसंमतः ।
त्रियम्बकाध्वरी लोके त्रय्यन्तज्ञस्समेधते ॥

तदध्वर्युर्महादेववाजपेयी तदाज्ञया ।
बोधायनोक्तकर्मान्तद्वैधकल्पानुसारतः ॥

वैतानिकानां संस्थानां भवस्वामिमतानुगाम् ।
कर्माध्वगानां सुगमां करोति श्रौतचन्द्रिकाम् ॥

"ब्राह्मणानां बहुत्वादेकैकस्यां शाखायामसमाप्तत्वादर्थस्य च दुर्बोधत्वादसार्वजन्यत्वाच्चोपसंहृत्य विवरणार्थं सुखं बुध्वा कर्माण्यनुष्ठा(ष्ठी)य फलं सर्वे प्राप्नुयुः" इति परमकारुणिकेनाचार्येण भगवता बोधायनेन कल्प आरब्धः ॥

जायामवाप्य दशमेऽहन्यादधीत । जातपुत्रः कृष्णकेशोऽग्नीनादधीत । विद्यां समाप्य दारं कृत्वाग्नीनाधाय कर्माण्यारभते सामावराध्यानि यानि श्रूयन्ते—

"धर्मेणाधिगतो येषां वेदः सपरिबृंहणः ।
लब्धपुण्यधनाढ्यानामग्न्याधेयमिहोच्यते ॥"

इत्यादिवचनाद्गर्भाधानादिसंस्कारैस्संस्कृतोऽधीत्य वेदं न्यायतः कृतदार आहिताग्निर्न्यायार्जितधनश्च वैतानिकेषु कर्मस्वधिक्रियते । तानि च कर्माणि—अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि दाक्षायणयज्ञः कौण्ड-

पाथिन्यः सौत्रामणिमुद्दैके ब्रुवते इति सप्तहविर्यज्ञसंस्थाः ॥

* * * *

(Sheet No. 14).

'विसंस्थिते संस्थिते च सञ्चर' इत्यादि। विसंस्थितेऽसमाप्ते कर्मणि सञ्चरः प्रवेशो निर्गमश्च संस्थिते समाप्ते कर्मणि पश्चादित्यर्थः। आग्न्याधेयिके विहार इदं विधानमितरत्र "तस्माद्यज्ञवास्तुनाभ्यवेत्यम्" इति निषेधात्। अहोरात्रावित्येकं यावदग्नयश्शीतास्युरित्येकं यावदेनदाभिवर्षेत्येतदपरमिति ॥

॥ इत्युपोद्घातः ॥

ॐ "आमावास्येन पौर्णमासेन वा हविषा यज्य(क्ष्य)माणो भवति। स पुरस्तादेव हविरातञ्चन उपकल्पयत एकाहेन वा द्व्यहेन वा यथर्त्वेथ वै ब्राह्मणं भवति। दध्नातनक्ति सेन्द्रत्वायाग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य सन्तत्या" इति—

अथेत्यधिकाराकरणं तयोरेवारम्भात् पौर्णमास्यादित्वेऽप्यमावास्यायाः प्रथमं ग्रहणं मन्त्रक्रमात्। दाक्षायणयज्ञादौ शाखाहरणाद्यारम्भस्य पौर्णमास्यामप्युपक्रारात्, अ(आ)मावास्येन पौर्णमासेनेत्यत्र तद्धितश्च कालप्रकृतेः "तस्येदम्" इति भवार्थे वा विध्यपेक्षः। वा शब्दः समुच्चयार्थः।

* * *

(Sheet No. 20)

अथ प्रयोगक्रमः ॥

'आमावास्येन पौर्णमास्येन वा + सन्तत्या इति ।'
हविरातञ्चनं दधि तस्य ग्रहणम् । पुरोडाशीयादीनां प्रदर्शनार्थं ग्रीष्मे एकाहेन हेमन्ते द्व्यहेनेति व्यवस्थितो विकल्पः दधिभावायेति भावः। सोऽयमाहिताग्निरुपवसथीयेऽहन् अ(न्य)मावास्यायां पौर्णमास्याञ्च पुरा प्रातरग्निहोत्रात्पिऽखा(का)नुपसादयेत् ।

End:

अथ यज्ञस्य पुनरालम्भं जपति "यज्ञो बभूव स आबभूव। स प्रजज्ञे सवावृधे । स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन्करोतु वयꣳ स्यामपतयोरयीणाम्" इति सूत्रं बोधायनस्य । आवहनीयमवैतेन यजुषोपतिष्ठेतेति शालीकिः। अथप्राङुत्क्रम्य जपति "गोमाꣳ अग्नेविमाꣳ अश्वी यज्ञोनृवत्सखासदमिदः प्रमृष्यः। इडावाꣳ एषो असुरप्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान्"। आत्मानं सम्प्रेषति ।

दशौदनाः स्युरिष्टीनां पशूनां शतमोदनाः ।
सहस्रमोदनाः सोम इत्याहुर्ब्रह्मतर्पणम् ॥

"ब्राह्मणाꣳ स्तर्पयत वै" इति सम्प्रेष्य, ऋत्विग्भ्योऽन्यानधि ब्राह्मणान् यथासम्भवं भोजयेत् ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभपूर्वोत्तरमीमांसाद्वयपारावारपारीणश्रीत्र्यम्बकरायाध्वरीन्द्रानुमताध्वर्युमहादेववाजपेययाजी(जि)विरचितायां श्रीबोधायनसूत्रश्रौतप्रयोगवृत्तौ दर्शपूर्णमासपद्धतिः ॥

Subject: Bodhāyanaśrautasūtraprayogavṛtti otherwise known

as Sūtrakramapaddhati based on the first Praśna (Darśapūrṇamāsa) of the Bodhāyanasūtras of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition. After the colophon the following is given

'प्रदक्षिणनमस्कारानुपचारान् अग्ने नयेत्यादि, सकृत्ते नम इत्यादि अग्ने नय पञ्चर्चः, प्रवःशुक्राय० अच्छागिरोमत० प्रकारवो० प्रमादात्० प्रायश्चित्ता० नमस्ते गार्हपत्याय० काण्डद्वयोप० सकृत्ते नमः अनृणा अस्मि०

स्वरेण वर्णेन च यद्विहीनं तथैव हीनं क्रिययापि यच्च ।
यच्चातिरिक्तं मम तत् क्षमस्व तदस्तु चाग्ने परिपूर्णमेतत् ॥
शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ।
रिपुगर्भस्य यो गर्भः स मे विष्णुः प्रसीदतु ॥

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2613. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No 261. Substance—Paper. Size—10¼ × 4¼ inches. Sheets—54 (12-66, 26th missing). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Mahādevavājapeyin. Darśapūrṇamāsa only.

Beginning, end, colophon and subject—Same as No. 2612.

Remarks:—The Ms. is in a fairly good condition. While quoting Ṛks in their proper use, only the beginnings (pratīkas) are given in this Ms. Hence a deficiency of 800 Granthas in this Ms. Compare No. 3695.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2614. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 3696. **Page** 23. Right column. **Substance**—Paper. Size—$11\frac{1}{2} \times 4\frac{3}{8}$ **inches**. Sheets—32. Lines—7 to a **Page**. Script—Devanāgarī. No. of Granthas—500. Author—Mahādevavājapeyayājin. Darśapūrṇamāsa only—incomplete.

Beginning:

श्रीलक्ष्मीनृसिंहाय परमगुरवे परदेवतायै नमः ॥ श्रीः । शुभमस्तु ॥

वेदोदधेर्विनिर्माय येनक(धाᐟक)ल्पाभिधां सुधाम् ।
विबुधेभ्यो नमस्तस्मै बोधायनमहात्मने ॥

बोधायनाय मुनये मुनिसङ्घादृताङ्घ्रये ।
कर्माम्बुधितितीर्षूणां कल्पनौकाकृते नमः ॥

अस्ति बौधायनं सूत्रमाद्यमाध्वर्यवाश्रि(तम्) ।
अधीतबोधाचरणप्रचारैस्तत्प्रपश्चयन् ॥

भरद्वाजान्वयाम्भोधिसुधांशुः सत्सु सम्मतः ।
नरसिंह्माध्वरी लोके विम्बकः (त्र्यन्तज्ञः) समेधते ॥

तदध्वर्युमहादेववाजपेयी तदाज्ञया ।
बोधायनोक्तकर्मान्तद्वैधकल्पानुसारतः ॥

वैतानिकानां संस्थानां भवस्वामिमतानुगाम् ।
कर्माध्वनीनसुगमां करोति क्रमपद्धतिम् ॥

आगर्भाधानादिसंस्कारैः संस्कृतोऽधीत्य वेदं न्यायतः कृतदार आहिताग्निर्वैतानिकेषु कर्मस्वधिक्रियते । तानि

च कर्माणि अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि दाक्षायणयज्ञः कौण्डपायिन्यः सौत्रामणि मुहैके ब्रुवत इति सप्तहविर्यज्ञ(सं)स्थाः०

आहवनीयागारे यजमानः शेते । ....पौर्णमास्या सद्यो यजध्वे अनवधानादि न किं यजनीय...प्रहन्मे भवति ।

अचा(न्वा)धानादि दर्शे चेदुपरोधान्नलभ्यते ।
कालस्य गुणभूतत्वात्तत्स्कान्त्यपि दार्शिकी ॥
श्वन्यात्साम्नाय्ययागेऽपि दध्यानीयाभिमन्त्राणाम् ।

....

पयस्वत्या समिद्भिश्च व्रतोपेतश्च यज्वनः ।
शाखाच्छेदनमित्येष क्रमोऽन्योवापरेऽहनि ॥

Colophon : Nil.

Subject. Bodhāyanaśrautasūtraprayogavṛtti otherwise known as Kramapaddhati based on the 1st Praśna of the Bodhāyanasūtras of Black Yajur-Veda.

Remarks :—The Ms. is in good condition. This Ms. abruptly ends in the middle of Darśapūrṇamāsaprayoga.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2615. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIH.

Burnell's Catalogue No. 3684. Page 23. Right column. Substance—Paper. Size—$11\frac{3}{8} \times 4\frac{3}{8}$ inches. Sheets—40. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Mahādevavājapeyin. Ādhāna only.

Beginning :

श्रीमहागणपतये नमः ॥

श्रीलक्ष्मीनृसिंहाय परदेवतायै श्रीगुरुभ्यो नमः ॥

नत्वा बोधायनाचार्यमग्न्याधेयस्य कर्मणः ।
महादेवो वाजपेयी करोति क्रमपद्धतिम् ॥
धर्मेणाधिगतो येषां देवस्य (वेदः स)परिबृंहणः ।
(लब्धपुण्यधनाढ्याना)मग्न्याधेयमिहोच्यते ॥

इत्याद्यधिकृतस्याग्न्याधेयकालो निरूप्यते । "जातपुत्रः कृष्णकेशी" इति वाक्यानि यानि तु तानि शक्तिपराणि ....कर्मसु जात.. ....दशमेद्वयादधीतेति दर्शनात् ॥ अथातो नक्षत्राणामेव मीमांसा कृत्तिकास्त्व(स्व)ग्निमादधीत रोहिण्यामग्निमादधीत स पुनर्वस्वोरग्निमादधीतपूर्वयोः फल्गुन्यु(न्योरु)त्तरयोः फल्गुन्योश्चित्रायामिति ॥ अथात ऋतूनामेव मीमांसा । वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्यो वर्षासु रथकार इति । अथो खलु यदैवेनं श्रद्धोपनमेदथादधीतेति ? नैवस्यर्ध्द(र्धि)रिति तदे-[द]तदार्तस्य वातिवेलं वा श्रद्धायुक्तस्याथ वै ब्राह्मणं भवति यो (रो)हिण्यामग्निमाधधत(धत्त)ऋध्नोत्येव सर्वम् रोहान् रोहतीति सा या वैशाख्याः पौर्णमास्या उपरिष्टादमावास्या भवति सा सकृत्संवत्सरस्य रोहिण्यां संपद्यते तस्यामादधीतेति ॥

End :

कथं खल्वग्न्याधेये सोम इति पूर्णाहुतिः इत्यन्तं कर्म कृत्वा शालामध्यवस्येत् दीक्षणीयामाग्नेयोऽष्टाकपालोऽनुव-

र्तेत प्रायणीयामैन्द्राग्नश्चादित्यश्च चरुरातिथ्यामग्नये पव-
मानायाष्टाकपालो॰ ग्नीषोमीयस्य पशुपुरोडाशमग्नये पा-
वकायाग्नये शुचये प्रातःसवनीयामन्वारम्भेष्टिरपि वा
सर्वाण्येवाग्न्याधेयिकानि हवींषि परिसमाप्य शालामध्य-
वस्येदुदवसानीयामन्वारम्भेष्टिरिति ॥

Colophon :

इति बोधायनाधानप्रयोगः ॥ श्रीमद्दिव्यलक्ष्मीनृसिंहार्पणमस्तु ॥

श्रीपरदेवतार्पणमस्तु ॥ श्रीः ॥

Subject: Bodhāyanaśrautasūtraprayogavṛtti, otherwise known as Kramapaddhati and also Prayogacandrikā. Ādhana only based on the 2nd Praśna of the Bodhāyana sūtras of the Black Yajur-Veda.

Remarks :—The Ms. is in a fairly good condition. This Ms. is full of scriptorial blunders.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2616. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No. 262. **Substance**—Paper. **Size**—$10\frac{1}{2}\times4\frac{1}{4}$ inches. Sheets—27 (1-39, 25 to 36 are missing). Lines—9 to a Page. Script—Devanāgarī. No. of **Granthas**—Author—Mahādevavājapeyin. Ādhāna only.

Beginning, end, colophon and subject—Same as No. 2615.

Remarks:—The Ms. is in a fairly good condition.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2617. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No. 263. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{4}$ inches. Sheets—32. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—620. Author—Mahādevavājapeyayājin. Nirūḍhapaśubandha only.

Beginning :

श्रीमहागणपतये नमः ॥

श्रीमद्दिव्यलक्ष्मीनृसिंहाय परमगुरवे ललिताम्बायै नमः ॥

श्रीरस्तु ॥

बोधायनमुनीन्द्रोक्तकल्पसूत्रानुसारतः ।
पशुबन्धप्रयोगस्य क्रियते क्रमपद्धतिः ॥
प्रत्यब्दं द्विः पशुं कुर्यादादावयनयोर्द्वयोः ।
समनन्तरे पर्वाणि ।
दर्शेष्ट्यानन्तरं वापि शुक्लेदेवर्क्षयेव वा ।
पशुकामस्य रेवत्यां पश्विज्येति प्रचक्षते ॥
एवं पशुद्वयं कर्तुमशक्तः प्रतिवत्सरम् ।
एकं पशुं वा कुर्वीत तदा कालविधानतः ॥
उत्तरायणशुक्लादिः कालः सामान्यशास्त्रतः ।
यद्वा प्रावृषि पश्विज्या भवेत्कात्यायनाशयात् ॥

कात्यायनश्च—"पश्विज्या संवत्सरे संवत्सरे प्रावृष्यावृत्तिमुखयोर्वा" इति ॥ पशुना यक्ष्यमाणो भवति स उपकल्पयते० ॥

End:

अथैके आचार्याः । एकादशधर्मान् पशुबन्ध उत्साद-
यन्त्यग्न्यन्वाधानं व्रतोपायनं पृस्थ्यां(?) प्रणीता याज-
मानमाज्यभागौ प्राशित्रं यजमानभागब्रह्मभागौचतुर्धाक-
रणविष्णुक्रमानिति । यजमानोत्सादनपक्षेऽपि व्रतोपा-
यनव्रतविसर्जन यज्ञस्य पुनरालम्भ इति भवन्ति । आज्या-
वकाशमुद्दैके ब्रुवते ॥

Colophon:

श्रीमद्भारद्वाजकुलजलधिकौस्तुभपूर्वोत्तरमीमांसाद्वयपारावारपारीणश्रीम-
त्र्यम्बकरायाध्वरीन्द्रानुमताध्वर्युमहादेववाजपेययाजिविरचितायां
बोधायनसूत्रप्रयोगवृत्तौ निरूढपशुबन्धक्रमपद्धतिः स-
माप्ता ॥ श्रीदिव्यलक्ष्मीनृसिंहार्पणमस्तु ॥ श्रीपरदेवतार्पणमस्तु ॥
श्रीलक्ष्मीनृसिंहाय नमः ॥

Subject: Bodhāyanaśrautaprayogavṛtti otherwise known as Kramapaddhati giving the Paśubandhaprayoga according to the Bodhāyana school of the Black Yajur-Veda.

Remarks:—The Ms. is in a fairly good condition. After the colophon the following is given:—

मूलप्रदेशेऽरत्निमात्रमपरं त्यक्त्वा शिष्टमष्टाश्रिं चतुराश्रिं वा तक्षेत् + वे-
द्युत्तरां सशङ्कुमारभ्य प्रत्यक् पदद्वयं त्रयं वा नीत्वा ततः शङ्कुं निह-
न्यात । शम्यामात्रश्चत्वारः तथैव पदचतुष्टयं नीत्वोदगेकं नी-
त्वा शङ्कुं णि० स उत्करः एवं वेदिः ॥

॥ बोधायनश्रौतक्रमपद्धतिः ॥

2618. BODHĀYANAŚRAUTAKRAMA-PADDHATIḤ.

Burnell's Catalogue No. 3725. Page 25. Left column.
Substance—Paper. Size—11¾ × 4⅝ inches. Sheets—193.
Lines—7 or 8 to a Page. Script—Devanāgarī. No. of
Granthas—3500. Author—Mahādevavājapeyayājin(?)
Agniṣṭoma only.

Beginning:

श्रीगणेशाय नमः ॥

श्रीमद्दिव्यलक्ष्मीनृसिंह्माय नमः । श्रीगुरुभ्यो नमः ॥

बोधायनीयकल्पोक्तत्रयीमार्गानुसारिणीम् ।
अग्निष्टोमक्रतोरेषा क्रियते क्रमपद्धतिः ॥

अग्निष्टोमेन यक्ष्यमाणो भवति । स उपकल्पयते कृष्णाजिनञ्च कृष्णविषाणञ्च वासश्च मेखलाञ्च सैषा पृथ्वी वेणी कार्या भवति त्रिवृदेकतः पाशाद्वा विंशतिञ्च दर्भपुञ्जीलानि नवनीतं चाञ्जनञ्च सतूलाञ्च शरेषीकौमादुम्बरं दण्डञ्चमसञ्च व्रतप्रदानं स्थालीं सश्रिक्यां समेक्षणामेतानि त्रयोदश यजमानस्तावन्त्येव पत्नीमभितो भवन्ति कुंबं च कुरीरञ्च वासश्च योक्त्रञ्च शङ्कुं चापरिमितानि दर्भपुञ्जीलानि नवनीतं चाञ्जनं च सतूला च शरेषीका मृन्मयपात्रः शङ्कुश्च स्थाली सश्रिक्या समेक्षणा ।

अत्र कारिकाः—

कृष्णाजिनादिसंभारान्पूर्वमेवोपकल्पयेत् ।
कृष्णाजिनानि पञ्च स्युरेकं सर्वाङ्गसंयुतम् ॥

सर्वाङ्गसंयुतं यष्टुरन्यत्सोमप्रवर्ग्ययोः ।
विषाणास्त्रिवलिः पञ्च बलिर्वा परिकीर्तिता ॥

मधुपर्कार्थवस्त्राणां द्वाषष्टिः परमावधि ।
कांस्यानि सपिधानानि कुण्डलानां युगानि च ॥

* * *

प्राशस्त्येन च लभ्यन्ते सहस्रमपि दक्षिणा(ः) ।
प्रवर्ग्यार्थानि पात्राणि यथासूत्रं प्रकल्पयेत् ॥

ज्योतिष्टोम इति कर्मनामधेयम् । तस्याग्निष्टोम इति संस्थानाम । अग्निष्टोमेन स्तोत्रेण समाप्यत इति तस्य ज्योतिष्टोमस्य तिस्रः संस्था अग्निष्टोम उक्थ्योऽतिरात्र इति । चतस्रः संस्था षोडशिना सहेत्यन्ये ।

End:

अथारण्योरग्नीन्समारोह्य स्वान्यग्न्यायतनान्यध्यवसाय मथित्वा विहृत्य मनस्वत्या हुत्वा काले विहृत्य सायमग्निहोत्रं जुहोति । प्रागस्तमयादसमाप्तौ अनुद्धरणप्रायश्चित्तं न कुर्यात् । कुर्यादित्येके । होमकालस्याप्यतिपत्तौ प्रतिहोमं कुर्यान्न कालातिपत्तिप्रायश्चित्तम् । अग्निहोत्रयोः प्रतिहोम इति प्रतिजुहुयादिति बोधायनः । न प्रतिजुहुयादिति शालीकिः ।

अत्र क्रमकारिकाः—

मैत्रावरुण्यास्त्वथ मुष्टिवेदौ
कृत्वाथ पाणी च परिस्तरं च ।
स्फ्यःप्रोक्षणीपात्र जुहूपभृच्च
स्रुवध्रुवेडाध[ा]रमेक्षणानि ॥
वेदाज्यधान्यग्न(?) दोहधान्यः
पृष्ट्याभिमौदेव उदुब्जचोक्षेत् ।
प्रातस्तु दुग्ध्वा श्रपयेत्पयस्यां
विस्राव्य चाज्यं च निरूप्य रक्षः ॥

*　　*　　*　　*

अनुष्ठितावत्र न पूर्वतः स्या-
दामिक्षया साकमतोऽन्यथा वा ।
प्रत्यक्षतो वापि हरेच्च वह्नीन्
यथा पुरा निष्क्रमणे तथा वा ॥
होमातिपत्तौ प्रति होममेके
उपक्रमेताप्यहुतं पुरा चेत् ।
आरम्भणीयाप्यकृता पुरा चे-
दाधानसोमे कुरुते समाप्ते ॥

श्रीमद्दिव्यलक्ष्मीनृसिंहार्पणमस्तु । श्रीविश्वेश्वराय नमः ।
श्रीरामचन्द्राय नमः । श्रीशिवाय नमः । श्रीगणेशाय नमः ॥

Colophon : Nil.

Subject : Bodhāyanaśrautakramapaddhati giving the prayoga of the Agniṣṭoma sacrifice according to the Bodhāyana school of the Black Yajur-Veda.

Remarks : —The Ms. is in good condition.

॥ बोधायनश्रौतक्रमपद्धतिः ॥

2619. BODHĀYANAŚRAUTAKRAMA-PADDHATIḤ.

Burnell's Catalogue No. 3752. Page 25. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{8}$ inches. Sheets—20. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—350. Author—Vāsudevadīkṣita. Kāṭhakaciti only. Incomplete.

Beginning:

श्रीगणेशाय नमः ।

वासुदेवो यायजूको बोधायनमहामुनिम् ।
प्रणम्य काठकाग्नीनां तनोति क्रमपद्धतिम् ॥

सावित्रं स्वर्गकामश्चिन्वीत पशुबन्धे चेचीयते । षड्ढोतारं हुत्वा यूपाहुतिं हुत्वा यूपं सयजुषं कृत्वा वेदिं विमिमीते । वेदितृतीये यजत इति विज्ञायते । पश्वर्थमुदवसाय षड्ढोतुः पुरस्ताद्याः पुरस्तादित्यादि स्वर्गकामः सावित्रमग्निं चेष्ये इति सङ्कल्पयते । परमेश्वरप्रीत्यर्थमिति वा । व्यहकालत्वे प्रयोगः ॥

End:

दक्षिणानां काले । ब्रह्मा सदस्यासी(ना)न्वो वैश्वसृजान्व्याचष्टे । "ऋचां प्राची महती दिगुच्यते" इति । पञ्चोऽर्धर्चशः । ब्रह्मणो वेत्थ शस्त्रसाध्वर्युः प्रतिगृणाति । "ॐ ब्रह्मन् ऋतं ब्रह्मन् सत्यं ब्रह्मन् अरात्स्म ब्रह्मन्" इति । तस्योत्तमे पर्याये "अरात्स्म ब्रह्मन्सम्पद्ये" । सन्तिष्ठते वैश्वसृजः ।

Colophon:

इति वासुदेवदीक्षितकृतसावित्रादिकाठकचयनं संपूर्णम् ॥

Subject : Bodhāyanaśrautakramapaddhati giving the prayogas of the following sacrifices :

(1) सावित्रचयनम्　　(3) ब्रह्मचित्रयनम्

(2) नाचिकेतचयनम्　　(4) समस्तचयनम्

(5) वैश्वसृजचयनम्

Remarks:—The Ms. is in good condition. The Āruṇaketukaciti of of the Kāṭhakaciti is omitted in this Ms.

॥ प्रयोगरत्नम् ॥

2620. PRAYOGARATANAM.

Burnell's Catalogue No. 9167. Page 24. Left column. Substance—Palm Leaf. Size—16 × $1\frac{1}{2}$ inches. Leaves—107. Lines—8 to a Page. Script—Grantha. No. of Granthas—3600. Author—Vāsudevadīkṣita. Complete ?

Beginning :

श्रीमहागणपतये नमः ॥

धर्मायनबोधायन-

मीहध्वे यदि तद्भुवे क्रिमपि ।

बोधायनबोधायन-

माचार्यं मुहुर्मुहुर्नमत ॥

सङ्गृह्य द्वैधकर्मान्तकल्पसूत्राणि यत्नतः ।

प्रयोगरत्नं तनुते वासुदेवाध्वरीसुधीः ॥

अथ पौर्णमास्याममावास्यायाश्च हुते प्रातरग्निहोत्रे यजमानः केशश्मश्रु वापयित्वा लोमानि संहृत्य नखानि निकृन्तयीत । न वा वापयते । तीर्थे स्नात्वाहतं वासः प-

रिश्राय नवनीतेनाभ्यञ्जीत । मुखमग्रेऽनुलोमा(म)ङ्गानि । त्रैककुदनाञ्जनेनाङ्क्ते । त्रिदाक्षिणं द्विरुत्तरं निधावं एवं पत्नीवपनवर्जम् । ऋतिजश्च स्नाता अहतवाससो भवन्ति ।

End:

अथादित्यमुपतिष्ठते । देवसंस्थानसहस्रपोपस्ये श्रि- षेसनोरास्वाज्यानि रायस्पोषं सुवीर्यं संवत्सरीणां स्वस्ति- मिति । अथ यूपमुपतिष्ठते । आशासानसुवीर्यं रायस्पोषं स्वश्रियं बृहस्पतिना राया स्वगाकृतो मह्यं यजमानाय तिष्ठेति उपोषणाद्येतदन्तम् ।

* * * *

दार्शिकविहारस्य दक्षिणतो गत्वा यज्ञो बभूवेति पुन- रालम्भं जपित्वा प्राङुत्क्रम्य गोमामग्न इति जपित्वा.... ...भाजेति अपि वा पूर्णाहुत्यनन्तरं दार्शिक एव विहारे विष्णुक्रमणादि ब्राह्मण तर्पण सम्प्रैषान्तं करोति । स...

Colophon: (1) (Leaf No. 34)

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मषोडशारथचक्राकारादिबहुवि- धगुणविराजिमानमाठाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशा- हजिशरभजितुकोजिभोसलचोलमहीन्द्रेन्द्रामात्यधुरन्धरस्य श्रीमदा- नन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण बाल्य एव त- द्दयानिर्वर्तितापरिमितमहाग्निविजृम्भितवाजपेयादिप्रमुखमखसन्तर्पि- तशत(मख)प्रमुखबर्हिर्मुखेनापारपदवाक्यप्रमाणपारावारपारीणेनाग्र- जन्माविश्वेश्वरवाजपेययाजितो लब्धविध्यावैशद्येन बोधायनश्रौतच- न्द्रिकाकौशल्यप्रख्यापितसर्वपथनिप्रज्ञाविभवमहादेववाजपेययाजि - सुतेन अन्नपूर्णागर्भजातेन स्वामिशैलवास्तव्येन वासुदेवदीक्षितवि- दुषा विरचितं बोधायनीयदर्शपूर्णमासप्रयोगरत्नं सम्पूर्णम् ॥

(1) (Leaf No. 107)

इति श्रीमत्सन्ततसन्यमान + वासुदेवदीक्षितविरचितप्रयोगरत्नं

समाप्तम् ॥

Subject: Prayogaratna giving the following :—

1	दर्शपूर्णमासप्रयोगः	Leaf	1
2 a	आधानप्रयोगः	,,	34
b	अन्वारम्भणीया	,,	66
3	अग्निहोत्रप्रयोगः	,,	76
4	पशुबन्धप्रयोगः	,,	86—107

Remarks:—The Ms. is old and is in a fairly good condition.

॥ प्रयोगरत्नम् ॥

2621. PRAYOGARATNAM.

Burnell's Catalogue No. 3700. Page 24. Left column. Substance—Paper. Size—10×5 inches. Sheets—46. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—320. Author—Venkaṭeśvara Dīkṣita. Darśapūrṇamāsa only.

Beginning:

श्रीगणेशाय नमः ॥

विश्वेश्वरं नमस्कृत्य लक्ष्मीनारायणौ गुरू ।
वाणीं यज्ञेश्वराचार्यं दक्षिणामूर्तिमेव च ॥
बोधायनं भवस्वामिभाष्यकारं मुहुर्मुहुः ।
कण्ठपाठाय बालानां बोधायनमतानुगम् ॥
कर्मान्तद्वैधगृह्योक्तविशेषैः सहितं स्फुटम् ।

प्रयोगरत्नं तनुते वेङ्कटेश्वरदीक्षितः ॥

आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव हविरातञ्चन उपकल्पयत एकाहेन वा द्व्यहेन वा यथर्तुचन्द्रमसं वा निशाय सम्पूर्णं वा विज्ञाय रात्रिसन्धिमत्पर्वाणि दिवा सन्धिमत्पर्व पूर्वेद्युर्वा साया-ह्नसन्धिमद्वृद्ध(द्धि)मत्पर्वणि सोऽयमाहिताग्निरूपवसथी-येऽहन्पुरा प्रातरग्निहोत्रात्पिटकानुपसादयेदन्वाधानार्थान्। हुते प्रातरग्निहोत्रे व्रतोपायनीयपाचयीत(?)। तस्य ब्रा-ह्मणं प्रतिपाद्याश्नीयात्सर्पिर्मिश्रं दधिमिश्रमक्षारलवणं सर्वमन्नदहः (?) कौशीधान्यं वर्जयेदन्यत्र बिलेभ्यः। पत्न्या एवोच्छिष्टं दद्यान्नस्त्रियमुपेयात्स यदिकेशश्मश्रुवापयिष्य-माणस्यात्केशश्मश्रूणि वापयित्वा लोमानि संहृत्य नखानि निकृन्तयीत। सपत्नीकस्तीर्थे स्नायादहतं वासः परिधाय नवनीतेनाभ्यञ्जीत मुखमग्रेऽनुलोममङ्गानि त्रैककुदेनान्येन वाञ्जनेनाञ्जीत (अ)थर्त्विग्वेदकर्णानि प्रयोक्ष्यन्नादित एव तीर्थे स्नात्वोदेत्याहतं वासः परिधाय शुद्धोह वै शुचिः पूतो मेध्यो विपाप्मा ब्रह्मचारी सहकारिप्रत्यय आचतुर्था-त्कर्मणोऽभिसमीक्ष्यमाणः प्राङ्मुखः प्रदक्षिणं यज्ञोपवी-तमजिनं वासः सूत्रं वा धृत्वा दैवानि कर्माणि करोति ॥

End:

"वायो व्रतपत आदित्यव्रतपते व्रतानां व्रतपते व्रतमचा-रिषम्" इति पुनः परिषिञ्चति। अथोपोत्थाय यज्ञस्य पुन-रालम्बं जपति। "यज्ञो बभूव स आबभूव स प्रजज्ञे स वावृधे स देवानामधिपतिर्बभूव सो अस्माँ अधिपतीन्करोतु वयꣳ

स्यामपतयोरयीणाम्" इति। अथ प्राङुत्क्रम्य जपति "गोमाः अग्ने विमाः अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः। इडावाः एषो असुरप्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान्" इति। ब्राह्मणाः स्तर्पयत वा इति सम्प्रेष्यति। अन्नं संस्कृत्य च दशावरान् ब्राह्मणान् भोजयति। यथोपपदिदेवाग्नेयाभिरग्नीन् प्रदक्षिणीकुर्यात्सन्तिष्ठत आमावास्यं वा पौर्णमासं वा हविर्हविः ॥ २८ ॥

Colophon:

इति बोधायनदर्शपूर्णमासप्रयोगः सम्पूर्णः ॥

Subject:—Prayogaratna belonging to the Bodhāyana school of the Black Yajur Veda giving the prayoga details of the Darśapūrṇamāsa sacrifice.

Remarks:—The Ms. is in very good condition.

॥ प्रयोगरत्नम् ॥

2622. PRAYOGARATNAM.

J. L. Collection No. 264. Substance—Paper. Size—10×4 inches. Sheets—50. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Veṅkaṭeśvaradīkṣita.

Beginning, end, colophon and subject—Same as No. 2621.

Remarks:—The Ms. is in a decaying condition. A division of the text into 27 Khaṇḍas is given in this Ms. On the title page is given ' अग्निचिद्गङ्गाधरदीक्षितानामिदं पुस्तकम् । i.e., the Ms. originally belonged to Agnicit Gaṅgādharadīkṣita.

॥ सामप्रयोगवृत्तिः ॥

2623. SĀMAPRAYOGAVṚTTIḤ.

Burnell's Catalogue No. 9117. Page 25. Left column. Substance—Palm Leaf. Size —16 × 1¼ inches. Leaves—160. Lines—7 or 10 to a Page. Script—Grantha. No. of Granthas—6400. Author—Candraśekharabhaṭṭārya. Incomplete.

Beginning:

....

..................वरं ख्यातं भृगौर्जैमिनिः ॥

तत्सूत्रं तत्प्रा........र्थं ग्रन्थञ्चालोच्य शक्तितः ।

तदर्थं ग्रथ्यतेऽर्थोयं मया सत्तोऽपि ये धियः ॥

सूत्रकल्प.................................. ।

..............................तैः

पठ्यते ह्यवयवैस्त्रिभिर्य.. ।

यज्ञशास्त्रमिदमत्र वर्ण्यते

कल्पगोचरमिदं मयाधुना ॥

प्रकृतिर्विकृतिश्चेति द्वे अन्याचोभयात्मिकाः ।

..................दाभि तैः प्रकृत्यादितत्त्ववत् ॥

धर्मं ददाति योऽन्यस्मै (नाद)त्ते स्वयमन्यतः ।

प्रकृतिः सा भवेद्यज्ञ एकत्रिंशद्द्विजो यथा ॥

ददाति धर्मानन्यस्मै कुतश्चित्स्वय......... ।

...... चोभयात्मासौ द्वादशाहो यथैषनः ।

योय.............. न्यस.......... ॥

..................रवेदुपश्नतो यथा ।

अव्यक्तचोदनाक् .... ॥

आज्यादेर्देवतादीनां द्रव्यादीनाञ्च काङ्क्षणात् ।

प्रथमे तिस्र आज्यानि ज्योतिष्टोमं व्यपेक्षते ॥

विध्यते.............भो यन्ती नानास्मृतिरतसोय (?)

.................स्यचान्वयात् ॥

अव्यक्तचोदनारूपात्तदीयाङ्गसमत्वे च ज्योतिष्टोम एव गवामयनस्यापि प्रकृतिः यथा बृहत्प्रधानस्येत्यत्र प्रत्यक्षव .... ।

स्तोमपृष्ठगुणाः संस्था सव्यानामृषिदेवताः ।

काम इत्यन्वयैश्चैषा सामानि विकृतीरियुः ॥

प्रेतनादितिसौ.................. ।

आशुभार्गवमायाता रक्षप्रैगुणसमन्वयात् ॥

संस्था त्वयातिचातिरात्रे तृतीयेऽहनि नानदी ।

............तिरादिषु सङ्ख्यया ॥

ऋषभः पावमानस्य वृषभो नाम बद्धतः ।

ऋष्यन्वयामनुस्तोमे मानवद्वयमागतम् ॥

अग्निष्टुत्यश्विदैवत्या ऋचोदेव...योगतः ।

कामेन वाजपेयस्य त्रीण्य...युः ॥

इति साम्नां विकारेषु प्रोक्ता श्रुतौ नवान्वयाः ।

एकाहाः प्रथमं पश्चादहीनाश्च ततः परम् ॥

सत्राणि चैवमस्माभिः प्रदर्श्यन्ते क्रमान्मखाः ।

तत्र गवामयनस्य द्वादशाहः प्रकृतिः ॥

End :

एकपदानां यथा । इन्द्रो विश्वस्येति पूर्वस्य राजराजतीति परस्य पञ्चमषष्ठे इमं वर्षाणमिति पञ्मादिषट्चतुर्भिरेन्द्रायाभीति षट्पदस्य च चतुर्थपादे नवाक्षरः प्रतिहारः अस्तु श्रौ(ष)डिति च । अग्निहोतारमिति द्वितीयस्य चतुर्थपञ्चमयोरन्यतरत् प्रतिहारः । अग्निं होतारामिति प्रथमस्य चतुर्थपदम् । अयारुचेति तृतीयस्य चतुर्थषष्ठसप्तमेष्वादितश्चत्वारि चत्वारीति पुनश्च ग्रन्थः । गायत्र्यादीनां षण्णामुत्तमपदादौ प्रतिहारः । द्वैपदानामुत्तमस्य पदादौ वा मध्ये वा यथायोगम् । एकपदानां मध्यम एव अतिजगतिप्रभृतीनां वरीयसाञ्चतुर्थे पञ्चमे वा । अन्येषु मनवशात् गानवशाच्च नियम्यतेति । एवं साम्नां भक्तयश्च प्रायशो दर्शिता इति ॥

Colophon :

एषाचार्यभवत्रातग्रन्थब्राह्मणवीक्षणात् ।
चन्द्रशेखरभट्टार्यपश्चाग्नेरभवत्कृतिः ॥

एकाहादि सहस्राब्दसत्रपर्यन्तयाजिनः ।
सुकरं वीक्षणाद्यस्याः साद्दश्यविनियोजनम् ॥

प्रतीतेरवधानस्य बाहुश्रुत्यस्य वा मम ।
अभवद(?)सम्यक्त्वमार्यैः क्षन्तव्यमत्र तत् ॥

अक्षरं यत्परिभ्रष्टं मात्राहीनञ्च यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥

॥ प्रयोगवृत्तिः समाप्ता ॥

Subject: Sāmaprayogavṛtti giving the details of Sāmans in Soma sacrifices, as given in the side-margin of this Ms.:—

22	इन्द्राग्न्योः कुलायः	Leaf	48
23	इन्द्रस्तोमः	,,	49
24	विघनस्य	,,	,,
25	वैश्वदेवस्य	,,	52
26	उपहव्यस्य	,,	,,
27	चित्तिस्तोमस्य	,,	54
28	राशेः	,,	55
29	मरायस्व	,,	,,
30	इन्द्रस्तोमस्य	,,	57
31	विघनस्य	,,	58
32	उपहव्यस्य	,,	60
33	मनुस्तोमस्य	,,	
34	उत्तरमनुस्तोमस्य		
35	गायत्रस्य		
36	आपूर्वस्य	,,	69
37	पञ्चशरदीयस्य	,,	
38	अभिजिदतिरात्रस्य	,,	69
39	विश्वजितः	,,	70
40	सर्वपृष्ठस्य	,,	
41	परिराक्षपृष्ठस्य	,,	73
42	वाजपेयस्य	,,	74
43	दशपेयस्य	,,	76
44	केशवनीयस्य	,,	77
45	व्युष्टिद्विरात्रस्य	,,	,,

46	श्येनधृतेः	Leaf	79
47	वसूनामग्निष्टोमः	,,	,,
48	रुद्राणामग्निष्टोमः	,,	,,
49	आदित्यानामग्निष्टोमः	,,	80
50	अङ्गिरसामग्निष्टोमः	,,	,,
51	मरुतामग्निष्टोमः	,,	,,
52	विश्वेषां देवानामग्निष्टोमः	,,	81
53	ऋतुष्टोमः	,,	82
54	पञ्चकस्योत्तरस्य	,,	,,
55	ऋतनिधनस्य	,,	,,
56	वसिष्ठस्याग्निष्टोमस्य	,,	84
57	भारद्वाजस्याग्निष्टोमस्य	,,	,,
58	जामदग्नेर्व्रतस्य	,,	85
59	गौतमस्याग्निष्टोमस्य	,,	,,
60	विश्वामित्रस्याग्निष्टोमस्य	,,	86
61	अगस्त्यस्याग्निष्टोमस्य	,,	,,
62	व्रात्यस्तोमस्य	,,	87
63	कनिष्ठव्रात्यानामग्निष्टोमस्य	,,	88
64	शाण्डिल्याग्निष्टोमस्य	,,	,,
65	शुनव्रात्यानाम	,,	89
66	सजिह्मव्रात्यानाम्	,,	,,
67	सजिह्मस्तोमस्य	,,	90
68	चातुर्मास्यस्य	,,	,,
69	अभिप्रतराणीयस्य	,,	95

70	आयुरतिरात्रस्य	Leaf	95
71	पुत्रकामाग्निष्टोमस्य	,,	96
72	पराकस्य	,,	,,
73	गर्गत्रिरात्रस्य	,,	,,
	प्रथमपर्यायसमाप्तिः		
74	अश्वमेधस्य		
	प्रातःसवनम्	,,	104
	अश्वमेधभेदाः	,,	,,
	चतूरात्रम्	,,	,,
	ऋषीणाञ्च त्रिरात्रम्	,,	107
	सञ्जनीयसंज्ञकस्य	,,	109
	पञ्चरात्रम्	,,	,,
	त्रिवृदग्निष्टोमः	,,	114
	पौण्डरीकम्	,,	119
	निर्ह्रासपक्षः	,,	121
	छन्दोमत्रिरात्रम्	,,	,,
	उदयनीतोऽतिरात्रम्	,,	127
	संज्ञाकल्पे चतुर्थखण्डसमाप्तिः	,,	130
	महाव्रतम्	,,	134
	अभिजित्	,,	,,
	गोयुषी	,,	,,
	वैश्वानरः	,,	,,
	प्रायश्चित्तसामविनियोगसमाप्तिः	,,	146

Remarks :—The Ms. is in a decaying condition. The other work contained herein is Pratihārasūtra Bhāṣyam.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2624. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 9185. Page 17. Right column. Substance—Palm leaf. Size—$15\frac{1}{8} \times 1\frac{1}{4}$ inches. Leaves—18. Lines—9 to a Page. Script—Grantha. No. of Granthas—550. Author—Bhāskaramiśra. Somayāga—Three Kāṇḍas only.

Beginning :

शुक्लाम्बरधरं + शान्तये ॥

श्रियं वागीश्वरीं देवीं संप्रणम्य विनायकम् ।
गुरूंश्च सोमयागस्य प्रयोगः प्रवितन्यते ॥

तत्राधिकारकालादि प्रथमं प्रतिपाद्यते ।
सूत्रान्तरतमं वक्ष्ये सोपयोगं क्वचित्क्वचित् ॥

प्रसङ्गादग्निहोत्रेष्टिपश्वाधानोपयोगि यत् ।
तत्रापि लेशतः किञ्चित्प्रवक्ष्ये तत्र तत्र च ॥

अधिकारास्तयोर्नित्यकाम्यनैमित्तिकत्वतः ।
ते च श्रुतार्थवादेन कल्पत्वेन त्रिधा पुनः ॥

आधानं नित्यमेवेष्टं पितृयज्ञोऽपि तादृशः ।
कैश्चिन्मीमांसकैः काम्यः पितृयज्ञो निरूपितः ॥

पितृयज्ञस्य चाङ्गत्वमापस्तम्बेन दूषितम् ।

साधितश्च भरद्वाजसूत्रभाष्यकृता श्रुतेः ॥
आधानस्यापि काम्यत्वं बोधायनमताद्भवेत् ।
सर्वकामार्थमाधानमिति तेन निरूपितम् ॥
द्विप्रकाराधिकाराणि कर्माण्यन्यानि कानि चित् ।
ज्योतिष्टोमो निरूढश्च पशुस्सौत्रामणी तथा ॥
चातुर्मास्यानि दर्शश्च पूर्णमासोऽग्निहोत्रकम् ।
वाजपेय इतीमे स्युर्नित्याः काम्या इति द्विधा ॥

End:

अनेकाचार्यसिद्धान्ताः सौकर्याच्च निरूपिताः ।
देशकालवयोवस्थाशक्तिभेदाद्व्यवस्थिताः ॥
पुनराधिप्रसङ्गेन किञ्चिदत्र निरूपणम् ।
प्रायश्चित्तान्तरं वक्ष्ये स्वस्थाने बहुविस्तरम् ॥
अधिकारः प्रतिनिधिः पुनराधिरिति त्रयम् ।
निरूपितं विशेषेण त्वन्यद्ग्रन्थान्तरे भवेत् ।
त्रिकाण्डमण्डनमिति कर्तृद्वाराभिधानधीः ॥

Colophon:

इति पदवाक्यप्रमाणज्ञश्रीकुमारस्वामिसुतत्रिकाण्डमण्डनभास्कर-
मिश्रसोमयाजिकृतायामापस्तम्बसूत्रध्वनितार्थकारिका-
यां पुनराधानप्रकरणं तृतीयं काण्डम् ॥

हरिः ॐ ; शुभमस्तु ॥

(Leaf 7)

इति श्रीविद्यामदमत्ततत्तद्वादीन्द्रमतगजविदारणैकपञ्चाननस्य श्रीकु-
मारस्वामिसुतत्रिकाण्डमण्डनभास्करमिश्रसोमयाजिनः कृ-
तावापस्तम्बसूत्रध्वनितार्थकारिकासु सोमयागोपोद्घातेऽ-

धिकारिनिरूपणम् ॥

Subject : Āpastambasūtradhvanitārthakārikā—dealing with the details of the Somayāga. 1-3 Kāṇḍas. 1-537 Verses.

1	अधिकारिनिरूपणम्	1—187 Verses
2	प्रतिनिधिनिरूपणम्	1—210 ,,
3	पुनराधानप्रकरणम्	1—136 ,,

Remarks :—The Ms. is in a fairly good condition. The author of this prayoga tract is Trikāṇḍamaṇḍana Bhāskaramiśra Somayājin who is the son of Kumārasvāmin.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2625. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 3867. Page 18. Left column. Substance—Paper. Size—11 × 4⅜ inches. Sheets—17. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Bhāskaramiśra. Somayāga—Three Kāṇḍas only.

Beginning, end, colophon and subject—Same as No. 2624.

Remarks :—The Ms. is in good condition.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2626. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 3865. Page 18. Left column.

Substance—Paper. Size—$9\frac{7}{8} \times 4\frac{3}{8}$ inches. Sheets—14. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—190. Author—Bhāskaramiśra. Somayāga—first Kāṇḍa only.

Beginning:—Same as No. 2624.

End

दैवात्सोमेन नैवेष्टं प्राग्वसन्तान्यपर्वणः ।
श्विष्टं पर्वैकमेवात्र तथापि मलदूषितम् ॥ १८५ ॥
तत्र सोममखो नैव कार्यो नित्योऽपि सन्नयम् ।
यागलोपप्रसक्तावप्युदक्यादि मले यथा ॥ १८६ ॥
एवमुद्देशतः सारमधिकारस्य भाषितम् ।
विचिन्त्य कथयिष्यामि तत्तत्प्रकरणे स्फुटम् ॥ १८७ ॥

Colophon :

इति वादिघटमुद्गरकुठारश्रीकुमारस्वामिसूरिसुतत्रिकाण्डमण्डन-भास्करमिश्रसोमयाजिकृतापस्तम्बसूत्रध्वनितार्थकारिकासु सोमयागोपोद्घातेऽधिकारनिरूपणम् ॥

विद्वत्प्रभुवरश्रीमद्विनायकतनूभुवः ।
प्रभोर्यसन्तरायस्य ग्रन्थ एष प्रवर्धताम् ॥

Subject : Āpastambasūtradhvanitārthakārikā. Somayāga. First Kāṇḍa—Adhīkāranirūpaṇam.

Remarks: —The Ms. is in a very good condition.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2627. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 3866. Page 18. Left column.

Substance—Paper. Size—$9\frac{7}{8} \times 4\frac{3}{8}$ inches. Sheets—17. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—215. Author—Bhāskaramiśra. Somayāga—second Kāṇḍa only.

Beginning :

श्रीगणेशाय नमः ॥

त्रिकाण्डमण्डनद्वितीय० ॥

शिष्टस्याभावतस्तुल्यं द्रव्यं प्रतिनिधीयते ।
यावद्यावत्सुसदृशं तत्तदेव हि गृह्यते ॥

काम्ये प्रतिनिधिर्नास्ति नित्यनैमित्तिके हि सः ।
काम्येऽप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः ॥

न स्यात्प्रतिनिधिर्मन्त्रे देवेऽग्नौ कर्मणीश्वरे ।
न च प्रतिनिधिर्देशकालयोरित्यथापरे ॥

End:

आहिताग्निः कदाचित्तु कृष्णपक्षे मृतो यदि ।
तदा शेषाहुतीः सर्वा जुहोतीत्याश्वलायनः ॥

अन्ये तदैव दर्शेष्टिं कुर्युः कृष्णे मृतस्य तु ।
शुक्लपक्षे निशि प्रेतस्येच्छन्ति प्रातराहुतिम् ।
एवं प्रतिनिधिप्रोक्तस्तत्कार्ये च विधिः पृथक् ॥ २१० ॥

अवशिष्टोऽत्र यः कश्चित् स्वे स्वे स्थाने वदामि ते ।

Colophon:

इति त्रिकाण्डमण्डनभास्करसोमयाजिनिर्मिते प्रतिनिधिनिरूपणम् ॥

Subject: Āpastambasūtradhvanitārthakārikā Somayāga Second Kāṇḍa. 1-210 Verses.

Remarks:—The Ms. is in a very good condition. On the title

page is given :—

विद्वत्प्रभुवरश्रीमद्विनायकतनूभुवः ।

प्रभोर्यसन्तरायस्य ग्रन्थ एष प्रवर्धताम् ॥

i.e. the Ms. originally belonged to Yasantarāya Prabhu, son of Vināyaka Prabhu.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2628. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 3868. Page 18. Left column. Substance—Paper. Size—$9\frac{7}{8} \times 1\frac{5}{8}$ inches. Sheets—18. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—145. Author—Bhāskaramiśra. Somayāga—third Kāṇḍa only.

Beginning:

श्रीवेदव्यासाय नमः ॥

कामे निमित्तयोगे वा पुनराधेयमिष्यते ।

निमित्तेषु यथा योगमाधानमथ वा भवेत् ॥

तत्र येषु निमित्तेषु श्रृङ्गग्राहिकया विधिः ।

तत्रैव पुनराधेयमन्यथाऽधानमिष्यते ॥

End—Same as No. 2624.

Colophon:

इति पुनराधानप्रकरणम् ॥

Subject: Āpastambasūtradhvanitārthakārikā. Third Kāṇḍa. 1-136 Verses.

Remarks:—The Ms. is in a very good condition. On the title page is given

विद्वत्प्रभुवर + प्रवर्धताम्

i.e. the Ms. originally belonged to Yasantarāya Prabhu son of Vināyaka Prabhu. After the colophon of this Ms., 32 verses are given:

अथ कस्यचित् कथिकस्य नानाविधानि वैकल्पिकानि तद्यथा—

सकृत्करणमिच्छन्ति याकयज्ञेषु केचन ।
आवृत्तिं केचिदिच्छन्ति तत्रावृत्तिस्तु सम्मता ॥ १ ॥

* * * *

रूपं कालोऽथनिर्वापो देवताश्रवणं तथा ।
आदौ ये विधृताः पश्चात्त एवस्युस्तदैव हि ॥ ३२ ॥

एतच्चमण्डलविषयं तत्परिशिष्टविषयम् ।

इति कारिकायां त्रिकाण्डमण्डनतृतीयकाण्डं समाप्तम् ॥

According to this Ms., these 32 verses form the Pariśiṣṭa (supplement) to the third Kāṇḍa of आपस्तम्बध्वनितार्थकारिका.

॥ आपस्तम्बश्रौतप्रयोगकारिका ॥

2629. ĀPASTAMBAŚRAUTAPRAYOGA-KĀRIKĀ.

Burnell's Catalogue No. 3864. Page 18, Left column. Substance—Paper. Size—10 × 4¾ inches. Sheets—29. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas— 50. Author—Vāsudevadīkṣita. Agniṣṭoma only.

Beginning :

सङ्कल्प्य विद्युद्वृणुयात्प्रवाक-
मृत्विग्व्रतीस्यान्मधुपर्ककर्म ।
सक्षेदमुक्त्वा तु विधाय नान्दी-
मारोप्य वास्तोष्पतिहोमवर्जम् ॥ १ ॥

उक्त्वा विशेदेदमगन्मशाला-
मुपावरोह्यावसिताहुतिर्वा ।
ततः परं संभरति प्रवर्ग्यं
केचित्तु सक्षेदमनन्तरं ग्रहे ॥ २ ॥

द्रव्यस्य निर्देशविधिर्विहृत्य
जुहोति संभारयजूंषि तत्र ।
निवेदनं ते पय ओदनन्तु
सोमाय राज्ञे नम इत्युदीर्य ॥ ३ ॥

अत्रैव वा सम्भरति प्रवर्ग्यं
दीक्षोत्तरं वा क्रयणाहतः प्राक् ।
आतिथ्ययेष्टेति तु केचिदाहुः
सर्वत्र सूत्रोदितकाल इष्टः ॥ ४ ॥

End:

आमिक्षावेदमाधायातीमोक्षजप इष्यते ।
अतीमोक्षजपान्ते तु यज्ञशंयुष्टिरित्यपि ॥ ४५ ॥

ब्राह्मणांस्तर्पयित वै समारोप्य प्रयाति च ।
इदं श्रेयश्च निर्मथ्य विहृत्याहवनीयकम् ॥ ४६ ॥

हुत्वा पूर्णाहुतिं सायमग्निहोत्रन्तु हूयते ।
यत्र कालातिक्रमेऽपि न प्रायश्चित्तमिष्यते ॥ ४७ ॥

नैवारम्भोऽग्निहोत्रस्य रात्राविति तु केचन ।
रात्रावपि तदारम्भसंप्रदायस्तु वक्ष्यते ॥ ४८ ॥

Colophon :

इति श्रीवासुदेवदीक्षितविरचिताः आपस्तम्बसोमकारिकाः
समाप्ताः ॥ कारिका ४४८॥

Subject : Āpastambaśrautaprayogakārikā, a prayoga **tract in** 448 verses dealing with the Agniṣṭoma Soma sacrifice, according to the Āpastamba school of the **Black** Yajur-Veda.

Remarks :—The Ms. is in good condition.

॥ आपस्तम्बश्रौतप्रयोगकारिका ॥

2630. ĀPASTAMBAŚRAUTAPRAYOGA-KĀRIKĀ.

Burnell's Catalogue No. 3863. Page 18. **Left column.** Substance—Paper. Size—10 × 4⅞ inches. Sheets—8. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—105. Author—Vāsudevadīkṣita. **Paśubandha** only.

Beginning :

श्रीगणेशाय नमः ॥
आपस्तम्बपशुकारिका ॥

पर्वणोः पशुबन्धः स्यात्सद्यस्कालोऽथ्यहोऽपि वा ।
त्र्यहत्वे तु चतुर्दश्यां सद्यस्काले तु पर्वणि ॥ १ ॥
निरूढपशुबन्धेन यक्ष्य इत्याग्नुरं वदेत् ।
अयन्त इत्यथारण्योरारोप्योदवसाय च ॥ २ ॥

उपावरो हेति जपेन्मथिते जात एव तु ।
वस्तोष्पतीष्यावसितहोमौस्यातां न कर्मणाम् ॥ ३ ॥

End :

ब्रह्मप्रतिष्ठेत्यादीनि चित्तान्प्राणाय च(?) ध्रुवाम् ।
तया प्रतिविभज्याथस्यात्समिष्टे यजुस्त्रयम् ॥ २ ॥
अभिस्त्रीणी... यं देवा शूलचर्याग्न्युपस्थितेः ।
ब्रह्मा तु शूलचर्यान्ते विनिष्क्रामत्यथाऽडिति ॥
न विष्णोरग्निनेत्यादि सिद्धमागोमती जपात् ॥ ३ ॥
गोमान्नमस्वरूच्यथ यज्ञसंव्रष्टिरित्यपि ।
ब्राह्मणांस्तर्पयतवै स्वस्थानं प्रतियात्यथ ॥ ५ ॥

Colophon :

इति श्रीवासुदेवदीक्षितकृता आपस्तम्बपशुकारिका समाप्ता ॥ आहत्यकारिका ॥ १०५ ॥

Subject : Āpastambaśrautaprayogakārikā—a prayoga tract in 105 verses dealing with the Paśubandha sacrifice, according to the Āpastamba school of the Black Yajurveda.

Remarks:—The Ms. is in good condition.

॥ बोधायनश्रौतप्रयोगकारिका ॥

2631. BODHĀYANAŚRAUTAPRAYOGA-KĀRIKĀ.

Burnell's Catalogue No. 3721. Page 24. Left column.

Substance—Paper. Size—$10\frac{3}{4} \times 4\frac{1}{4}$ inches. Sheets—13. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—$33\frac{1}{2}$. Author—Gopāla. Complete.

Beginning:

षण्मुखाय नमस्तस्मै रुद्राणीप्रियसूनवे ।
निहितः स्वयमातृष्णः काण्वोभूयेन सूत्रकृत् ॥

कल्पामृतं क्षितिसुरप्रकराय योदा-
द्वादाम्बुराशिमधिगम्य निजप्रभावात् ।
बोधायनाय मुनिवन्दितपादपद्म
द्वन्द्वाय कण्वतनयाय नमोऽस्तु तस्मै ॥ २ ॥

श्रियं नः श्रौतकल्पानां प्रादुर्भूताय विष्णवे ।
तत्तत्कालं पुनर्दातुं नमो बोधायनात्मने ॥ ३ ॥

मुनिं बोधायनं वन्दे वेदतत्त्वार्थदर्शिनम् ।
कामदं व्योमदं कान्तं कल्पं कल्पद्रुमं यथा ॥ ४ ॥

आकल्पं कल्पयामास वन्दे बोधायनं मुनिम् ।
पक्षादौ पक्षयोः सन्धेः सन्निकृष्टतरे दिवा ॥ ५ ॥

पौर्णमास्याः प्रधानानि कर्तव्यान्यत्र नो गुरुः ।
यागान्वाधानयोर्मध्ये पर्वसन्ध्ये च पक्षयोः ॥ ६ ॥

End:

सोमाभत्वे भवेदग्निष्टोमः प्रकृतिरेवतु ।
पश्वन्तपक्ष ऐन्द्राग्नो निरूढश्चाक्र एव सः ॥

स वनेष्वन्तपक्षेस्यादाग्नेयोष्टाकपालकः ।
एकादशकपालैन्द्रः स्याद्वादशकपालकम् ॥

पाशुके वितते तन्त्रे होमकाल उपस्थिते ।
अपरे तु विहारे सा तत्रैवोत्तरवेदिकम् ॥

सद्यस्कालपशौ पक्षे होमकाल उपस्थिते ।
समाप्यैव तु होतव्यं काल एव जुहोति वा ॥

Colophon : (Sheet 6).

इति दर्शपूर्णमासपिण्डपितृयज्ञाधानाग्निहोत्रारम्भणीयाग्निनाशनिमित्त गोपालकारिकाः समाप्ताः ॥

इति गोपालकृताश्चातुर्मास्य कारिकाः ॥

Subject :—Bodhāyanaśrautakārikā—(Gopālakārikā) containing the prayogas of Darśapūrṇamāsa, Ādhāna, Piṇḍapitṛyajña, Agnihotra, Anvārambhaṇīya and Cāturmāsya sacrifices.

Remarks:—The Ms. is in a fairly good condition. On the title page is given 'श्रीबाबाजीनायकपुण्डयोपनाम्नाम्' श्रीशामजीनायकपुण्डयोपनाम्नाम

i. e. it originally belonged to both Śāmāji Nāyaka and Bābāji Nāyaka.

॥ बोधायनश्रौतप्रयोगकारिका ॥

2632. BODHĀYANAŚRAUTAPRAYOGA-KĀRIKĀ.

J. L. Collection No. 265. Substance—Paper. Size—9¾ × 4½ inches. Sheets—5. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Gopāla. Darśapūrṇamāsa, Piṇḍapitṛyajña and Agnyāvatana only.

Beginning—Same as No. 2631.

End :

मध्येन दक्षिणं पार्श्वं परिलिख्य तथोत्तरम् ।

एवं पुरस्तात्पश्चाच्च वेदिः पार्वण पारियम् ॥

यदि भूमिरनुस्नुः स्याद्रज्जुर्द्वादशधा कृता ।
वर्धयेत्तां त्रयोदश्यां तयाचान्ते बहिःक्रिया ॥

इति सम्पूर्ण (र्णा) ॥

अथास्यैतत्पुरस्तादेव० मध्येगार्ह० अथाग्न्या०यतनम् । इष्टदेवो प्राचीं साधयित्वा दीर्घचतुरस्रंसमचतुरस्रं वा प्राग्दक्षिणद्वारद्वययुक्तमग्न्यागारं परिकल्प्य तन्मध्ये गार्हपत्यस्यायतनम् । पुरस्ताद्द्वाद० चक्षुर्नि० प्रक्रममाह द्विपदस्त्रिपदो वा प्रक्रमः ॥

* * * *

एवं वेदिं निधाय सर्वतः सन्नमयेत् । दक्षिणश्रोणां सशङ्कोरञ्जसा दक्षिणतस्यान्तराळद्वादशांशेन शङ्कुं निहन्यात् । तयोरातुकत्रयोदशांशाधिकामुभयतः पाशां रज्जुं प्रतिमुच्य तया दक्षिणं पार्श्वं परिलिखेत् । एवं सतः प्राक्ताद्ध्यङ्गुळाधिका प्राकृतयोरेव प्रतिमुच्य परिलिखेदित्यपीति केचित् ॥

Colophon:

इयं दार्शपौर्णमासिका वेदिः ॥

Subject: Bodhāyanaśrautaprayogakārikā—popularly known as Gopālakārikā, a prayoga tract in verses based on the Bodhāyanaśrautasūtras, containing the prayogas of (1) Darśapūrṇamāsa (2) Piṇḍapitṛyajña and (3) Agnyāyatana.

Remarks:—The Ms. is in a fairly good condition. The last section

of this Ms. contains two different versions, one in verse and other in prose.

॥ बोधायनश्रौतप्रयोगकारिका ॥

2633. BODHĀYANAŚRAUTAPRAYOGA-KĀRIKĀ.

J. L. Collection No. 266. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—5. Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—65. Author — Gopāla. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ गोपालकारिका पशोः ॥

अयनादौ निरूढोऽयं नाभावेऽब्दमतिक्रमेत् ।
माघमासे धनिष्ठाभिरुत्तरे नेति भानुमान् ॥ १ ॥
श्रवणाश्लेषयोर्मध्ये दक्षिणेन निवर्तते ।
साम्प्रतं रविरप्राप्य मृगं कर्कटकं किल ॥ २ ॥
निवृत्तेरन्तरं कुर्यादामावास्यस्य वाथ वा ।
यत्पुण्यमिति नक्षत्रमनुकूलं यदात्मनः ॥ ३ ॥

End:

धातूनक्त्वा समिष्टाग्नीन् हुत्वा विष्णुक्रमादिकम् ।
तर्पणान्तमिहैव स्याच्छूलाद्यध्वर्युरन्ततः ॥
याजमानं कुसीदादि केचित्पूर्णाहुतिं विना ।
यद्वा विष्णुक्रमादर्वाक्कृत्वा यज्ञो बभूवतः ॥

शूलचर्या कुसीदादि दत्वा पूर्णाहुतौ वरम् ।
यज्ञो बभूव गोमत्यां ततो ब्राह्मणतर्पणम् ॥

Colophon:

इति गोपालकृतपशुकारिका समाप्ता ॥
श्रीनृसिंहार्पणमस्तु ॥

Subject: Gopālakārikā—Paśukārikā only.

Remarks:—The Ms. is in good condition.

॥ बोधायनश्रौतप्रयोगकारिका ॥

2634. BODHĀYANAŚRAUTAPRAYOGA-KĀRIKĀ.

J. L. Collection No. 267. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{1}{4}$ inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—317. Author—Gopāla. Complete.

Beginning:

श्रीगणेशाय नमः ॥
शुभमस्तु ॥

पक्षादौ पक्षयोः सन्धिः सन्निकृष्टतरं दिवा ।
पौर्णमास्यां प्रधानानि कर्तव्यान्यत्र नो गुरुः ॥ १ ॥
यागान्वाधानयोर्मध्ये पर्वसाम्येव पक्षयोः ।
किन्तु सन्धेः प्रधानानां सन्निकृष्टोऽनपेक्षितः ॥ २ ॥
अन्यो दिवान्ते रात्र्यां वा प्रागेष्टिं सन्धियागयोः ।
सन्निपातमतस्तेन कालहोमोऽप्यनादृतः ॥ ३ ॥

End:

वत्सापाकरणं तूष्णीं गृहमेधीयपङ्क्तये ।

अपूर्वत्वे प्रयोगोऽयं प्रधानार्थं निवर्तते ॥ ६४ ॥

अङ्गार्थं क्रियते कार्यमुभयार्थं क्रियेति च ।

सायं हुते विहृत्यन्वाधानमुष्टिः सवेदकः ॥ ६५ ॥

पाणिमृष्ट्वा परिस्तीर्य स्फ्यहवन्यौ जुहूपभृत् ।

स्रुवं ध्यावामिडापात्रमाज्यस्थालीं सवेदकाम् ॥ ६६ ॥

अग्रं योक्त्रं च संसाद्य पवित्रान्तं समन्त्रकम् ।

तूष्णीं निरूप्य पात्राणां प्रोक्ष...... ..(॥ ६७)

Colophon: (Sheet No. 10).

इति पशुकारिका समाप्ता ॥

Subject: Bodhāyanaśrautaprayogakārikā — (Gopālakārikā.)

The Ms. contains पशुकारिका and चातुर्मास्यकारिका

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks off in the middle of the 67th Kārikā of चातुर्मास्यकारिका.

॥ कारिकासन्धीकृतबोधायनश्रौतप्रयोगविवृतिः ॥

2635. KĀRIKĀSANDHĪKṚTABODHĀYANA-ŚRAUTAPRAYOGAVIVṚTIḤ.

J. L. Collection No. 268. Substance—Paper. Size—$11\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—27. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—540. Author — Bālādīkṣita. Darśapūrṇamāsa only.

Beginning:

श्रीगणेशाय नमः ॥

निरुपमगुणवल्लीदेवसेनासनाथे

भुजबलहतदृप्यत्क्रूरपद्मासुरेन्द्रे ।

गिरिशगिरिदुहित्रोः प्रेमसर्वस्वपात्रे

भवतु मम कुमारे गाढमुद्दामभक्तिः ॥

कल्पामृतं क्षितिसुरप्रकराय योऽदात्

क्षीराम्बुराशिमधिमथ्य निजप्रभावात् ।

बोधायनाय मुनिवन्दितपादपद्म-

द्वन्द्वाय कण्वतनयाय नमोऽस्तु तस्मै ॥ २ ॥

साग्निभिः सप्त संस्थाभिस्तर्पितेन्दुशिखामणिम् ।

सुब्रह्मण्याभिधं वन्दे पितरं श्रौतसागरम् ॥ ३ ॥

श्रीवत्सान्वयवर्ति(वार्धि)कौस्तुभमणिर्विश्वेश्वराध्वर्यभू-

त्तस्याभूत्प्रथमः सुतः किल महादेवाध्वरीन्द्रः सुधीः ।

श्रीनारायणदीक्षितो यदनुजः तस्याभवन्सूनवः

चत्वारः पदवाक्यमाननिपुणाः वेदा हि मूर्ता इव ॥ ४ ॥

ज्यायान् विश्वेश्वराध्वर्यथ विदितयशा वासुदेवाध्वरीन्द्रः

ख्यातश्रीरामचन्द्राध्वरकृदथ ततः श्रीनिवासाध्वरीन्द्रः ।

तेषु ज्येष्ठस्य पुत्रो विरचितचयनानेकसंस्थाकसोम-

श्रीसुब्रह्मण्ययज्वा मम पितृचरणः सूत्रषट्कप्रवक्ता ॥ ५ ॥

श्रीबोधायनकल्पसूत्रसरणौ न्यायादिसिद्धानि त-

द्गोपालाध्वरिकारिका प्रकटितान्युक्तानि यानि स्फुटम् ।

अस्मत्तातकनिष्ठतातचरणैः श्रीवासुदेवाभिधै-

रप्येतानि च तत्र तत्र कलये सूत्रेषु यज्ञेश्वरः ॥ ६ ॥

नत्वा बोधायनमुनिमाज्ञां धृत्वा शिवाजिभूपस्य ।

श्रौतप्रयोगविवृतिः क्रियते बाळाख्ययज्वना सुधिया ॥ ७ ॥

अपामुपस्पर्शनमर्थसिद्धमुद्दिश्य यागं परिषेचनादि ।
मन्त्रप्रतीके सकलश्च मन्त्रं द्रव्यादिसङ्कल्पमपि ब्रवीमि ॥ ८ ॥

कारिकास्थितमन्त्रश्च कात्स्न्र्येनैव विलिख्यते ।
सन्तः प्रतीक्ष्य तदिदं मोदन्तां गतमत्सराः ॥ ९ ॥

आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति । स पुरस्तादेव हविरातञ्चनमुपकल्पयत एकाहेन वा द्व्यहेन वा यथर्तु अथ वै ब्राह्मणं भवति । दध्नातनक्ति सेन्द्रत्वायाग्निहोत्रोच्छेषणमभ्यातनक्ति "यज्ञस्य सन्तत्यै" इति । चन्द्रमसं वा निर्ज्ञाय संपूर्णं वा विज्ञाय ॥

पक्षादौ पक्षयोः सन्धेः सन्निकृष्टतरं दिवा ।
पौर्णमास्यां प्रधानानि कर्तव्यान्यत्र नो गुरुः ॥

यागान्वाधानयोर्मध्ये पर्वसाध्वेव पक्षयोः ।
किन्तु सन्ध्ये प्रधानानां संनिकर्षोऽनपेक्षितः ॥

End:

अथैतेनैव यथेतमेत्य यजमानायतन उपविश्य तिरःपवित्रमय इत्यादि व्रतविसर्गः । अत्राचारिषं तदशकमिति विशेषः । पूर्ववत्त्यागाः । अथोपोत्थाय यज्ञस्य पुनरालम्भं जपति यज्ञो बभूव स० रथीनामिति । अथ प्राङुत्क्रम्य गोमतीर्जपति गोमा॰ अग्ने॰ सभावान् इति । अथ ब्राह्मणा॰ स्तर्पयत वै इति संप्रेष्यति ।

दशौदना स्युरिष्टीनां पशौ तु शतमोदनाः ।
सहस्रमोदनाः सोम इत्याहुर्ब्रह्मतर्पणम् ॥

कर्मणां सांगतासिद्ध्यै जपेत्पुरुषसूक्त(क)म् ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमीश्वरम् ।
संतिष्ठत आमावास्यं वा पौर्णमासं वा हविर्हविः ॥
×३ यज्ञावतविसर्गात्प्रागुपवेषमथोत्करे ।
यं देवा इत्युपोदस्येत्प्रत्यञ्चं स्थूलदेशतः ॥
यं देवा मनुष्ये × × प्रवेषं० कुर्विंति × ॥

Colophon :

इति श्री कारिकासन्धीकृतं बोधायनदर्शपूर्णमाससूत्रं संपूर्णम् ॥

श्रीमत्प्रणतार्तिहरार्पणमस्तु ॥

Subject : Kārikāsandhīkṛtabodhāyanaśrautaprayogavivṛti — a prayoga treatise based on the Bodhāyanśrauta-sūtras and their subsequent prayogakārikās—giving the details of the Darśapūrṇamāsa sacrifice.

Remarks :—The Ms. is in a fairly good condition. The author of this and the three following prayoga tracts is Bālādīkṣita other-wise known as Yajñeśvaradīkṣita, a resident of Sahajirāja-puram or the modern Tiruvisanalloore near Kumbakonam in Tanjore District. See Remarks on Nos. 2063 and 2067. The indroductory verses in this Ms. give in detail the geneology of this author as the following table shows.

Viśveśvarādhvarin (of Śrīvatsa family)

- Mahādevavājapeyin
  - (4) Śrinivāsādhvarin.
  - (3) Rāmacandrādhvarin.
  - (2) Vāsudevādhvarin.
  - (1) Viśveśvarādhvarin.
    - Subrahmaṇyayajvān.
      - Bālādīkṣita.
- Nārāyaṇadīksita.

॥ कारिकासन्धीकृतबोधायनप्रयोगविवृतिः ॥

2636. KĀRIKĀSANDHĪKṚTABODHĀYANA-PRAYOGAVIVṚTIḤ.

Burnell's Catalogue No. 3745. Page 24. Left column. Substance—Paper. Size—$11\frac{3}{8} \times 5$ inches. Sheets—82. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Bālādīkṣita (Yajñadīkṣita) Darśapūrṇamāsa, Upavyāharaṇa and Ādhāna only.

Beginning—Same as No. 2635.

End:

'अन्वारम्भे याजमानमग्नाविष्णोऽस्तु वृत्रहा ।
सरस्वत्या वाचमन्नाद्यं पुषेयं सरस्वतः ॥

श्रद्धा मना भूयासं स्याद्भगिनोन्नाद एव च ॥'

त्रिष्टुभौ संयाज्येन्वाहार्थमासाद्य मिथुनौ गावौ ददाति सन्तिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमानविसृजते व्रतम् ।
'कृत्वान्वारम्भणीयांश्च तेष्वेवाग्निषु पार्वणम् ।'
अथ पौर्णमासवैमृथाभ्यां यजते ।
'होत्वं तमथ वा सारस्वतान्तं वापि पर्वणि ।
कृत्वा प्रातः कृतान्तादि कुर्यादिष्टिद्वयं क्रमात् ॥
चातुर्होत्रादिसर्वश्च प्रतिपद्येव वा भवेत् ।
तुल्योपवसथत्वं स्यात्सर्वेष्वेव चतुर्ष्वपि ।'
सन्तिष्ठतेऽग्न्याधेयं सन्तिष्ठतेऽग्न्याधेयम् ॥

Colophon:

इति श्रीशाहजीमहापुरवास्तव्येन बालादीक्षितविदुषा का-

रिकासन्धिकृतबोधायनाधानप्रयोगविवृतिः सम्पूर्णा ॥

Subject: Kārikāsandhikṛtabodhāyanaśrautasūtraprayogavivṛti.

1	दर्शपूर्णमास	Page	1—49
2	उपव्याहरणम्	,,	49—54
3	आधानम्	,,	54—82

Remarks:—The Ms. is in good condition. In the beginning of this Ms. the seventh Sloka. 'नत्वा बोधायनमुनिं + सुधिया' is omitted. The following Stanza is added as the ninth.

'राजश्रीशरभावनीन्द्रवचसा नागेशयज्वाभिध-
प्रौढप्रार्थनयापि सङ्कलयतः कल्पोक्तिशेषं मम ।
दोषो यद्यपि नो भवेदथ पुनः स्याच्चेत्परामृश्य त-
न्निश्शेषं परिशोधयन्तु दयया सन्तो विदन्तोऽखिलम ॥'

Dr. Burnell has observed on page 23 of his catalogue that No 3745 a contains 50 sheets and it is '(Bodhāyana) Upavyaharaṇaprayoga'; and again on page 24, he has added that No. 3745 b. contains 82 sheets and it is 'Various prayogas by Yajñadikṣita. Evidently the whole Ms. contains 82 sheets only as described above and it is a prayoga by Bālā (yajña) dikṣita on Darśapūrṇamāsa, Upavyāharaṇa and Ādhāna, as noted above.

॥ कारिकासन्धीकृतबोधायनश्रौतप्रयोगविवृतिः ॥

2637. KĀRIKĀSANDHĪKṚTABODHĀYANA-ŚRAUTAPRAYOGAVIVṚTIḤ.

Burnell's Catalogue No. 3716. Page 24. Left column.
Substance—Paper. Size—$11\frac{1}{4} \times 5$ inches. Sheets—25.

Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—525. Author—Bālādīkṣita. Paśubandha only.

Beginning :

पशुना यक्ष्यमाणो भवति + पृषदाज्यायदाविहिरण्य-
मित्यथामावस्येन हविषेष्ट्या नक्षत्रे वा—

निरूढपशुबन्धोऽयं वत्सरस्य द्विरिष्यते ।
तत्रैकः पशुबन्धः स्यात्प्रवृत्ते मकरायने ॥ १ ॥

End :

पूर्णाहुतौ वरं ददाति धेनुवरं वा अनडुद्वरं वा दद्या-
दिति ह स्माह बोधायनः ।

वरे दत्ते भवेद्यज्ञो + यथा पूर्वमिहागतः ॥ १२ [५]
सन्तिष्ठते पशुबन्धः सन्तिष्ठते पशुबन्धः ॥

Colophon :

इति श्रीबोधायनकल्पसूत्र गोपालकारिकासहकृतपशुसूत्रं
समाप्तम् ॥

Subject : Bodhāyanaśrautaprayogavivṛti — based on the Bodhāyanaśrautasūtras and Gopālakārikās thereon. 1-12 Kāṇḍas.

Remarks :—The Ms. is in good condition. On the title page is given 'बालादीक्षितकृतपशुबन्ध प्रयोगवृत्तिः' ॥

॥ कारिकासन्धीकृतबोधायनश्रौतप्रयोगविवृतिः ॥

2638. KĀRIKĀSANDHĪKṚTABODHĀYANA-ŚRAUTAPRAYOGAVIVṚTIḤ.

Burnell's Catalogue No. 3733. Page 24. Right column. Substance—Paper. Size—11½ × 5 inches. Sheets—62 (38-

99). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1350. Author—Bālādīkṣita. Agniṣṭoma only.

Beginning:

श्रीगणेशाय नमः ॥

हरिः ॐ अथातो महारात्र एव बुध्यन्ते ॥

'त्रिभागे पश्चिमे रात्रेस्तीर्थे न प्रविशन्त्यमी ।

नासंस्थि(स्थि)ते सदोतीयादर्वाग्वा दक्षिणायनात् ॥

सम्बोधयन्त्येतानृत्विजोऽध्वर्युं होतारं ब्रह्माणमुद्गातारं प्रतिप्रस्थातारं प्रस्तोतारं प्रशास्तारं ब्राह्मणाच्छंसिनमच्छावाकं नेष्टारं पोतारं सदस्यमुन्नेतारमाग्नीध्रं ग्रावस्तुतं सुब्रह्मण्यं प्रतिहर्तारं ये चान्ये परिकर्मिणो भवन्ति ते हस्तपादान्प्रक्षाल्याग्नीध्रे यजमानमुपसङ्गच्छन्तेऽथाध्वर्युर्हस्तौ सम्मृशते "कर्मणे वां देवेभ्यः शकेयम्" इति ॥

पाणी संमृश्य चाध्वर्युः प्रेष्येदुन्नेतरित्यथ ॥ १ ॥

End:

अथारण्योरग्नीन्समारोह्य "प्रत्यक्षतो वापि हरेच्च वह्नीन्तथैव वा निष्क्रमणे पुरापि" स्वान्यग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्य सायंप्रातरग्निहोत्रे प्रतिजुहोति ।

"होमातिपत्तौ प्रतिहोममेके उपक्रमेताप्यहुतं पुरा चेत् ।

आरम्भणीयाप्यकृता पुरा चेदाधानसोमे कुरुते समाप्ते ॥"

सन्तिष्ठतेऽग्निष्टोमः सन्तिष्ठतेऽग्निष्टोमः ॥ १० ॥

Colophon: (Sheet No. 67)

इति श्रीशाहजीमहाराजपुरवास्तव्येन बालादीक्षितकृतौ का-

रिकासन्धीकृतबोधायनाग्निष्टोमप्रयोगविवृतौ प्रात-
स्सवनं संपूर्णम् ॥

(Sheet No. 99)

इति श्रीशाहजीमहाराजपुरवास्तव्येन बालादीक्षितेन का-
रिकासन्धीकृतबोधायनकल्पसूत्रे अग्निष्टोमसूत्रं
सम्पूर्णम् ॥

जयसंवत्सर श्रावणशुद्धैकादश्यां सम्पूर्णम ॥

Subject : Kārikāsandhīkṛtabodhāyanaśrautaprayogavivṛti—a prayoga tract based on the Bodhāyanaśrautasūtras and their Kārikās, giving the details of the Agniṣṭoma sacrifice.

Remarks :—The Ms. is in good condition.

॥ कारिकासन्धीकृतबोधायनश्रौतप्रयोगविवृतिः ॥

2639. KĀRIKĀSANDHĪKṚTABODHĀYANA-ŚRAUTAPRAYOGAVIVṚTIḤ.

Burnell's Catalogue No. 3741. Page 25. Right column. Substance—Paper. Size—$11\frac{3}{8} \times 5\frac{5}{8}$ inches. Sheets—97. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—Yajñeśvaradīkṣita. Mahāgnicayanaprayoga only.

Beginning :

श्रीमहागणपतये नमः ॥

साग्निभिः सोमसंस्थाभिस्तर्पितेन्दुशिखामणिम् ।
सुब्रह्मण्याभिधं वन्दे पितरं श्रौतसागरम् ॥ १ ॥
श्रीबोधायनकल्पसूत्रसरणौ न्यायादि सिद्धानि तत्
गोपालाध्वरिकारिकाप्रकटितान्युक्तानि यानि स्फुटम् ।

अस्मत्तातकनिष्ठतातचरणैः श्रीवासुदेवाभिधैर-
प्येतानि च तत्र तत्र कलये सूत्रेषु यज्ञेश्वरः ॥ २ ॥

हरिः ॐ ॥ उखाः सम्भरिष्यन्नुपकल्पयते ॥

अथातोऽग्निरनारभ्यन्यायेन प्रकृतिं गताः ।
दीक्षादिलिङ्गतस्तस्य ज्योतिष्टोमाङ्गता स्थिता ॥

पृथक्प्रकरणाम्नायाद्गुणकामाश्च नैत्यकः ।
अनिष्टप्रथमेत्यादेर्द्वैधे लिङ्गस्य दर्शनात् ॥

आद्येऽपि सोमयागः स्यात्केवलं नोत्तरक्रतौ ॥

स चाप्येकादशाकारश्येनादिः शुल्बदर्शितः ।
तत्र श्येनो द्विधा वक्रश्चतुरश्रश्च कीर्त्यते ॥

अर्थैक्यादाश्रयैक्याच्च शब्दैक्याच्छ्येनयोर्द्वयोः ।
विकल्पस्तुल्य एव स्याद्बिल्वखादिरयोरिव ॥ ७ ॥

End:

आपन्त्वाग्ने स्वगाकारेण ॥ ९ ॥

याजमानमुपस्थानमात्ययस्युः चतुष्पदाः ॥ १ ॥

अथोदवसानीयया यजते । अथ वैदिका हविर्भिर्यजते । 'देविकास्तु विकल्प्यन्ते आग्निकाद्वैधदर्शनात् ॥१॥' अथ त्रैधातवीयया यजते । त्रैधातवीया च प्रायश्चित्तसूत्रोक्तवर्त्मना । अथ सौत्रामण्या यजते । संवत्सरं न कञ्चन [प्रसन]प्रसत्यवरोहति न शीर्षमांसं खादति नवयस्य(सां) मांसं नाग्निं चित्वा रामामुपेयान्नाग्निचिद्वर्षीते (?) धावेद्यदिधावेदुपावर्तेतान्यमेवाभ्युयावर्तेत इति ब्राह्मणम् ॥

Colophon :

इत्यग्निचयनसूत्रं समाप्तम् ॥

निरुपमगुणवल्ली देवसेनासनाथे
भुजबलहतदृप्यच्छूरपद्मासुरेन्द्रे ।
गिरिशगिरिदुहित्रोः प्रेमसर्वस्वपात्रे
भवतु मम कुमारे गाढमुद्दामभक्तिः ॥

श्रीवत्सान्वयवार्धिकौस्तुभमणिर्विश्वेश्वराध्वर्यभू-
त्तस्याभूत्प्रथमः सुतः किल महादेवाध्वरीन्द्रः सुधीः ।
श्रीनारायणदीक्षितो यदनुजस्तस्याभवन्सूनव-
श्चत्वारः पदवाक्यमानानिपुणा वेदा हि मूर्ता इव ॥ २ ॥

ज्यायान्विश्वेश्वराध्वर्यथ विदितयशा वासुदेवाध्वरीन्द्रः
ख्यातश्श्रीरामचन्द्राध्वरकृदथ श्रीनिवासाध्वरीन्द्रः ।
तेषु ज्येष्ठस्य पुत्रो विरचितचयनानेकसंस्थाकसोम-
श्रीसुब्रह्मण्ययज्वा मम पितृचरणः सूत्रषट्कप्रवक्ता ॥ ३ ॥

अपामुपस्पर्शनमर्थसिद्धमुद्देशयागं परिषेचनादि ।
मन्त्रप्रतीके सकलञ्च मन्त्रं द्रव्यादिसङ्कल्पममि ब्रवीमि ॥ ४ ॥

कारिकास्थितमन्त्रश्च कात्स्न्येनैव विलिख्यते ।
सन्तः समीक्ष्य तदिदं मोदन्तां गतमत्सराः ॥ ५ ॥

इति श्रीयज्ञेश्वरदीक्षितकृतकारिकासन्धीकृत-
बौधायनकल्पसूत्रे अग्निचयनसूत्रं सम्पूर्णम् ॥

Subject : Kārikāsandhīkṛtabodhāyanaśrautaprayogavivṛti—Mahāgnicayana only.

Remarks :—The Ms. is in a fairly good condition.

॥ प्रकीर्णकारिकाशतकम् ॥

2640. PRAKĪRṆAKĀRIKĀŚATAKAM.

Burnell's Catalogue No. 9172 c.

Substance—Palm leaf. Size—16 × 1½ inches. Leaves—4 (58—61 out of 144). Lines—8 to a Page. Script—Grantha. No. of Granthas—120. Author—Veṅkaṭanātha Vājapeyayājin. Complete.

Beginning:

पर्वण्यमायामपि त्वाङ्गभूता
सौत्रामणीष्टात्र पयोग्रहेषु ।
षड्ढोतृहोमादिनिरूढतुल्यं
वेदिस्त्रिभागास्त्विह सोमवेदेः ॥

पीठद्वयश्चोत्तरवेदिकाले
स्वामैव चात्वालमृदा करोति ।
एकोऽत्र पूर्वेण च दक्षिणाग्निः
स्याद्दक्षिणेनोत्तरमे(वे)दिपन्यः ॥

उरुप्रथस्वेति कृतेऽथ वा तौ
निरूढतुल्योत्तरवेदिरत्र ।
अग्निप्रणीतौ च स दक्षिणाग्ने
संहृत्य बर्हिं निवपेत्खरे प्राक् ॥

वत्सानपाकृत्य परिस्त्रिणीत
पात्रप्रयोगे त्विह दोहपात्रम् ।
त्रीण्यूर्ध्वपात्राणि स तं पयोर्थः
सश्वेनपात्राणि पुरः प्रयुञ्ज्यात् ॥

End :

सर्वत्र चाद्यन्तप.........
इत्यादिकं वाक्यचतुष्टयं यत् ।
मध्यस्थमन्त्रेष्वनुषज्यते तत्
पद्वाक्यगास्तेन च सर्वमन्त्राः ॥
[चत्वारि] चत्वारि चत्वार्यनुशंसने तु
वाक्यानुपस्य ष्यादि(?) वात्र गाथा ।
स्यात् षोडशान्त्या नवसप्तचार्थे
केचित्त्वनूच्येतिरिहादिमान्त्ये ॥
सर्वेष्टका अङ्गुलिपर्वतुल्या
हिरण्यकलृप्ता अथ वा घृताक्ताः ।
उक्तप्रमाणा इह शर्कराश्च
सुशर्करा एव सदा तु तूष्णा ॥
चित्वैकमेषामपि काठकाना-
मनन्तरे पर्वणि वा दिने वा ।
सौत्रामणी च क्रियते तदङ्गं
यद्वेह मैत्रावरुणी पयस्या ॥

Colophon :

इति वात्स्यवेङ्कटनाथवाजपेययाजिविरचितं
प्रकीर्णकारिकाशतकं समाप्तम् ॥

Subject: Prakīrṇakārikāśataka—100 verses dealing with miscellaneous Śrautaprayogas.

Remarks :—The Ms. is in a decaying condition. For the other works contained herein see the list under Remarks on No. 2596. The author of this work is Veṅkaṭanātha Vājapeyin of (Śrī) Vatsa family. Dr. Burnell has not noticed this work though No. 9172 has been referred to by him.

॥ आपस्तम्बशुल्बोपधानकारिका ॥

2641. ĀPASTAMBAŚULBOPADHĀNA-KĀRIKĀ.

Burnell's Catalogue No. 9162 b. Page 18. Left column. Substance—Palm leaf. Size—$16\frac{1}{3} \times 1\frac{1}{4}$ inches. Leaves—14 (54—67). Lines—6 to a Page. Script—Grantha. No. of Granthas—300. Author—Tālavṛntanivāsin ?. Complete.

Beginning:

भाष्यमतानुसारेण शुल्बोपधानम् ॥

शुल्बोपधाने भेदः स्यादपरः श्येन एव तु ।
शिरः पुच्छात्मदेशस्थाष्षोडशोदीच्यरीतयः ॥
आद्या तुर्या पञ्चमी च सप्तमी द्वादशी तथा ।
चतुर्दशी षोडशी च शिरो श्रिया चयादिकाः(?) ॥
द्वितीयरीत्यां तिस्रोऽर्धाः षोडशीनां चतुष्टयम् ।
अध्या चाथ तृतीयस्यां तिस्रोऽध्याः षोडशीद्वयम् ॥
अध्या नैका तथा षष्ठ्यां त्रयोदश्यां तथैव च ।
द्वादशात्मनि षोडश्यः प्राच्यः पक्षौ तु सूत्रवत् ॥
चतुस्त्रिंशन्मताः पुच्छे चतुःषष्टिरथात्मनि ।
षण्मूर्ध्नि दक्षिणे पक्षे द्विपञ्चाशत्तथोत्तरे ॥
एवं द्विशतसङ्ख्यास्ता अष्टौ च प्रथमा चितिः ।
तृतीये पञ्चमेऽप्येवं प्रस्तारेक्रममी(ई)रितः ॥

* * *

(Leaf 59)

एवं द्वितीयश्येनस्य द्विषाहस्त्रे प्रकीर्तितः ।
उपधानविधिः सम्यक्प्रीयतां पार्वतीपतिः ॥

हरिः ॐ द्विषाहस्रे द्विप्रस्तारश्चितयो भवत(?)त्रिषाहस्रे त्रिः प्रस्तार इति वचनात्साहस्रे पञ्चचितयोऽपि पञ्चप्रस्तार एव ॥

* * * *

(Leaf 61)

मन्त्रे विभज्यमानोंशो न्यूनो वा यदि वाधिकः ।
नैतावतात्र दोषः स्याद्गुणभेदभयात्सदा ॥
हरिः ॐ द्विषाहस्रे परश्येने वक्ष्ये मन्त्रोपधिक्रमम् ।
शुल्बोपधाने बहवो विकल्पाः सन्ति शास्त्रतः ॥

* * * *

(Leaf 65)

एवं द्वितीयश्येनस्य द्विषाहस्रे प्रकीर्तिताः ।
उपधानविधिः सम्यक्प्रीयतां पुरुषोत्तमः ॥
हरिः ॐ त्रिषाहस्रप्रयोगे तु प्रयोगक्रम उच्यते ।
द्वादशोपसदस्तत्र पञ्चैव चितयः क्रमात् ॥

End:

द्वादशेऽह्नि तु तत्रैव प्रस्तारे शेषपूरणम् ।
पूर्णापश्चादुतेत्यादि विकर्ण्यन्ताश्शतं क्षिपेत् ॥
सप्तलोकं पृणाम्यिस्त्रोपधाय चितिपूरणम् ।
चितौ हिरण्यमित्यादिपक्त्याग्निरभिमर्शते ॥
एवमेवोपधातव्यामिति न्यायविदोऽब्रुवन् ।
यदस्त्यन्यः प्रकारश्च विद्वद्भिः परिमृश्यताम् ॥

Colophon: Nil.

हरिः ॐ शुभमस्तु ॥

Subject: Śulbopadhānakārikā on Cayana.

Remarks: —The Ms. is in fairly good condition. For the other

works contained herein see the list under Remarks on No. 2588.

॥ आपस्तम्बशुल्बोपधानकारिका ॥

2642. ĀPASTAMBASULBOPADHĀNAKĀRIKĀ.

Burnell's Catalogue No. 9164 b. Page 18. Left column. **Substance**—Palm leaf. Size—$17\frac{3}{4} \times 1\frac{1}{2}$ **inches.** Leaves—8 (29-36). Lines—8 to a Page. Script—Grantha. No. of Granthas—300. Author—Tālavṛntanivāsin (?). Complete.

Beginning, end, colophon and subject—Same as No. 2641.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see the list under Remarks on No. 2589.

॥ आपस्तम्बपौण्डरीककारिका ॥

2643. ĀPASTAMBAPAUṆḌARĪKAKĀRIKĀ.

Burnell's Catalogue No. 9162 d. Page 18. Left column. **Substance**—Palm leaf. Size—$16\frac{1}{3} \times 1\frac{1}{4}$ inches. Leaves—5 (190-194). Lines—6 to a page. Script—Grantha. No. of Granthas—100. Author—(?). Complete.

Beginning :

पौण्डरीककारिका ॥

प्रयोगः पौण्डरीकस्य साग्निचित्यस्य कर्मणः ।

शिशिरे वाथ सप्तम्यां चैत्रे शुक्लस्य दीक्षयेत् ॥

पूर्वं तु पर्वणोरेकाष्टकायां वा गु(?)रुं भवेत् ।

सोमेन वक्ष्ये । अभ्यासवश्यषडहश्छन्दोयमयुक्तास्त्रित-

यस्तोत्रीयानुरूपान्तरिक्षश्चतुष्टोमाग्निष्टोमविश्वजिदतिरात्रेण रथन्तरं बृहद्रथन्तरं बृहत् बृहद्रथन्तरसर्वपृष्ठेन साग्निचित्येन पौण्डरीकेणाश्वशतायुतदक्षिणेन ।

फलमाप्ति च सर्वर्द्धिः स्वर्गे वा परमेष्ठिता ।
सोमप्रवाकवरणाद्याग्निकं सोमिकं तथा ॥
उखाकृतिश्च वायव्यं शुक्रे बोधायनोऽब्रवीत् ।

End :

समिष्टयजुषाकाले त्वतिरात्रे समापनम् ।
साग्निचित्ये यदा (सप्तकृत्वस्त्वाप्यायनं भवेत् ॥
अन्त्यवर्जमतिप्रैषं प्रशास्ताहरहर्वदेत् ।)
सुब्रह्मण्येति चान्ते स्यादाग्नीध्रोप्येवमेव हि ॥
संस्थितेऽहनि (षष्ठे तु ब्राह्मणो वाग्विसर्जनम् ।
पत्न्या) पत्यु (अप्सु)दकं दद्युः पानार्थं परिकर्मिणः ॥
रात्रौ....नाद्गृहीत्वाहवनीये (समिधां निधिः ।
यष्टिर्त्विजः सर्पिराज्यैः)षडहान्ते तु भोजयेत् ॥
दिने दिने परिहरेन्निशायां वसतीवरीः ।
(इत्यादिसोमिकं कर्म सुब्रह्मण्यां) विना निशि ॥
महारात्रप्रबोधादि नित्यं सोमिकमाचरेत् ।
अहन्यहन्ये(वमेव धृतान्यक्तानि सर्वशः ॥
विश्वजित्यतिरात्रे तु पृष्ठा)नां धर्ममाचरेत् ।

Colophon :

साग्निचित्यपौण्डरीककारिका समाप्ता ॥ हरिः ॐ ॥

Subject : Pauṇḍarīkakārikā. (Āpastamba).

Remarks :—The Ms. is in a fairly good condition. For the other **works** contained herein see the list under Remarks on No. **2588.**

॥ आपस्तम्बपौण्डरीककारिका ॥

2644. ĀPASTAMBAPAUṆḌARĪKAKĀRIKĀ.

Burnell's Catalogue No. 9164 d. Page 18. Left column. **Substance**—Palm leaf. Size—$17\frac{1}{4} \times 1\frac{1}{2}$ inches. **Leaves**—2 (185—186). Lines—8 to a Page. Script—Grantha. No. of Granthas—100. Author—? Complete.

Beginning, end, colophon and subject—Same as No. 2643.

Remarks :—The Ms. is in a fairly good condition. For the other works contained here,in see the list under Remarks on No. 2589. On the last page is given :—

“ குஞ்ஞவிள்ளயில் அயநம். க—மு விஷாஸஹஸு ௦ ௬௨. வாஜ.
வெயம் ௬௭. காாவாஜவெய. ௪௪. ஶாஜவஷெயம். ௪௫
ஜொவிஷவாாம் சாமு ஶா ஷூியள்.”

The scribe and the original owner of this Ms. is one Cāmu-śāstrin of Govindapura.

॥ बोधायनाग्निचयनकारिका ॥

2645. BODHĀYANĀGNICAYANAKĀRIKĀ.

Burnell's Catalogue No. 3756. Page 25. Right column. Substance—Paper. Size —$11\frac{4}{5} \times 4\frac{4}{5}$ inches. Sheets—5. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—?. Complete.

Beginning :

श्रीगणेशाय नमः ॥

श्रीवेङ्कटेशाय परमगुरवे नमः ॥

बोधायनीयाद्यचितेर्मन्त्रोपहितिरुच्यते ।
ऐन्द्रीपुच्छान्तमध्यस्थचतुर्थ्योर्दक्षिणा भवेत् ॥ १ ॥
विभक्तिर्दक्षिणे पक्षे पक्षाग्नीया तु पश्चिमा ।
आत्ममध्याध्र्ययोः पश्चाच्चतुर्थीमण्डलेष्टका ॥ २ ॥

*   *   *

प्रथमस्याश्चितेरेवं मन्त्रोपहितिरीरिता ।
पञ्चम्यास्तु चितेरत्र मन्त्रोपहितिरुच्यते ॥ २६ ॥

॥ पञ्चमप्रस्तरकारिका ॥

End:

मण्डलामध्ययोः पश्चाद्रेतःसिग्दक्षिणा ततः ।
विकर्णा चोत्तरा ज्ञेया मन्त्रास्ते द्विशतं मताः ॥ ४५ ॥

॥ बोधायनचयनपञ्चमप्रस्तरकारिकाः ॥

अथोपरागप्रायश्चित्तम् ॥ त्रिकाण्डीवचनम् ।
अन्वाधानेष्टिमध्ये तु ग्रहणं चन्द्रसूर्ययोः ।
प्रायश्चित्तं मुनिश्रेष्ठाः कथं कुर्वन्ति याज्ञिकाः ॥
सोमोपरागे जुहुयादप्सु सोम इति तृचा ।
आप्यायस्व ऋचा चैव सोमयास्त इति द्विजः ॥
सूर्योपरागे जुहुयादुदुत्यं जातवेदसम् ।
आसत्येनोद्वयञ्चैव त्रयो मन्त्रा उदाहृताः ॥

Colophon :

इत्युपरागप्रायश्चित्तम् ॥ श्रीरस्तु ॥

Subject : Bodhāyanāgnicayanakārikā. This Ms. comprises the following three sections.

1	प्रथमप्रस्तारकारिका	1—26	Verses

2	पञ्चमप्रस्तारकारिका	1—45	Verses
3	उपरागप्रायश्चित्तम्	2	"

Remarks :—The Ms. is in good condition.

॥ बोधायनाग्निचयनकारिका ॥

2646. BODHĀYANĀGNICAYANAKĀRIKĀ.

Burnell's Catalogue No. 3755. Page 25. Right column. **Substance**—Paper. Size—$10\frac{1}{8} \times 4\frac{3}{8}$ inches. Sheets—8. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—26. Author—(?) Prathamaprastāra only.

Beginning—Same as No. 2645.

End:

आत्ममध्ये तृतीयान्त्यात्त्वङ्गान्येतानि पञ्च वै ॥ २३ ॥
सव्यतिर्नामपार्द्यां वायव्यार्ध्यापरा च या ।
प्राजापत्या भवेत्पूर्वा पश्चिमावृषभाभिधा ॥
चत्वारिंशच्च श्विष्टाः स्युः क्रमाल्लोकंपृणा मताः ।
प्रथमस्याश्चितेरेवं मन्त्रोपहितिरीरिता ॥
पञ्चम्यास्तु चितेरत्र मन्त्रोपहितिरुच्यते ।

Colophon : Nil.

Subject: Bodhāyanāgnicayanakārikā. Prathamaprastāra.

Remarks :— The Ms. is in good condition.

॥ बोधायनाग्निचयनकारिका ॥

2647. BODHĀYANĀGNICAYANAKĀRIKĀ.

Burnell's Catalogue No. 3754. Page 25. Right column.

Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{1}{8}$ inches. Sheets—4. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—44. Author—(?) Pañcamaprastāra only.

Beginning :

श्रीगणेशाय नमः ॥

आत्मनः पूर्वभागस्थे द्वे रीत्यौ शिर एव च ।
तयोश्च पश्चिमा रीतिश्चतुर्ध्यस्तत्र सप्तकाः ॥
निर्नामोदग्दक्षिणौ सभागस्थाः पादिकार्धिकाः ।
प्राची दिगेषा विज्ञेया त्रिपश्चाशदिहेष्टकाः ॥ २ ॥
दक्षयक्षोदक्श्योण्यन्त्यसंस्थे अर्ध्या चतुर्थिके ।
विहाय दक्षिणादिक्स्याचत्वारिंशत्स्युरिष्टकाः ॥ ३ ॥

End—Same as No. 2645.

Colophon :

बोधायनचयनपञ्चमप्रस्तारः ॥

Subject : Bodhāyanāgnicayanakārikā — Pañcamaprastāra only.

Remarks :—The Ms. is in good condition.

॥ चयनकारिका ॥

2648. CAYANAKĀRIKĀ.

Burnell's Catalogue No. 9519 e.

Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{5}{8}$ inches. Leaves—2. Lines—8 to a Page. Script—Grantha. No. of Granthas—50. Author—(?) Incomplete.

Beginning :

एकप्रमाणारज्जुः स्यात्तावानेवागमो भवेत् ।

आगमार्धेषु शङ्कुः स्यादन्तरार्धनिरञ्छनम् ॥ १ ॥
मध्यात्कोष्ठामपाया.. ... पार्श्वतः... ।
(अति)रिक्तवृतीयेन सह मण्डलमालिखेत् ॥ २ ॥
प्राचीं निश्चित्यतत्पश्चान्मध्यान्मन्वङ्गुलेन तु ।
सूत्रेण भ्रमयेत्तत्रगार्हपत्यः स उच्यते ॥ ३ ॥

End:

पक्ष्यास्त्रिंशत्समद्धीयाः सन्न्याद्याः स्वर्जिदन्तकाः ।
सपत्नहगणाश्चाद्याः संवत्सरगणान्तिकाः ॥
उदक्पक्ष्याश्चतुस्त्रिंशत्समद्धी...प्रकीर्तिताः ।
आद्यामध्यान्च पूर्वस्यांश्चतुर्थीमवशिष्य च ॥
उत्तमौ तु गणौ पुच्छेविंशतिस्तार्षीष्टकाः ।
ऋषीष्टकानां पश्चात्तु अष्टाविंशतिरिष्टकाः ॥

Colophon: Nil.

Subject: Cayanakārikā—a fragment only.

Remarks: —The Ms. is in a much decaying condition. For other works contained herein see the Remarks under 1972. Dr. Burnell has not noticed this work though No. 9519 has been referred to by him.

॥ बोधायनविहारकारिका ॥

2649. BODHĀYANAVIHĀRAKĀRIKĀ.

J. L. Collection No. 269. Substance—Paper. Size—$9\frac{1}{2}\times4\frac{1}{4}$ inches. Sheets—4. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ।
अथ बौधायनविहारकारिका ॥

कथितं लक्षणं शुल्वं कल्पे बौधायनीयके ।
द्वैधे शुल्बान्तरे भाष्ये व्याख्यायां कारिकासु च ॥
वेद्यग्निधिष्णियानाञ्च दर्शयज्ञे तदुच्यते ।
अरत्निमात्रं विज्ञेयमग्नेरायतनं शुभम् ॥
षड्विंशदङ्गुलायामं विंशत्यङ्गुलमेव वा ।
हस्तप्रादेशकायामं बाह्वोरन्तरकायतम् ॥
पिशिलं षड्विधं प्रोक्तमग्न्यागारार्थमेव वै ।
समस्थोद्बाहुकेष्वंशजिनांशोङ्गुलमिच्छतः ॥

End:

मध्यचिह्नचिते पाशौ शङ्क्वोः क्षिप्याथ कर्षयेत् ।
मध्यङ्केनोभयत्राङ्के शङ्कूरोप्याथ शङ्कवः ॥
चत्वारः स्युश्चतुःकोणास्तत्क्रयस्ताः प्रकीर्तिताः ।
वेदिमध्ये खनेच्छङ्कुं तस्य प्रागादिदिक्क्रमात् ॥
अग्न्यागारस्य कोणार्धाच्छङ्कुसप्तदशाङ्गुलौ ।
चतुःसूत्रैर्भवेद्वेहं पैतृकाहवनीयकम् ॥
वेदेरीशाननैर्ऋत्योरुत्करास्तः पदान्तरे ।
एवं प्रपञ्चिता वेदिः पैतृकी शुल्बमानतः ॥

Colophon:

इति बोधायनशुल्बकारिका समाप्ता ॥

श्रीनृसिंहार्पणमस्तु ॥

Subject: Bodhāyanavihārakārikā or Bodhāyanaśulbakārikā.

Remarks :—The Ms. is in good condition.

॥ आश्वलायनश्रौतप्रायश्चित्तप्रयोगः ॥

2650. ĀŚVALĀYANAŚRAUTAPRĀYAŚCITTA-PRAYOGAḤ.

Burnell's Catalogue No. 3860. Page 27. Right column. Substance—Paper. Size—9 × 4⅜ inches. Sheets—33. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Āpadeva (?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

सर्वशास्त्रार्थमर्यादापरीक्षणविचक्षणात् ॥

अथाश्वलायनानां श्रौतप्रायश्चित्तान्युच्यन्ते ॥

तानि च विहिताकरणेऽन्यथाकरणे च भवन्ति। मुख्याभावे प्रतिनिधेरुपादानम् । यथा द्रव्यदेशकालदक्षिणर्त्विक्पत्नीप्रमुखानां मुख्यानामभावे बौधायनाद्युक्तयथोचितप्रतिनिधीनादाय कर्म कार्यम् । न तत्र प्रायश्चित्तानि तानि च निमित्तानन्तरं कर्तव्यानीत्युत्सर्गः । ब्रह्मवत्सु कर्मसु इष्टिवर्जितानि प्रायश्चित्तानि ब्रह्मा कुर्यात् । इतराण्यध्वर्या(र्य्वा)दयः कुर्युरित्युत्सर्गः । क्वचिदपवादं वक्ष्यामः । अत्र प्रायश्चित्तानि नैमित्तिककर्मविशेषा अभिधीयन्ते । अथान्वाहिताग्नेः प्रयाणविधिः ॥

End:

अथ प्रायश्चित्तचन्द्रिकानुसारेण प्रयोगः ।

अध्वर्युः कृतस्नानादिक्रियः पवनमन्त्राचमनमन्त्रप्रोक्षणानि यजमान(ः)पत्न्या सह कृत्वा वेद्युत्तरयोर्मध्यतः

"इडा देवहूः" इत्यादि "पितरोऽनुमदन्तु" इति चतुःकृत्वो जपन्नेत्य गार्हपत्यस्य पश्चादुपविश्य "याः पुरस्तात्" इत्यादि "निविष्टम्" इत्यन्तं जपित्वा यजमानानुज्ञया पौर्णमासेष्ट्या यक्ष्ये इति सङ्कल्य सर्वं क्रमेण कुर्यात् * * अन्वाहार्यं पृथक् पृथक् प्रतिगृह्णीयात् । यजमाने कर्तरि नान्वाहार्यः। ततः आसीनः अनुयाजानिष्ट्वा स्रुग्विमोकान्तं कृत्वा स्वयमेव वेदमादाय पत्नीसंयाजानिष्ट्वा पूर्ववदाज्येलां प्राश्य शेषं समापयेत् ॥

Colophon :

इत्यैष्टिकप्रायश्चित्तानि समाप्तानि वृद्धदेवीयानि ॥ श्रीः ग्रन्थसङ्ख्या ॥ ५५० ॥

श्रीः ॥ श्रीरामार्पणमस्तु ॥ श्रीः ॥

Subject : Śrautaprāyaścittaprayoga belonging to the Āśvalāyana school of the Ṛg-Veda. This Ms. comprises of the following sections.

1 आहिताग्नेः प्रयाणविधिः

2 आहवनीयस्य बहिर्गमनप्रायश्चित्तम्

3 प्रवासमृतस्याहिताग्नेर्विशेषः

4 हविर्व्यापत्तिप्रायश्चित्तानि

5 सर्वानुगतिप्रायश्चित्तानि

6 वह्निषु सत्सु जीर्णारणिप्रायश्चित्तम्

7 प्रायश्चित्तेष्टिप्रत्याम्नायः

8 ऐष्टिकप्रायश्चित्तम्

9 प्रायश्चित्तचन्द्रिकानुसारेण प्रयोगः ।

Remarks:—The Ms. is in good condition. On the title page is

given :—'शामजीनायकस्येदं पुस्तकम्' i. e. it originally belonged to Śāmajīnāyaka.

॥ आश्वलायनश्रौतप्रायश्चित्तप्रयोगः ॥

2651. ĀŚVALĀYANAŚRAUTAPRĀYAŚCITTA-PRAYOGAḤ.

J. L. Collection No. 270. Substance—Paper. Size—9×3⅗ inches. Sheets—30. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Āpadeva. Aiṣṭika prāyaścitta only.

Beginning:

श्रीगणेशाय नमः ॥

श्रीलक्ष्मीनृसिंहायनमः ॥

आश्वलायनस्य बौधायनमवलम्ब्य दर्शपूर्णमासादीनि कर्माणि कुर्वतः सुगमपक्षमवलम्ब्यैष्टिकानि प्रायश्चित्तानि कानिचिल्लिख्यन्ते । अन्वाधानानन्तरं दक्षिणाग्निनाशे शुचिर्भूत्वा विहारं प्रविश्य गार्हपत्याग्निं प्रणीय प्राणानायम्य दक्षिणाग्निनाशनिमित्तं प्रायश्चित्तं करिष्ये इति सङ्कल्प्य गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतङ्गृहीत्वा हवनीये काश्चित्समिधमाधाय जुहोति ॥

End:

तत आसीनोऽनूयाजानिष्ट्वा स्रुग्विमोकान्तं कृत्वा स्वयमेव वेदमादाय पत्नीसंयाजानिष्ट्वा पूर्ववदाज्येलां प्राश्य शेषं समापयेत् ॥

॥ इत्यैष्टिकप्रायश्चित्तानि ॥

श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥

अथ यस्य पुनः श्रौताग्निः स्मार्ताग्निश्च भवतः तस्यानुष्ठाने विशेषमाह स्मृतिचन्द्रिकायां भरद्वाजः—

'होमं वैतानिके कृत्वा स्मार्तं कुर्याद्विचक्षणः ।
स्मृतीनां वेदमूलत्वात्स्मार्ते केचित्पुनर्विदुः ॥'

शातातपोऽपि—

'श्रौतं यत्नात्स्वयं कुर्यादन्योऽपि स्मार्तमाचरेत् ।
अशक्तौ श्रौतमप्याग्निः कुर्यादाचरमन्तत इति' ॥

Colophon:

इत्यापदेवीयैष्टिकप्रायश्चित्तानि समाप्तानि ॥

श्रीकृष्ण गोपाल हरे मुरारे कंसारे गोविन्द गरुडध्वज पीताम्बरधराच्युत शार्ङ्गिन्स्वामिन्दयालो श्रीळक्ष्मीव्य(वे)ङ्कटेशाय नमः ॥

Subject: Śrautaprāyaścittaprayoga belonging to the Āśvalāyana school of the Ṛg-Veda, giving out chiefly the expiatory ceremonies connected with Iṣṭis beginning with Darśapūrṇamāsa.

Remarks:—The Ms. is in good condition. On the title page is given:—'आपदेवीयैष्टिकप्रायश्चित्तमभिचिद्गङ्गाधरदीक्षितानाम्'।

॥ आश्वलायनश्रौतप्रायश्चित्तप्रयोगः ॥

2652. ĀŚVALĀYANAŚRAUTAPRĀYAŚCITTA-PRAYOGAḤ.

Burnell's Catalogue No. 4054. **Page** 27, Right column.

Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{7}{10}$ **inches**. Sheets—11. Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—630. Author—Anantadeva. Agnihotraprāyaścitta only.

Beginning:

श्रीगणेशाय नमः ॥

अथ प्रायश्चित्तानि ।

दक्षिणाग्नेः प्रणयनात्प्रागन्वाधानार्थमुद्धृतस्याहवनीयस्य दक्षिणाग्नेर्वानुगमनेऽनाज्ञातत्रयजपो गार्हपत्यात्पुनः प्रणयनम् । प्रणीते दक्षिणाग्नावुद्धृतमात्रस्याहवनीयस्य प्रणयनात्प्रागनुगमे दक्षिणाग्नौ भुवः स्वाहेति हुत्वा पुनर्गार्हपत्यात्प्रणयनम् । आहवनियप्रणयनात्प्राग्गार्हपत्यस्यन्वाधानात्प्रागाहवनीयस्य वानुगमे तत्तदवक्षाणेभ्यो मथनम् । अवक्षाणाभावे नित्यारणी गार्हपत्यभस्मना संपृश्य मन्थेत् ।

End:

वैतानाग्निनागारदाहेऽग्नये क्षामायेष्टिः । वैतानाग्नेः शवाग्निसंसर्गेऽग्नये शुचय इष्टिः । गार्हपत्याहवनीययोर्मिथः संसर्गेऽग्नये वीतय इष्टिः । तदुभयसंसर्गभिन्ने वैतानाग्न्योः कयोरपि मिथः संसर्गेऽग्नये विविचय इष्टिः । वैतानाग्नेः पचनाग्निसंसर्गेऽग्नये संसर्गायेष्टिः । वैद्युतेन संसर्गे अग्नयेऽप्सुमत इष्टिः । अत्र याज्यानुवाक्याः सूत्रे द्रष्टव्याः । इष्टिस्थाने पूर्णाहुतयो वा । इत्यग्न्युपघातप्रायश्चित्तम् ॥ पूर्णाहुतौ द्वादशगृहीतमष्टगृहीतं चतुर्गृहीतं स्रुवाहुतिर्वेति चत्वारः पक्षाः ॥

Colophon:

आश्वलायनमुन्युक्तमग्निगोचरमीरितम् ।
प्रायश्चित्तमनन्तेन तेन तुष्यतु यज्ञभुक् ॥
श्रीगणेशाय नमः ॥ ईश्वरार्पणमस्तु ॥ ओम् ।

Subject: Āśvalāyanaśrautaprāyaścittaprayoga, giving out in detail the expiatory ceremonies in the Nityāgnihotra only.

This Ms. contains the following important sections:—

1 अग्न्यनुगतप्रायश्चित्तम् ॥
2 अन्वाहितप्रायश्चित्तम् ॥
3 अनुगतप्रायश्चित्तम् ॥
4 अग्निहविःपातप्रायश्चित्तम् ॥
5 उपघातप्रायश्चित्तम् ॥
6 अग्निव्यवायप्रायश्चित्तम् ॥
7 पुनराधाननिमित्तानि ॥
8 कालातिपत्तिप्रायश्चित्तम् ॥
9 बहिःपातप्रायश्चित्तम ॥
10 व्यवायप्रायश्चित्तम् ॥
11 साग्निप्रयाणविधिः ॥
12 अग्न्युपघातप्रायश्चित्तम् ॥

Remarks:—The Ms. is in good condition. On the title page is given:—'इदं पुस्तकं दिवाकरस्य -- ' ('भास्कररायस्येत्यर्थः ! ॥) The Ms. originally belonged to one Divākara.

॥ आश्वलायनश्रौतप्रायश्चित्तप्रयोगः ॥

2653. ĀŚVALĀYANAŚRAUTAPRĀYAŚCITTA-PRAYOGAḤ.

J. L. Collection No. 271. Substance—Paper. Size—$8\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Anantadeva. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

आज्यभागानन्तरं व्रतलोपप्रायश्चित्तं करिष्यामीति यजमानः। "त्वमग्ने व्रतपा असि देव आमर्त्येष्वा। त्वं यज्ञेष्वीड्यः ॥ यद्वो वयं प्रमिनामव्रतानि विदुषां देवा अविदुष्टरासः। अग्निष्टद्विश्वमापृणोति विद्वान्। एभिर्देवानृतुभिः कल्पयाति स्वाहा॥ द्विः। अग्नये व्रतपतय इदं न मम। कपालानामनभिप्रथने स्रुवाहुतीर्जुहोति ॥

End—Same as No. 2652

Colophon:

आश्वलायनमुन्युक्तमग्निगोचरमीरितम्
प्रायश्चित्तमनन्तेन तेन (प्रीणातु) यज्ञभुक् ॥

श्रीकृष्णार्पणमस्तु प्रायश्चित्तं समाप्तम् ॥

Subject. Śrautaprāyścittaprayoga—according to the Āśvalāyanīyas, containing Darśapūrṇamāsa and other prāyaścittaprayogas.

Remarks:—The Ms. is old and is in good condition. In this Ms. the Darśapūrṇamāsaprāyaścittaprayoga is given instead of the first seven sections given under subject on No. 2652.

॥ प्रायश्चित्तकुतूहलम् ॥

2654. PRĀYAŚCITTAKUTŪHALAM.

J. L. Collection No. 272. Substance—Paper. Size—9 × 3⅝ inches. Sheets—50. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Raghunātha. Ādhāna and Punarādhānaprāyaścittas only.

Beginning:

श्रीलक्ष्मीनृसिंहाय नमः ॥

श्रीशमीशमजं विष्णुं जिष्णुमच्युतमव्ययम् ।
स्मरतां नास्त्यनासाद्यं तमाद्यं पुरुषं नुमः ॥ १ ॥

यस्य स्मरणमात्रेण तूलराशिरिवाग्निना ।
नश्यत्यखिला पापौघस्तमनन्तमुपास्महे ॥ २ ॥

अथ खलु सकलकर्मणां पुरुषाधिकारित्वात्तस्य च भ्रान्तिप्रमादयुक्तत्वेनाकरणान्यथाकरणाभ्यां कर्मणोर्वैगुण्यापत्तेः कथमपि फलानुदयशङ्कयानुष्ठानरूपाप्रामाण्यप्रसक्तौ प्रायश्चित्तं निरूप्यते । तदाहुः—

"प्रायोविनाशपर्यायः स चाप्यकरणाद्भवेत् ।
अन्यथा करणाद्वापि तत्सन्धाचित्तिरुच्यते" इति ॥

End:

भिन्ना एवाहिताग्निक्षत्रियधर्मा भिन्नाश्च ब्राह्मणानाम् । यथाहाश्वलायनः ॥ राजन्यश्चाग्निहोत्रं जुहुयात्तपस्विने ब्राह्मणायेतरं कालं भक्तमुपहरेद्दतसत्यशीलः ॥ सोमसूः सदा जुहुयादिति ॥ च शब्दो वैश्योपलक्षणार्थ इति वृत्तिकृत् । तथा सोमयागे क्षत्रियस्य यजमानस्य सोमपानाभावः श्रूयते न ब्राह्मणस्य । तथा "राजकार्यं पुरोहित" इति वचनेन क्षत्रियकर्मणां पुरोहितकर्तृकताया एवाम्नातं तद्धोतृता चेति । एतेन बले रामतीर्थयात्रायां पत्नीपुरोहिताभ्यामाहरणमग्नीनाञ्च व्याख्यातम् ।

Colophon:

इत्याहिताग्निधर्माः ।

अवादीत्थमनन्तेन गुरुणा करुणाब्धिना ।

आधानगोचरं प्रायश्चित्तं तत्र निरूपितम् ॥

इत्यनन्तदेवीयरघुनाथविरचिते **प्रायश्चित्तकुतूहले**

आधानप्रकरणं समाप्तम् ॥

श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥

Subject: Prāyaścittakutūhala—a Prāyaścitta treatise according to the Āśvalāyana school of Ṛgveda, giving the following important topics:—

I सामान्यप्रकरणम्

a प्रायश्चित्तविचारः	Sheets	1—6
b परिभाषा	,,	7—16
c ऋत्विग्विचारः	,,	16—18
d विश्वन्तविचारः	,,	18—20
e समिद्विचारः	,,	21—22
f प्रतिनिधिविचारः	,,	22—24
II आधानप्रायश्चित्तप्रकरणम्	,,	24—30
III पुनराधानप्रायश्चित्तप्रकरणम्	,,	30—50
a पुनराधाननिमित्तानि	,,	30—33
b अग्निद्वयसंसर्गविधिः	,,	33—36
c आहिताग्निधर्माः	,,	36—50

Remarks:—The Ms. is in good condition. The author of this work is Raghunātha, a disciple of Anantadeva

॥ प्रायश्चित्तकुतूहलम् ॥

2655. PRĀYAŚCITTAKUTŪHALAM.

J. L. Collection No. 273. Substance—Paper. Size—$9\frac{1}{10} \times 4\frac{1}{10}$ inches. Sheets—35. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Raghunātha. Complete.

Beginning, end, colophon and subject—Same as No. 2654.

Remarks :—The Ms. is in good condition.

॥ प्रायश्चित्तकुतूहलम् ॥

2656. PRĀYAŚCITTAKUTŪHALAM.

Burnell's Catalogue No. 4051. Page 27. Right column. Substance—Paper. Size—$9\frac{7}{10} \times 4\frac{3}{10}$ inches. Sheets—33. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—775. Author—Raghunātha. Agnihotraprāyaścitta only.

Beginning :

श्रीगणेशाय नमः ॥

नमो वेतण्डतुण्डाय शशिखण्डाङ्कधारिणे ।
हारिणे सर्वविघ्नानां पार्वतीप्रियसूनवे ॥ १ ॥

अथाग्निहोत्रप्रायश्चित्तानि । तस्य विहरणपूर्वकत्वात्तत्कालोऽभिधीयते । तत्र कात्यायनः—

'सूर्ये तु शैलमप्राप्ते षट्त्रिंशद्भिरिहाङ्गुलैः ।
प्रादुष्करणमग्नीनां प्रातर्भासामदर्शनम् ॥' इति ॥

प्रयोगपारिजाते परिशिष्टे—'अस्तमिते आदित्ये

सायमग्नेः प्रादुष्करणं उदिते प्रातरिति । अस्तमिते अस्तङ्गच्छति उदिते उदयङ्गच्छतीति व्याख्यातन्तेनैव न चैतत्स्मार्तपरम् । श्रौतत्वपराह्णे गार्हपत्यं प्रज्वाल्येति सूत्रकृता भगवदाश्वलायनेन विशिष्याभिधानात् । अपराह्णोऽह्नश्चतुर्थोभाग इति वृत्तिकृद्विवरणाच्चेति वाच्यम् ॥

End :

यथाह मण्डनः—

'रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा ।
नित्यं नैमित्तिकं कुर्यात्काम्यं कर्म न किञ्चन' ॥ इति

अनेनागतिकगमनविधिरप्यनुज्ञातो भवति । यत्तु—

'रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा ।
प्रवसन्नग्निमान्विप्रः पुनराधानमर्हति' ॥ इति वचनं तदग्नियुक्तस्य गमननिषेधकम् । अन्यथा अग्निमत्पदस्य वैय्यर्थ्यात् । यानि तु सूतकादौ प्रवासविधानादिनिषेधकानि कुत्रचित् कैश्चित्यग्य(ज्य)न्ते वचनानि तानिस्मार्तविषयाणीति बोध्यम् ॥

Colophon :

अवादीत्थमनन्तेन शिष्टेष्टजनतुष्टये ।
प्रायश्चित्तविधिर्हौम्यस्स संक्षेपान्निरूपितः ॥

इत्येवं रघुनाथेन प्रायश्चित्तकुतूहले ।
निर्मिते वितते हौम्यप्रायश्चित्तविवेचनम् ॥

Subject: Śrautaprāyaścittakutūhala—a prayoga treatise belonging to the Āśvalāyana school of the Ṛg-Veda giving out the prayoga of the chief expiatory ceremonies connected with Agnihotra and other Homas

Remarks:—The Ms. is in good condition.

॥ प्रायश्चित्तकुतूहलम् ॥

2657. PRĀYŚCITTAKUTŪHALAM.

Burnell's Catalogue No. 4052. Page 27. Right column. Substance—Paper. Size—$9\frac{1}{4} \times 4\frac{3}{8}$ inches. Sheets—58. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—775. Author—Raghunātha ?. Complete.

Beginning, end, colophon and subject—Same as No. 2656.

Remarks :—The Ms. is in good condition.

॥ प्रायश्चित्तकुतूहलम् ॥

2658. PRĀYAŚCITTAKUTŪHALAM.

Burnell's **Catalogue** No. 4056. Page 27. Right column. **Substance**—Paper. **Size**—$10\frac{5}{8} \times 4\frac{5}{8}$ inches. **Sheets**—41. **Lines**—9 to a Page. Script—Devanāgarī. No. of Granthas—760. Author—Raghunātha. Incomplete (wants beginning).

Beginning :

"(ज्वा)लयेदपराह्णेऽग्निमस्तं याते दिवाकरे" इति, कारिकव्याख्यायामपि अत्रापराह्णपद(म)स्तमयात्पूर्वकालीन दि(न) शेष वाचक इति स्पष्टमेवोक्तमिति न कोऽपि विरोधः । तस्मात्पराह्णे सौकर्यार्थं प्रज्वाल्यास्तमय(ये)सन्निहितकाल एवोद्धरणं कार्यमिति सिद्धम् । अस्य चोद्धरणस्य यः कर्ता स ए(व) होमस्यान्यत्र यजमानात् होम-

सङ्कल्पश्चोद्धरणात्पूर्वमेव कार्यः ॥

॥ अथानुद्धरणप्रायश्चित्तम् ॥

तत्र सायं यथा भगवानाश्वलायनः— 'यद्याहवनीयमप्रणीतमभ्यस्तमियात् बहुविद्ब्राह्मणोऽग्निं प्रणयेद्धैर्हिरण्येऽग्रतो ह्रियमाणः' इति । 'कालात्ययेन शेषः' इति च ब्राह्मणग्रहणं बहु विद्वत्वेऽपि जात्यन्तरनिवृत्त्यर्थमिति वृत्तिकृत् ॥

End, colophon and subject—Same as No. 2656.

Remarks:— The Ms. is in good condition. About nine granthas are wanting in the beginning of this Ms. After the colophon the following verse is given—

अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनोऽथ ऋत्विजः ।
कर्तारं दक्षिणाहीनो हन्ति यज्ञो रिपुर्भवेत् ॥

॥ प्रायश्चित्तकुतूहलम् ॥

2659. PRĀYAŚCITTAKUTŪHALAM.

Burnell's Catalogue No. 4057. Page 27. Right column. Substance—Paper. Size—11 × 4¾ inches. Sheets —39. Lines—10 to a Page Script—Devanāgarī. No. of Granthas—760. Author—Raghunātha. Incomplete.

Beginning, end, colophon and subject—Same as No. 2656.

Remrks :—The Ms. is in good condition.

॥ प्रायश्चित्तकुतूहलम् ॥

2660. PRĀYAŚCITTAKUTŪHALAM.

Burnell's Catalogue No. 4058. Page 27. Right column.

Substance—Paper. Size—$10\frac{7}{8} \times 4\frac{5}{8}$ inches. Sheets—52. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—760. Author—Raghunātha. Incomplete.

Beginning, end, colophon and subject—Same as No. 2656.

Remarks :—The Ms. is in good condition.

॥ प्रायश्चित्तकुतूहलम् ॥

2661. PRĀYAŚCITTAKUTŪHALAM.

J. L. Collection No. 274. Substance—Paper. Size—$9\frac{1}{2} \times 4$ inches. Sheets—49 (2 to 51). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—800 ?. Author—Raghunātha. Incomplete.

Beginning, end and colophon—Same as No. 2656.

Subject : Prāyaścittakutūhala belonging to the Āśvalāyana school of Ṛg-Veda giving out the following important expiatory ceremonies.

1	सायमनुद्धरणप्रायश्चित्तम्	sheet	3
2	वारुण्याः प्रयोगः	,,	4
3	प्रातरनुद्धरणप्रायश्चित्तम्	,,	5
4	पूर्णाहुतिविधिः	,,	7
5	विहरणपक्षेऽग्न्यनुगमनप्राथश्चित्तम्	,,	8
6	इष्टिप्रयोगः	,,	10
7	प्रणयनपक्षे गार्हपत्यानुगमने प्रायाश्चित्तम्	,,	10
8	सुब्रासितस्कन्नप्रायश्चित्तम्	,,	28
9	स्थालीभेद्ने प्रायश्चित्तम्	,,	29
10	हविःष्यन्दनप्रायश्चित्तम्	,,	29

11	केशादिदुष्टप्रयोग:	Sheet	30
12	अपोढानुगतिप्रायश्चित्तम्	,,	31
13	आहुत्यर्थं हवि:ष्यन्दनादिप्रयोग:	,,	,,
14	व्यवायप्रायश्चित्तम	,,	33
15	वह्नीनामल्पोपहतौ प्रायश्चित्तम्	,,	34
16	अग्निहविष्पातप्रायश्चित्तम्	,,	35
17	होमकालातिपत्तिप्रायश्चित्तम्	,,	36
18	अग्निहोत्रसमासप्रयोग:	,,	40
19	अग्निसमारोप:	,,	41
20	समारूढे धरणीनाशप्रायश्चित्तम्	,,	42
21	अग्न्युपघातप्रायश्चित्तम्	,,	46

Remarks :—The Ms. is in good condition. About nine granthas are wanting in the beginning of this Ms.

॥ आश्वलायनश्रौतप्रायश्चित्तप्रयोगः ॥

2662. ĀŚVALĀYANAŚRAUTAPRĀYAŚCITTA-PRAYOGAḤ.

J. L. Collection No. 275. **Substance**—Paper. **Size**—$7\frac{1}{2} \times 4\frac{1}{4}$ **inches**. Sheets—8 (1-10; 2nd & 4th are wanting). **Lines**—13 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—(?) Agnihotraprāyaścitta only.

Beginning :

श्रीमहागणपतये नमः ॥

॥ शुभमस्तु ॥

ॐ स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ

चातुर्मास्यानि पशुबन्धस्सोम इति। श्रौतक्रमेण अग्निहो-त्रादीनां प्रायश्चित्तान्युच्यन्ते। तत्र सायं विधिवद-नुह्युत आहवनीये यदि सूर्योऽस्तमीयात् तदानि(दानी)मेव नेतुं शक्येषु यो बहुविद्ब्राह्मणस्तमानयेत् ॥ स च विप्र-कृतेन कर्त्रा दक्षिणाग्निप्रणयने कृते अन्येन दर्भाद्ग्रथिते हिरण्येऽग्रतो नीयमाने "देवं त्वा देवेभ्यः" इत्यादि प्राकृ-तैर्मन्त्रैः उद्धरणाद्याहवनीये प्रणयनङ्कुर्यात् ।

End:

उभयत्र सर्वप्रायश्चित्तञ्च । अत्र सूत्रम् । "अभिवृष्टे मित्रो जनान्यातयति ब्रुवाण" इति। समिधधनमिति यद्यु-त्तराहुतिः स्वस्थानात्स्कन्देत् पूर्वाहुत्या वा संसृजेत तदा "यत्र वेत्थ वनस्पते" इति समिधमादध्यात् ॐ ॥

Colophon : (Sheet No. 9).

अग्निहोत्रप्रायश्चित्तानि समाप्तानि ॥

Subject: Agnihotraprāyaścitta—a treatise on prayoga relating to expiatory duties in Agnihotra probably belonging to the Āśvalāyanīya Bahvṛcas.

Remarks:—The Ms. is in a decaying condition. The last sheet of this Ms. is almost worn out and it contains the prāyaścitta kalpa of the अतिपन्नयाग etc.

॥ आश्वलायनाग्निष्टोमप्रायश्चित्तम् ॥

2663. ĀŚVALĀYANĀGNIṢṬOMA-PRĀYAŚCITTAM.

Burnell's Catalogue No. 4055. Page 27. Right column.

Substance—Paper. Size—$10\frac{7}{10} \times 4\frac{7}{10}$ inches. Sheets—5. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—(?). Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

बोधायनमतानुसारिणामाश्वलायनानामजस्रपक्षेऽपि विहरणकाले क्रमेण प्रादुष्करं कर्तव्यम् । तदकृत्वोदयास्तमयौ चेदुत्पत्तिक्रमेणाग्नीन् प्रज्वाल्य, आचम्य, प्राणानायम्य, देशकालौ सङ्कीर्त्य, अजस्राग्नीनामनुद्धरणप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामीति सङ्कल्प्य, अग्नीन्क्रमेण परिसमूह्य, पर्युक्ष्य, परिस्तीर्य, गार्हपत्यस्योत्तरतः दर्भान् संस्तीर्य, सादयति । स्रुवं जुहूमाज्यस्थालीमाग्निहोत्रहवणीं दर्भान् अभिद्योतनं समिधमिति तूष्णीं पवित्रे कृत्वा

* * *

पुनर्ज्वलता तेनैव त्रिः पर्यग्निकृत्वोदगुद्वास्याङ्गारान्प्रत्यूह्योदगग्राभ्याम्पवित्राभ्याम्पुनराहारमाज्यं त्रिरुत्पूय, पवित्रग्रन्थिं विस्रस्याप उपस्पृश्य प्रागग्रमग्नौ प्रहरति ॥

End:

अथ प्रातरग्निहोत्रकालातिपत्तिप्रायश्चित्तम् ॥ उद्धृतेष्वग्निषु प्रातर्द्वादशघटिकापर्यन्तमहुतेऽग्निहोत्रे आचम्य प्राणानायम्य ।

* * *

"मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु । या इष्टा उषसो निम्रुचश्च या अनिष्टा तास्सन्तनोमि हविषा घृतेन स्वाहा" । मनसे ज्योतिष इदं० ॥ सम्भावि-

तसमस्त० ॥ "ॐ भूर्भुवस्सुवः स्वाहा" ॥ प्रजापतय इदं० ॥ ब्राह्मणाय यथाशक्ति हिरण्यं ददाति ॥ इति प्रातरग्निहोत्रकालातिपत्तिप्रायश्चित्तम् ॥ अथ सायमग्निष्वनुद्धृतेषु मुख्यकालातिपत्तिप्रायश्चित्तम् ॥ सायमनुद्धृतेष्वग्निषु रात्रौ नवनाडिकापर्यन्तमहुतेऽग्नौ...............

Subject: Āśvalāyanāgnihotraprāyaścitta. This Ms. contains the following sections:—

1 अनुद्धरणप्रायश्चित्तम्	6 सर्वाग्न्यनुगतिप्रा०
2 गार्हपत्यानुगतिप्रा०	7 विच्छिन्नाधानरूपप्रा०
3 आहवनीयानुगतिप्रा०	8 सायमग्निहोत्रकालातिपत्तिप्रा०
4 दक्षिणाग्न्यनुगतप्रा०	9 प्रातरग्निहोत्रकालातिपत्तिप्रा०
5 गार्हपत्याहवनीयानुगतिप्रा०	10 सायमनुद्धृताग्निमुख्यकालातिपत्तिप्रा०

Remarks:—The Ms. is in good condition. It breaks off in the beginning of the 10th section.

॥ आश्वलायनप्रवासोपस्थानहविर्यज्ञप्रायश्चित्तम् ॥

2664. ĀŚVALĀYANAPRAVĀSOPASTHĀNA-HAVIRYAJÑAPRĀYAŚCITTAM.

Burnell's Catalogue No. 4050. Page 27. Right column. Substance—Paper. Size—10¾ × 4¾ inches. Sheets—11. Lines—10-12 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ प्रवासविधिः

अग्नीन्विहृत्याचम्याहवनीयमुपतिष्ठते । "शंस्यमभून्मे पाहि"। गार्हपत्यम्। "नर्यप्रजां मे पाहि"। दक्षिणाग्निम्। "अथर्वपितुं मे पाहि"। दक्षिणाग्निसमीप एव गार्हपत्याहवनीयौ युगपदीक्षते । "इमान्मे मित्रावरुणौ गृहान्गोपायतं युवम् । अविनष्टानविहृतान्पूषैनानभिक्षर(रक्ष?)त्वस्माकं पुनरायनात् " ॥ यथागतं पर्यावृत्याहवनीयमुपतिष्ठते ॥

End:

अग्निहोत्राहुतीद्वयोरन्तराले आहवनीयानुगतौ हिरण्यं प्रतिनिधिमुपादाय तद्धिरण्यमाहवनीयायतने निधाय तस्मिन् हिरण्ये उत्तरामाहुतिं जुहुयात् । वाचनिकोऽयं प्रतिनिधिः । देशान्तरे उक्तं प्रायश्चित्तमुच्यते । अग्निहोत्रहोमे " मनो ज्योतिः " इत्याहवनीये जुहुयात् । प्रतिहोमं कुर्यात् ॥

Colophon:

इति प्रायश्चित्तानि समाप्तानि ॥

Subject: Āśvalāyanapravāsopasthānahaviryajñaprāyaścitta.

Remarks:—The Ms. is in good condition. After the colophon is given 'अङ्गुबिली विध्यपराधे'.

॥ आपस्तम्बश्रौतप्रायश्चित्तप्रयोगः ॥

2665. ĀPASTAMBAŚRAUTAPRĀYASCITTA-PRAYOGAḤ.

Burnell's Catalogue No. 9110 a.

Substance—Palm Leaf. Size —$16\frac{1}{4}\times1\frac{1}{2}$ inches. Leaves—19. Lines—6 to a Page. Script—Telugu. No. of Granthas —560. Author—Keśava. Complete.

Beginning :

हरिः ॐ ॥

अग्निहोत्रेष्टिपशुसोमेषु प्रायश्चित्तान्युच्यन्ते ॥

तत्र प्रथममग्न्यनुगमनप्रायश्चित्तमुच्यते । इष्ट्यर्थं विहृतेष्वग्निषु अन्वाधानात्पूर्वं आहवनीयानुगमने लौकिकारणी आहृत्याहवनीयभस्मना संस्पृश्य मथित्वायतने निधाय मित्रादिहोमान् हुत्वा सर्वप्रायश्चित्तं च हुत्वान्वाधानादि । एवं यत्र यत्र कार्यार्थं प्रक्रान्तेऽग्नौ तत्कार्यात्पूर्वमाहवनीयानुगमने यथा दशहोतृ चतुर्होतृपञ्चहोतृषड्ढोतृसप्तहोतृसम्भारय......राद्यर्थं प्रणीतस्य यत्र यत्र पूर्णाहुत्यर्थं प्रणीतस्य चाहवनीयस्यानुगमने एतदेव प्रायश्चित्तम् ॥

End :

'ब्रह्मणो मनसा ध्यानं पुनरुक्तिः प्रयोजनम् ।
त्रयाणां सवनां मध्ये तत्र प्राक्सवनाहुतिः ॥'

समाप्तानि होमप्रायश्चित्तानि ॥

सवनीयपशोः स्याच्चेत् पूतिगन्धसमुद्भवः ।
तमे प्रोष्ठादकैर्यद्वा प्रक्षाल्याज्येन सर्पिषा ॥
पुनश्च श्रपयत्येवं तेनैव हविषा चरेत् ।
स्याच्चेत्तत्रापि दुर्गन्धस्तदा पश्वन्तरं भवेत् ॥
अग्ने नयादिपृथ्व्यादि देवाञ्जनमगं मनः ।
त्रयस्त्रिंशादिपञ्च स्युः ब्रह्मचस्कानभूतयम् ॥

Colophon:

इति केशवीयं समाप्तम् ॥

सीतारामार्पणमस्तु ॥ कच्छपेश्वराय नमः ॥

Subject: Āpastambaśrautaprāyaścittaprayoga containing the following sections (as given in the side-margin).

1	अग्न्यनुगमनप्रायश्चित्तम्	Sheet	No	1
2	पिण्डपितृयज्ञप्रायश्चित्तम्	,,	,,	,,
3	चातुर्मास्यप्रायश्चित्तम्	,,	,,	4
4	अनुद्धरणप्रायश्चित्तम्	,,	,,	,,
5	स्वप्नप्रायश्चित्तम्	,,	,,	9
6	युवासुषिरप्रायश्चित्तम्	,,	,,	11
7	घर्मप्रायश्चित्तम्	,,	,,	11
8	अग्निर्नरादिप्रायश्चित्तम्	,,	,,	12
9	पूर्वग्रहप्रायश्चित्तम्	,,	,,	16
10	रेतस्कन्नप्रायश्चित्तम्	,,	,,	17
11	होतुर्बलनाशप्रायश्चित्तम्	,,	,,	18

Remarks:—The Ms. is in good condition. Dr. Burnell has not noticed this manuscript. For the other works contained herin, see Remarks under No. 2099.

॥ आपस्तम्बाग्निहोत्रप्रायश्चित्तम् ॥

2666. ĀPASTAMBĀGNIHOTRA-PRĀYAŚCITTAM.

Burnell's Catalogue No. 9153. Page 27. Right column. Substance—Palm leaf. Size—15½ × 1½ inches. Leaves—9. Lines—4 to 6 to a Page. Script—Grantha. No. of Granthas—75. Author—?. Incomplete (wants end).

Beginning:

अधिवृक्षसूर्ये इत्यादिविहितकालात्प्राक् प्रणयने कृते सति प्रणीतमग्निमनुगमय्य स्वकाले प्रणयनं कुर्यात् । केचित्तु सर्वप्रायश्चित्तं कृत्वा पूर्वप्रणीतमेवाग्नीन्धारयन्ति । होमकालात्पूर्वं होमे कृते पुनः स्वकाले होमः कार्यः । यदि प्रणयनं स्वकाले कृतं तर्हि तस्मिन्नेव पुनर्होमः । अन्यथा प्रणयनाद्यावर्तते । वृष्ट्यन्ते भवतन्नः समनसा-वित्याहवनीयोपस्थानं कार्यम् ॥

End:

अन्वाधानात्पूर्वमग्नित्रयविनाशेऽनुगतिक्रमेण पूर्वं गार्हपत्यं मथित्वा स्वायतने निधाय ततो लौकिकारणीनित्यारणीं वा आहवनीयभस्मना संस्पृश्य मथित्वाहवनीयं प्रणीयाहवनीयानुगमनिमित्तकमित्रादीन् हुत्वा * * * "अग्ने व्रतपते व्रतञ्चरिष्यामि" इति चतुरो मन्त्रान् यजमानोञ्जसा जपेत् ॥ अन्वाधानानन्तरं गार्हपत्यानुगमने गार्हपत्यभस्मना अरणीसं.........

Subject: Agnihotraprāyaścitta—a treatise on the prayoga of the expiatory ceremonies relating to the Agnihotra of the Āpastambīyas.

Remarks:—The Ms. is in a decaying condition.

॥ आपस्तम्बप्रायश्चित्तप्रयोगः ॥

2667. ĀPASTAMBAPRĀYAŚCITTA-PRAYOGAḤ.

Burnell's Catalogue No. 9110 b. Page 27. Right column.

Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—39. Lines—6 to 8 to a Page. Script—Telugu. No. of Granthas—1500. Author—?. Complete.

Beginning:

श्रीगणाधिपतये नमः ॥

आपस्तम्बमुनिं नत्वा वेदार्थैकनिधिं परम् ।
तत्सूत्रनित्यहोमेषु प्रायश्चित्तं निरूप्यते ॥

प्रणीतकालात्ययचित्तहोमा-
वासाद्य कूर्चे हविरग्निहोत्रम् ।
चतुर्गृहीते द्वितयेन मन्त्रा
मनस्पते च त्रय आदिकश्च ॥

ततश्च विद्युत्प्रभृतीह सर्वं
प्रक्रान्तमेतच्च समानमान्तात् ।
प्रणीतिकालेऽनुगते तु भस्म
संस्पर्शयित्वा मथितं निधाय ॥

विहृत्य मित्रादिरपास्य वह्नि
स्यात्कर्मइष्ट्वा दिशमग्निहोत्रम् ।
प्रणीतिकाले यदि मथ्यमाने
वह्नावजातेत्यथलोकवह्निम् ॥

सम्भावनीयानभिवादयन्तः
परं नवाह्नादभिचेत्प्रवासः ।
कृत्वाग्न्युपस्थानममुं विहृत्य
मित्रो जनानित्युपतिष्ठतेऽन्ते ॥

मनस्पते होम इहोक्तयोर्य-
स्ततो गृहामादिसमानमन्ता ।

....

इष्टः प्रवासे विधिरप्ययं स्यात् ।

अग्निहोत्रेष्टिपशुसामे प्रायश्चित्तान्युच्यन्ते ॥

End:

यदि प्रवर्ग्ये वर्तमाने आदित्योऽस्तमयादपरस्यां द्वारि दर्भेण हिरण्यं प्रबद्ध्य "उद्वयं तमसस्परि" इति हिरण्यमुपतिष्ठते। आदित्यमिति ध्यात्वा अध्वर्युरेव। "उदुत्यं" "चित्रम्" इति गार्हपत्ये हुत्वा प्रवृज्य श्वोभूते "वयस्सुपर्णाः" इत्यादित्यमुपतिष्ठन्ते सर्वे प्रवर्ग्यकर्तारः। यदि धर्मधुग्दोहकाले नागच्छेत्। "गङ्ग एहि" इति आहूतायां यदि धर्मधुक्नागच्छेत्। अना(?)तल्लक्षणमाहूय दुग्ध्वा प्रवृज्यात्। तामृग्भ्यो न्यसैबा(?)नुत्यायां दद्यात्। अनुवाकौ व्याहृतयश्च। एवमजाया उपलेशो गम्येव प्रायश्चित्तमिति।

यदि धर्मधुगिपयोनद्यादित्यादिप्रायश्चित्तानि सूत्र एव द्रष्टव्यानि।

Colophon:

प्रायश्चित्तानि समाप्तानि ॥

इति प्रायश्चित्तानि समाप्तानि ॥

हरिः ॐ। शुभमस्तु।

श्रीमतां विदुषां प्रीतिरस्त्वेषालिपिरान्ध्रिका।
मया सम्याङ्लिलिखिता क्षन्तुमर्हन्तु कोविदाः ॥
शरद्धान्नार्चकीर्तेस्ते मन्दिरे स्थिरतां गता।
लक्ष्मीः स्थित्यं अचाञ्चल्यबुद्धिरव्याराद्ध... ।

श्रीमद्दुर्मतिनामसंवत्सरे वैशाखबहुळ १० मङ्गलवासरदिना्दु श्रीम-

त्कुट्टिमहादेवदीक्षितुलवारिकि रघुनाथुण्डुत्राशिन प्राय-
श्चित्तमुलु ग्रन्थं समाप्तम् ॥

करकृतमपराधं क्षन्तुमर्हन्तु सन्तः ॥

श्रीलक्ष्मीनृसिंहाभ्यां नमः ॥

Subject: Āpastambaprāyaścittaprayoga giving the prayogas of various expiatory ceremonies. The contents of this work as given in the margin are as follows:

1	अग्निसंस्कारादयः	Leaf	No	1
2	आहवनीयानुगमनेष्टिः	,,	,,	3
3	गार्हपत्यानुगमनप्रायश्चित्तम्	,,	,,	5
4	होमकालप्रायश्चित्तम्	,,	,,	6
5	सामान्यप्रायश्चित्तम्	,	,,	,,
6	ब्रह्मौदनाग्निप्रायश्चित्तम्	,,	,,	,,
7	प्रवर्ग्यार्थं निरूढाग्निप्रायश्चित्तम्	,,	,,	
8	शामित्रनाशप्रायश्चित्तम्	,,	,,	,,
9	सामान्यप्रायश्चित्तम्	,,	,,	8
10	अनुद्धरणप्रायश्चित्तम्	,,	,,	,,
11	दोषचयप्रायश्चित्तम्	,,	,,	,,
12	अनालब्धुकायाः प्रायश्चित्तम्	,,	,,	9
13	हविस्कन्दनप्रायश्चित्तम्	,,	,,	12
14	उत्तराहुतिः	,,	,,	,,
15	अङ्गारस्कन्दनम्	,,	,,	,,
16	क्षौमादीष्टिः	,,	,,	13
17	अग्निसंसर्गप्रायश्चित्तम्	,,	,,	,,

18 अग्निहोत्रस्थालीभेदप्रा०	Leaf.	No.	13
19 प्रातप्रभृतेष्टिः	,,	,,	17
20 तण्डुलस्कन्नप्रायश्चित्तम्	,,	,,	,,
21 अग्निहोत्रे श्वादिगमनप्रायाश्चित्तम्	,,	,,	,,
22 अस्तमनात्पूर्वहोमप्रायश्चित्तम्	,,	,,	18
23 उपहूतप्रायश्चित्तम्	,,	,,	,,
24 काकस्पर्शादिप्रायश्चित्तम्	,,	,,	,,
25 प्रणीतास्कन्दनप्रायश्चित्तम्	,,	,,	,,
26 सूर्यानाविर्भावप्रायश्चित्तम्	,,	,,	,,
27 दुःस्वप्नमत्तप्रायाश्चित्तम्	,,	,,	20
28 आज्यस्कन्नप्रायश्चित्तम्	,,	,,	,,
29 हविर्दोषप्रायश्चित्तम्	,,	,,	21
30 ऋत्विगप्रयतप्रायश्चित्तम्	,,	,,	23
31 दुःश्रुतप्रायश्चित्तम्	,,	,,	,,
32 अभागदेवतावहनम्	,,	,,	24
33 भागिनीदेवतानावहनम्	,,	,,	,,
34 मृन्मयपात्रभेदनम्	,,	,,	,,
35 निरुक्तहविस्कन्ददेवताप्रायश्चित्तम्	,,	,,	,,
36 देवताविपर्यासादिप्रायश्चित्तम्	,,	,,	24
37 याज्याविपर्यासादिप्रायश्चित्तम्	,,	,,	25
38 पृषदाज्यस्कन्नप्रायाश्चित्तम्	,,	,,	,,
39 जुह्वादीनां रजस्वलास्पर्शप्रायश्चित्तम्	,,	,,	,,
40 अरणिस्पर्शे	,,	,,	,,
41 कुम्भीस्रवन्ती	,,	,,	26

42	पशोरवदाननाशे	Leaf.	No.	26
43	सोमवमने	"	"	27
44	यूपतिरोहणे	"	"	"
45	अग्निर्नैरादिप्रायश्चित्तम्	"	"	"

Remarks :—The Ms. is in good condition. For the other works contained herein see Remarks under No. 1977. Dr. Burnel has however not noticed this Manuscript.

॥ बोधायनश्रौतप्रायश्चित्तप्रदीपः ॥

2668. BODHĀYANAŚRAUTAPRĀYAŚCITTA-PRADĪPAḤ.

Burnell's Catalogue No. 3862. Page 25. Right column. Substance—Paper. Size—$11\frac{1}{4} \times 4\frac{7}{8}$ inches. Sheets—69. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—2800. Author—Adhvaryuyājin. Complete.

Beginning, end, colophon and subject—Same as No. 2667.

Remarks :—The Ms. is in good condition.

॥ बोधायनश्रौतप्रायश्चित्तप्रदीपः ॥

2669. BODHĀYANAŚRAUTAPRĀYAŚCITTA-PRADĪPAḤ.

J. L. Collection No. 276. Substance—Paper. Size—$7\frac{3}{8} \times 4\frac{7}{8}$ inches. Sheets—189. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2800. Author—Adhvaryu Yajvan. Complete.

Beginning, end, colophon and subject—Same as No. 2667.

Remarks:—The Ms. is in a fairly good condition.

॥ बोधायनश्रौतप्रायश्चित्तप्रदीपः ॥

2670. BODHĀYANAŚRAUTAPRĀYAŚCITTA-PRADĪPAḤ.

Burnell's Catalogue No. 9152 a. Substance—Palm Leaf. Size—12¾ × 1¼ inches. Leaves—176. Lines—6 to a page. Script—Grantha. No. of Granthas—2600. Author—Adhvaryu Yajvan. Incomplete (wants end).

Beginning, and subject—Same as No. 2667.

End:

सर्वत्र सोममन्त्रस्खलितेषु अनुक्तप्रायश्चित्तेषु सर्वत्र मिन्द्राहुतीर्जुहुयात् । संस्थानेषु मिन्द्राहुतियज्ञशरीर- मिति श्रुतिरित्याचार्यवचनात् । सोमे सर्वप्रायश्चित्तम्मि- न्द्राहुतीर्जुहुयात् । सोमे यागे दीक्षितो यजमानः अवभृ- थान्नाद्यात् हविश्शेषं विनान्यत्किञ्चिन्नाद्यात् न दद्यात् ॥

* * *

आश्रावितादिमन्त्रैर्ब्रह्मप्रतिष्ठानानुवाके भूस्वाहेतित्या- दि गणेन च प्राजापत्यगणेन छन्दोभिरग्निर्मूर्धानुवाकेन याज्यैरभ्यातानैः । राष्ट्रभृद्भिः अमात्यैर्यद्देवादेवहेळ.... ॥

Colophon: (Leaf No. 36)

इति प्रायश्चित्तप्रदीपे अग्निप्रकरणं समाप्तम् ॥

Remarks:—The Ms. is in good condition. For the other works contained herein see Remarks under No. 2325. Dr. Burnell has not noticed this work under No. 9152. This Ms. breaks off in the middle of the Somaprāyaścittaprayoga.

॥ बोधायनश्रौतप्रायश्चित्तप्रदीपः ॥

2671. BODHĀYANAŚRAUTAPRĀYAŚCITTA-PRADĪPAḤ.

Burnell's Catalogue No. 3750. Page 27. Right column. Substance—Paper. Size—$11\frac{1}{8}\times4\frac{7}{8}$ inches. Sheets—142. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—2800. Author—Adhvaryuyajvan. Complete.

Beginning:

श्रीगणेशाय नमः ॥

नत्वा बोधायनाचार्यं तेनोक्तश्रौतकर्मणाम् ।
विध्यतिक्रमणे प्रायश्चित्तदीपः प्रकाश्यते ॥

श्रौते बोधायनोक्तानि प्रायश्चित्तानि यानि तु ।
उक्तानि श्रौतभाष्ये च वर्यगोपालसौरिणा ॥

व्यासोक्तानि प्रकीर्णानि तैरनुक्तानि यानि च (तु) ।
भवस्वामिमतात्तेषां विस्तरान्निर्णयं ब्रुवे ॥

पञ्चप्रकरणान्यत्र तेष्वाधानाग्निहोत्रके (ह्याधानान्त्वग्निहोत्रकम् ।) ।
दर्शाद्याग्रयणाद्यत्र सोमश्चेति यथाक्रमम् ।

"अथातो मन्त्रगणाम्नातानि" इत्यादि ॥ अथ शब्द आनन्तर्ये । कर्माण्यभिधाय अनन्तरं प्रायश्चित्तमभिधीयते ॥ अतःशब्दो हेत्वर्थे यस्मात्कर्माणि वैगुण्ये सति प्रायश्चित्ते कृते कर्म सगुणं भवति ॥ अतः प्रायश्चित्तानि व्याख्यास्यामः । विहितानामकरणे अन्यथाकरणे वा प्रायश्चित्तं विधीयते ॥

End:

आज्यस्थाल्या स्रुवेणोपहृत्य एतानि सर्वप्रायश्चित्तानि जुहुयात् ॥

आश्रवितादीनि मन्त्रैः ब्रह्मप्रतिष्ठानुवाकेनमिन्द्रादिगणेन च भूः स्वाहेत्यादि गणेन च प्राजापत्यगणेन छन्दोभिः

* * * *

ब्राह्मीभिः "ब्रह्म जिज्ञानम्" इति षड्भिः रौद्रीभिः "परिणो रुद्रस्य" इति षड्भिः आग्नेयीभिः "अग्ने नय" इत्यादि षड्भिर्महाव्याहृतीभि समस्ता (व्याहृती)भिः ओं स्वहेत्यादि [प्रणवेन अन्ते] प्रणवेनान्ते एतैस्सर्वैः क्रत्वन्ते सर्वप्रायश्चित्तानि जुहुयात् ॥

Colophon:

एवं काश्यपगोत्रेण सोमादीक्षितसूनुना ।
प्रायश्चित्तप्रदीपोऽयं रचितोऽध्वर्युयज्वना ॥

इति प्रायश्चित्तदीपे सोमप्रायश्चित्तं नाम पञ्चमप्रकरणं समाप्तम् ॥

Subject: Bodhāyanaśrautasūtravyākhyā—otherwise known as Prāyaścittapradīpa belonging the Bodhāyana school of the Black Yajur-Veda. 1-5 Prakaraṇas (27-29 Praśnas).

This Ms. adopts a five-fold prakaraṇa division, as follows:—

1	आधानप्रायश्चित्तानि	Prakaraṇa	I	Sheet	1
2	अग्निहोत्र ,,	,,	II	,,	8

3 दर्शपूर्णमास	,,	Prakarṇa	III	Sheet	34
4 आग्रयण	,,	,,	IV	,,	77
5 सोम	,,	,,	V	,,	133

Remarks:—The Ms. is old and is in a fairly good condition. It is damp in appearance. The author of this commentary is one Adhvaryuyajvan, son of Somadīkṣita of Kāśyapa family. For other works contained herein see Remarks under No. 2099.

॥ बोधायनश्रौतप्रायश्चित्तप्रदीपानुक्रमणिका ॥

2672. BODHĀYANAŚRAUTAPRĀYAŚCITTA-PRADĪPĀNUKRAMAṆIKĀ.

Burnell's Catalogue No. 3751. Page 27. Right column. Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{7}{8}$ inches. Sheets—20. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

बोधायनप्रायश्चित्तप्रदीपानुक्रमणिका ॥

१. मङ्गलाचरणं प्रथमसूत्रार्थः	३ आधानप्रायश्चित्तम्
२. सार्ताज्यसंस्कारः	३ संकल्पानन्तरं पत्न्यां रजस्वलायाम्
२. होमाधिकरणं अनादिष्टे कर्ता	३ दक्षिणादानात्परं अनालंभुकायाम्
२. अनादिष्टे पात्रम्	३ बहुपत्नीकस्य
२. अनादिष्टे ग्रहणसंख्या	३ पूर्णाहुत्यनन्तरं चेत्केचित्पक्षः

End:

तत्र पक्षान्तराणि सोमे दीक्षितव्रतानि
आहुतिमात्रसोमरसस्कन्दने ऋत्विग्व्रतानि
सोमे अनुक्तप्रायश्चित्ते सोमसामान्यप्रायश्चित्तानि

Colophon:

इति प्रायश्चित्तप्रदीपानुक्रमणिका सम्पूर्णा ॥

Subject: Bodhāyanaprāyaścittapradīpānukramaṇikā.

Remarks: —The Ms. is in good condition.

॥ बोधायनश्रौतप्रायश्चित्तप्रयोगः ॥

2673. BODHĀYANAŚRAUTAPRĀYAŚCITTA-PRAYOGAḤ.

Burnell's Catalogue No. 9106 (d).

Substance—Palm leaf. Size—16 × 15 inches. Leaves—11. Lines—7 to a Page. Script—Grantha. No. of Granthas—150. Author—Sāyaṇācārya. A fragment only.

Beginning:

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानामेकदन्तमुपास्महे ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
(निर्ममे तमहं वन्दे) विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
अदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे(ते व्याख्याया)तिसङ्ग्रहात् ।
कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥

व्याख्याताबृग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणस्याथ व्याख्यानं (सम्प्रवर्तितम्) ॥
अष्टौ हि ब्राह्मणग्रन्थाः प्रौढब्राह्मणमादिमम् ।
षड्विंशाख्यं द्वितीयं स्यात्ततः सामविधिर्भवेत् ॥
आर्षेयं देवताध्यायो भवेदुपनिषत्त(तः) ।
संहितोपनिषद्वंशो ग्रन्था अष्टावितीरिताः ॥

अथ सामविधानाख्ये तृतीये ब्राह्मणग्रन्थे तेष्वधिकृतानां वक्ष्यमाणजपाग्निवैखानसादि........शक्तानामन्येषाञ्च शुद्ध्यर्थं कृच्छ्रादिप्रायश्चित्तानि । तैरपहतपाप्मनां स्वर्गादिफलप्राप्तये जप्यानि बहुविधान्यायां... ॐ सर्पणे प्रारब्धे उपवेशनात् प्राक् प्रस्तोतुरपच्छेदे ब्राह्मण एकां गांदत्वानन्तरं पुनः प्रस्तोतृवरणं कर्तव्यम् ॥

End :

पुरस्ताद्बहिष्पवमानात् तावस्य मारुतस्य ब्रह्मसाम्ना सवनम् । अथवा अस्मिन् क्रतौ यत् ब्रह्मसाम तत् प्रत्याव्रज्यबहिष्पवमानात् पूर्वं विहितस्तोमेन स्तुवीरन् ॥

* * * *

प्रतिनिमित्तद्वयञ्जुहुयात् । तद्धिरण्यं ब्रह्मणे देयम् । एकदेवाहुतिद्वयं हिरण्यदानञ्च दर्विहोमविच्छेदे सर्वत्र प्रायश्चित्तम् ॥

Colophon :

इति स...... दर्शितानि प्रायश्चित्तानि ॥
हरिः ॐम् । श्रीमहागणपतये नमः ॥

Subject : Bodhāyanaśrautaprāyaścittaprayoga, containing

chiefly the prayogas of the expiating ceremonies in vedic sacrifices. 1-16 Khaṇḍas.

Remarks: —The Ms. is in a decaying condition.

॥ श्रौतप्रायश्चित्तम् ॥

2674. ŚRAUTAPRĀYAŚCITTAM.

J. L. Collection No. 277. Substance—Paper. Size—8×3 inches. Sheets—77. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—675. Author—Yella(ya). Incomplete (wants end).

Beginning:

श्रीगणाधिपतये नमः ॥

शुक्तौ रजतवद्यत्र मायया दृश्यते जगत् ।
तद्ब्रह्माहमिति ज्ञेयं सच्चिदानन्दविग्रहम् ॥ १ ॥
देशं कालं वयोऽवस्थां विद्यां सामर्थ्यमेव च ।
ब्राह्मणानां समालोच्य ग्रन्थान्सर्वविनिर्मितान् ॥ २ ॥
आलोच्य सुलभान्पक्षान्सूत्रकारविकल्पितान् ।
सङ्गृह्य सुखबोधाय कुर्वे शङ्करकिङ्करः ॥ ३ ॥

अत्र सर्वं पापक्षयहेतुत्वात्प्रथमं ब्रह्मानुसन्धानमाह—शुक्तौ रजतवदिति अयमाशयः । श्रौतानाङ्कर्मणामपचारेषु श्रृङ्गग्राहिक(त)या प्रायश्चित्तानि वक्ष्यन्ते । तानि तदैवाचरितव्यानि । यत्र प्रायश्चित्तं नोक्तं उक्तमपि न प्रतीयते वा तत्र सर्वत्र ब्रह्माहमिति भावयेत् ॥

* * * *

अथ प्रायश्चित्तान्युच्यन्ते ॥ तत्र सूत्रम्— "श्रुतिल-

क्षणं प्रायश्चित्तं विध्यपराधे विधीयते" इति ॥ श्रुतिर्लक्षणं प्रमाणं यस्य तच्छ्रुतिलक्षणं वेदोक्तमिति यावत्। दोषनिर्हरणार्थं कर्म प्रायश्चित्तमित्युच्यते। विधीयत इति विधिः कर्म। तस्य पुरुषकृतान्यथाकरणादि दोषः अपराधः ॥

End:

तत्र ज्योतिष्टोमो नित्यः। स तु सर्वथा कर्तव्यः। अकार्यव्यतिरेकेण येन केन दुष्यति ग्रहादिदुर्मार्गेणापि निर्धन स्तदर्थं धनं सम्पादयेत्। न तु काम्यकत्वर्थं। तदाहुः—

'सूर्यग्रहे कुरुक्षेत्रे मेषीं कृष्णाजिनादिकम्।
चण्डालादपि गृह्णीयात् यजेतावश्यकैर्मखैः ॥' इति।

❀ ❀ ❀ ❀

आयाह्यग्ने। जुषस्व नः। नाराशंसस्य इळेन्यं वः। सपर्यवः स्वाध्यो विदुरः उत योषणे विप्रा यज्ञेषु आभरति ॥

Colophon: (Sheet No. 31).

अनेकग्रन्थसारांशमालोच्य विदुषां मुदे।
अग्निहोत्रपरिच्छेदे प्रायश्चित्तं प्रकाशितम् ॥

इति श्रीशङ्करकिङ्करहरिहरकवितोदरयेल्ल(य)कृत अग्निहोत्रप्रायश्चित्तनाम प्रथमपरिच्छेदः ॥

Subject: Śrautaprāyaścitta. 1-5 Paricchedas cntaining the following important sections:—

I अग्निहोत्रप्रकरणम्	Sheets	1—31
a. अग्निहोत्रकालातिक्रमप्रायश्चित्तम्	,,	6
b. अग्निविच्छेदप्रायश्चित्तसमाप्तिः	,,	11

c.	अनुगमनप्रायश्चित्तम्	Sheets	11
d.	अग्निनाशप्रायश्चित्तम्	,,	14
e.	आहवनीयाग्न्यनुगमप्रायश्चित्तम्	,,	,,
f.	पक्षहोमविधिः	,,	25
g.	अग्निहोत्रप्रतिनिधिः	,,	28
h.	प्रवासविधिः	,,	29
II	**दर्शपूर्णमासप्रकरणम्**		1—51
a.	कालविचारः	,,	31
b.	हवनीयविचारः	,,	37
c.	आज्यप्रायश्चित्तानि	,,	44
d.	आज्यप्रतिनिधिः	,,	,,
e.	कर्मान्तरितकर्मविपर्यासप्रायश्चित्तम्	,,	46
f.	पात्रशुद्धिः	,,	48
g.	दर्शपूर्णमासबर्हिःप्रतिनिधिः	,,	50
h.	सर्वाध्वर्युप्रायश्चित्तम्	,,	,,
III	**प्रायश्चित्तेष्टिप्रकरणम्**		51—55
a.	प्रायश्चित्तेष्टयः	,,	51
b.	आग्रयणप्रायश्चित्तम्	,,	54
c.	Do प्रतिनिधिः	,,	,,
IV	**आधानप्रकरणम्**		55—64
a.	अधिकारिनिरूपणम्	,,	56
b.	अग्न्यनुगमप्रायश्चित्तम्	,,	57
c.	रजस्वलाप्रायश्चित्तम्	,,	58
d.	पुनराधाननिमित्तानि	,,	,,

V	पशुबन्धप्रकरणम्	Sheets	65—76
a.	पशुबन्धप्रायश्चित्तम्	,,	66
b.	अग्न्यनुगमप्रायश्चित्तम्	,,	67
c.	पशुविषयप्रायश्चित्तम्	,,	73
d.	सोमप्रायश्चित्तम्	,,	74—76

Remarks :—The Ms. is in good condition. This Ms. abruptly ends in the middle of the fifth Pariccheda (i.e.) Paśubandha prakaraṇa.

॥ आधानप्रायश्चित्तम् ॥

2675. ĀDHĀNAPRĀYAŚCITTAM.

J. L. Collection No. 278. Substance—Paper. Size—6⅞×4 inches. Sheets—9 (1-9 out of 15). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—?. Complete.

Beginning:

आधानारम्भे प्रायश्चित्तप्रयोगः ॥

श्रीगणेशाय नमः ॥ श्रीरस्तु ॥

"जातपुत्रः कृष्णकेशोऽग्नीनादधीत" इति । उपलक्षणञ्चैतत् । अजातपुत्रादीनामप्यग्न्याधानश्रवणात् ।

* * * *

तमाशिषमाशासेतं तव ज्योतिष्मतीमिति ब्रूयात् । यस्य पुत्रो जातस्स्यात् जायावान्दशमेह्नि अग्नि(मा)दधीतेत्यादिश्रुतिस्तु पुत्रोत्पादनसामर्थ्यं द्योतयति । न पुत्रोत्पत्तिम् । षोडशवर्षादूर्ध्वमिति फलितोर्थः । कृष्णकेश इति शरीरबलं

द्योतयति ॥ अथ त्रिकाण्डमण्डनः—

दर्शेष्टिपौर्णमासेष्टिसोमेष्यामवनी[य]जने ।
अग्निहोत्रविवाहेश्च प्रयोगे प्रथमे स्थितम् ॥

End:

इत्याहुतीर्हुत्वा । व्रतग्रहणं करिष्य इति द्विजान्पृष्ट्वा तैः कुरुष्वेत्यनुज्ञातः प्रणवेन सर्वं पिबेत् । एतच्च ग्रामाद्बहिर्नक्षत्रदर्शने कार्यम् । अशक्तौ गोमूत्रादिकं स्वल्पं ग्राह्यम् । सर्वस्य पेयत्वात् । अस्मिन् दिने उपवासः । अशक्तस्य हविष्याशनम् । ततः प्रक्रान्तप्रायश्चित्तं सङ्कल्पानुसारेण कृत्वा उत्तराङ्गानि कुर्यात् । व्याहृतिभिराज्यं पूर्ववद्धुत्वा प्रायश्चित्ताङ्गविष्णुश्राद्धं गोदानञ्च पूर्ववच्चरेत् । ततो यस्य स्मृत्येति । मया आचरितेन प्राच्योदीच्याङ्गसहितेन प्रायश्चित्तेन पापहा महाविष्णुः प्रीयताम् ॥

Subject: Ādhānaprāyaścitta—a treatise dealing with the expiatory ceremonies connected with Ādhāna.

This Ms. contains the following important sections:-

(1) अधिकारी
(2) कालः
(3) नक्षत्रम्
(4) प्रायश्चित्तम्
(5) भस्मस्नानम्
(6) गोमयस्नानम्
(7) मृत्तिकास्नानम्
(8) पञ्चगव्यस्नानम्
(9) विष्णुपूजनम्
(10) होमः

Remarks:—The Ms. is in good condition. The other work contained herein is कूष्माण्डहोमः ॥

॥ अग्निहोत्रप्रायश्चित्तसङ्क्षेपः ॥

2676. AGNIHOTRAPRĀYAŚCITTA-SAṄKṢEPAḤ.

Burnell's Catalogue No. 4053. Page 27. Right column. Substance—Paper. Size—8⅜ × 5 inches. Sheets—8. Lines—10 to 11 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—?. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अग्निहोत्रप्रायश्चित्तान्युच्यन्ते ।

उदयकालेऽस्तमयकाले च प्रणयनातिक्रमे यथा पूर्वं प्रणयनादि हविरासादनान्तं[रं]कृत्वा स्वकालेऽग्न्यनुद्धरणप्रायश्चित्तार्थं मनोज्योतिस्त्रयस्त्रिंशतं तव इति द्वे चतुर्गृहीते आज्याहुतीर्होष्यामि । "मनोज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳसमं दधातु ॥"

* * * *

देवेभ्य इदम् । सर्वप्रायश्चित्तम् । इत्यनुद्धरणप्रायश्चित्तम् ।

End:

अथ पक्षहोमसङ्कल्पः ॥ अद्य प्रतिपदि सायंहोमादारभ्य चतुर्दशी सायंहोमपर्यन्तानि सायमग्निहोत्राण्यपकृष्यानेन सायमग्निहोत्रेण सह पयसा होष्यामीति ॥ तथैव द्वितीयायां प्रातर्होमादारभ्य पर्वप्रातःपर्यन्तानि प्रातरग्निहोत्राण्यपकृष्यानेन प्रातरग्निहोत्रेण सह पयसा होष्य इति ॥

पक्षहोमं तथा कृत्वा मध्ये तस्मान्निवर्तितः ।
होमं पुनः(श्च) कुर्याच्चेत्तदादोषो न विद्यते ॥

Colophon :

इत्यग्निहोत्रप्रायश्चित्तसङ्क्षेपः समाप्तः ॥

Subject: Agnihotraprāyaścittasaṅkṣepa—a summary of the expiatory ceremonies belonging to the Agnihotra.

This Ms. contains the following important sections:

1 अनुद्धरणप्रायश्चित्तम्

2 गार्हपत्याद्यनुगतप्रायश्चित्तम्

3 स्कन्नप्रायश्चित्तम्

4 इष्टिप्रायश्चित्तम्

5 पिण्डपितृयज्ञलोपप्रायश्चित्तम्

6 कपालभेदप्रायश्चित्तम्

7 स्त्रयञ्ज्वलनप्रायश्चित्तम्

8 अन्वाधानेष्टिमध्ये उपरागप्रायश्चित्तम्

Remarks:—The Ms. is in good condition.

॥ विध्यपराधप्रायश्चित्तम् ॥

2677. VIDHYAPARĀDHAPRĀYAŚCITTAM.

Burnell's Catalogue No. 3861. Page 27. Right column. Substance—Palm leaf. Size—$10\frac{1}{2} \times 4\frac{5}{8}$ inches. Sheets—33. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—792. Author—?. Incomplete.

Beginning :

श्रीमहागणपतये नमः ॥

विध्यपराधे प्रायश्चित्तिः ॥

विधिशब्देन विहितमुच्यते । तस्याकरणेऽन्यथाकरणे प्रायश्चित्तिः कर्तव्या । प्रायोविनाशश्चित्तिः सन्धानं विनष्टसन्धानं प्रायश्चित्तिरित्युक्तं भवति । तथा च विध्यपराधे सति तदर्थे विशेषतो यद्विहितमस्ति तदेव कर्तव्यम् । नास्ति चेद्व्याहृतिहोमः कर्तव्यः । एतदेव सर्वप्रायश्चित्तमुच्यते । एवं च सति यथा कथञ्चिद्विधिसम्पादने प्रायश्चित्ताभाव उक्तो भवति प्रायश्चित्तकालस्तु निमित्तानन्तरमेवेत्युत्सर्गः ॥ ऐष्टिके तन्त्रे प्रधानस्विष्टकृत्समिष्टयजुर्होमाद्वा प्रागिति बोधायनः । विहितस्य द्रव्यस्य स्वरूपतो भावे प्रतिनिधिः स्वीकार्यः । कचित्स्वरूपसत्तायामपि प्रकृतकार्याशक्तौ प्रतिनिधिरेव स्वीकार्यः । तथा चार्थद्रव्ययोर्विरोधे अर्थो बलीयानिति सूचितं भवति । इदं चापरं सामर्थ्ये सति गुणसंपादनार्थं न प्रतिनिधिरुपादातव्यः । द्रव्यगुणविरोधे द्रव्यं बलवत् । एतदुक्तं भवति, यत्कार्यार्थतया यद्विहितं तस्य तत्कार्याशक्तौ तत्प्रतिनिधिरूपं तत्कार्यकरणाय स्वीकार्यम्, तथा च प्रतिनिधिप्रयोगेऽपि विहितस्वरूपापचाराद्विध्यपराधशङ्कया प्रायश्चित्तं न कर्तव्यम्, तत्र स एव विध्यर्थः फलितो भवतीति । तथा विनष्टसंधानं द्विविधम् तत् प्रत्यक्षमतीन्द्रियञ्च । तत्राद्यं यथायतनादपगतस्य वह्नेः पुनरुत्थापनं स्कन्नस्य वा हविषो ग्रहणार्थस्य पुनर्ग्रहणम् । द्वितीयं तु होमजपादिभिः । यत्रातीन्द्रिये सन्धाने होमा-

दि न विहितं तत्र भूर्भुवस्वः स्वाहेति सर्वप्रायश्चित्तमवश्यं कर्तव्यमिति वृत्तिकृदुक्तोऽयं नयः। यथापस्तम्बोक्तम् "श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते" इति। तत्र प्रायश्चित्ते विहिते श्रूयमाणेष्व(णालि)ङ्ग सङ्ख्यादि-क्रमविवक्षितम्। यथा पुरोडाशः क्षायेतेत्यत्रैकत्वं यद्यष्टापदीत्यत्रसंख्या तेन पुरोडाशयोर्बहूनां दाहे प्रायश्चित्त-प्राप्तिः। तथा द्वादशपद्यां षोडशपद्यां वा प्रायश्चित्तम्। तथा च विध्यपराधे कर्मान्यथाकरणे श्रुत्युक्तं प्रायश्चित्तं विधीयते। यथान्तरागमनादौ यत्र च विधिरस्ति वाजपेये रथस्यान्तरागमनं तत्र प्रायश्चित्तप्रसक्तिरिति ॥

End:

अयमग्निः पुरीष्योरयिमान्पुष्टिवर्धनः। अग्नेः पुरीष्याभिद्युम्न० दक्षिणाग्नौ 'अभयं व' इति ॥ पूर्ववदुपस्थाय। विहारादुदगासित्वा। 'भूर्भुवः सुवः' इति वाचं विसृजेत्। दशरात्रादूर्ध्वं प्रवासमापद्येत। चतुर्गृहीतमाज्यं हुत्वा। 'मनो ज्योतिर्जुषतामाज्यं मे विच्छिन्नं यज्ञं समिमं दधातु। या इष्टा उषसो या अनिष्टास्तासन्तनोमि हविषा घृतेन स्वाहा' इति तूष्णीमुत्पवनम्। अग्निहोत्रहोमे च विच्छेदाहुतिमिमां जुहुयात्। प्रतिहोममेके। गृहान्माबिभीषोपवस्वस्त्येवोऽस्मासु प्रजायध्वं मा च वो गोपती-रिषत्। प्रपद्यते ॥

गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान्।
इरां वहन्तो घृतमुक्षमाणास्तेष्वहꣳ सुमनाः संविशानि ॥

Colophon :

इति प्रवासोपस्थानप्रायश्चित्तम् ॥

Subject : Vidhyaparādhaprāyaścitta giving the details of expiatory ceremonies coming under Ādhāna, Agnihotra, Darśapūrṇamāsa and Paśubandha. This Ms. specially deals with the following topics :—

I	परिभाषाप्रकरणम् ॥	Sheets 1—5
1	सकलप्रायश्चित्तोपयोगिपरिभाषा ॥	Sheet 1
II	आधानप्रकरणम् ॥	5—7
2	आधानेऽग्न्यनुगतप्रायश्चित्तम्	5
III	अग्निहोत्रप्रकरणम्	7—19
3	अग्निहोत्राग्न्यनुगमनप्रायाश्चित्तम	7
4	अग्निहोत्रे द्रव्ये दुग्धासु प्रायश्चित्तम् ॥	11
5	अग्निहोत्रद्रव्यस्कन्नप्रायाश्चित्तम्	,,
6	आग्निहोत्रान्तरागमने प्रायश्चित्तम्	14
7	अग्निहोत्रानुद्धरणप्रायश्चित्तम्	15
8	होमविच्छेदप्रायश्चित्तम्	33
9	अतिक्रान्तहोमप्रायश्चित्तम्	33
10	अकालहोमप्रायश्चित्तम्	35
IV	दर्शपूर्णमासप्रकरणम्	19—
11	अन्वाहितप्रायश्चित्तम्	38
a	कालातिपत्तिप्रायश्चित्तम्	39
b	नवनाटिकाहोम:	,,
12	हविर्दोषप्रायश्चित्तम्	40

Remarks:—The Ms. is in a fairly good condition. This work is a good compendium of the rules set forth by Āśvalāyana, Āpastamba and Bodhāyana on Vidhyaparādhaprāyaścitta.

At the end of this Ms., the following Prāyaścitta extract is given:—

दर्शपूर्णमासाग्रयणपशुसोमानामाधानानन्तरं स्वकालेऽनारम्भे पथिकृती वैश्वानरी च पूर्वे कर्तव्ये। अथवा विभ्रष्टेष्टिः कर्तव्या। अत्र दर्शपूर्णमासारम्भात् पूर्वं विकृत्यनुष्ठानार्थमपि सारस्वतहोममन्वारम्भणीयाञ्च कृत्वा विभ्रष्टेष्टिं कृत्वा पुनर्दर्शपूर्णमासारम्भार्थं सारस्वतहोममन्वारम्भणीयाञ्च कृत्वा चतुर्होतारं हुत्वा पूर्णमासेन यजेत ॥

* * * *

यदि दक्षिणाग्निमुद्वा...येत् गार्हपत्यादुद्धृत्य दक्षिणे चतुर्होतारं गार्हपत्ये दशात्मकं जुहुयात्। भिन्नयोनित्वपक्षे चतुर्होतृत्वमात्रं न दशात्मकहोमः ॥

॥ विध्यपराधप्रायश्चित्तम् ॥

2678. VIDHYAPRĀDHAPRĀYAŚCITTAM.

J. L. Collection No. 279. Substance—Paper. Size—6×3½ inches. Sheets—57(1-60; 27, 43 & 59 are missing). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—650. Author—(?). Incomplete.

Beginning—Same as No. 2677.

End:

अथ चातुर्मास्यादिषु आमिक्षाया एव(मेकदेश) दोहनाशे तं पुनरासाद्यायाः(रुत्पाद्ययागः ।) उभयदोहनाशे आज्येन यागः । वाजिनेत्या(ष्या)ज्यमेव प्रतिनिधिः । सर्वप्रायश्चित्तश्च न सान्नाय्यप्रायश्चित्तम् । यदीष्टिमध्ये यजमानक(म)रणं स्यात्तदा सर्वेभ्यो हविर्भ्यो द्विर्द्विरवदाय देवता(ः ?) समुच्चार्य स्वाहाकारेण जुहुयात् । अनिरुप्ते (हविषि प्रयोगत्याग एव) ॥

Colophon: (Sheet No. 38)

इत्यग्निहोत्रप्रकरणम् ।

Subject: Vidhyaparādhaprāyaścitta-a prayoga treatise giving the details of expiatory ceremonies in the Ādhāna, Agnihotra and Darśapūrṇamāsa sacrifices.

Remarks:—The Ms. is in a fairly good condition. The first and last sheets are a bit worn out. This Ms. breaks off towards the end of Darśapūrṇamāsaprāyaścitta.

॥ आश्वलायनकूष्माण्डहोमप्रयोगः ॥

2679. ĀŚVALĀYANAKŪṢMĀṆḌAHOMA-PRAYOGAḤ.

Burnell's Catalogue No. 3898 a. Page 143. Right column.
Substance—Paper. Size—$10\frac{7}{8} \times 4\frac{7}{8}$ **inches.** Sheets—10 (1-10). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

कूश्माण्डहोमगणहोमविधिः ॥

स च कृच्छ्रादिना शुद्धस्यापि नियतः कर्मादिष्वेतै-र्जुहुयादिति वचनात् । अत एव शुद्धोऽपि कूश्माण्डगणाहुतिः क्रमादिति कुर्यात् ॥ कल्पसारः ॥ तत्प्रकारमाह जमदग्निः—

अथातः संप्रवक्ष्यामि कूष्माण्डविधिमुत्तमम् ।
एनसां स्थूलसूक्ष्माणां प्रायश्चित्तन्तु वैदिकम् ॥
अपूर्वं विहितं कर्म निन्दितं च समाचरन् ।
प्रसज्य चेन्द्रियार्थेषु प्रायश्चित्ती भवेद्द्विजः ॥
केशश्मश्रू वापयित्वा स्नात्वा पुण्यजलाशये ।
आज्यभागानन्तरेण कूश्माण्डैर्जुहुयाद्द्विजः ॥
यद्देवेत्यनुवाकैश्च त्रिभिर्हुत्वाज्यमन्वहम् ।
वैश्वानरायेत्येताभिस्तमग्निमुपतिष्ठते ॥
यदित्याधाय समिधं जयादि प्रतिपद्यते ।

कर्मादिष्वेतैर्जुहुयात्पूतः स्वर्गं समश्नुते ॥

End

यदन्नमद्म्यनृतेन देवा
दास्यन्नदास्यन्नुत वा करिष्यन् ।
यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च
प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥
यदन्नमद्मि बहुधा विरूपं
वासो हि(र)ण्यमुत गामजामविम् ।
यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च
प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥ १२ ॥

इति द्वादशेन सूक्तेनोपस्थायोपविश्य त्रयोदश्याः समिधमग्नावादध्यात् । यन्मयेत्यस्य मन्त्रस्य ब्रह्मा स्वयंभू ऋषिः अग्निर्वैश्वानरो देवता अनुष्टुप्छन्दः समिद्धोमे विनियोगः। "ॐ यन्मया मनसा वाचा कृतमेनः कदाचन । सर्वस्मात्तस्मान्मेलितोमोग्धि त्वं हि वेत्थ यथा तथं स्वाहा"। अग्नये वैश्वानरायेदं० । वरं ददाति । अथ पूर्ववत्तं स्विष्टकृतं जुहुयात्। "यदस्य कर्मणः" इति मन्त्रेण ततः रज्जुप्रहरणादिहोमशेषं समाप्याग्रेणाग्निमश्वत्थपर्णेषु निदधाति ॥ ततः पूर्णपात्रनिनयनादि कर्मसमर्पणान्तं कृत्वा द्वादशावरान्ब्राह्मणान्भोजयित्वा व्रतं परिसमाप्य ततो गणहोमं कुर्या(त्) ॥

Colophon:

इति कूष्माण्डहोमः ।

Subject: Kūṣmāṇḍahomaprayoga—according to the Āśvalāyana school of Ṛg-Veda. This is one of the main

expiatory ceremonies to be performed by every Yajamāna to purify his soul, just before the performance of any vedic sacrifice.

Remarks :—The Ms. is in good condition. The other work contained herein is Gaṇahoma.

॥ बोधायनकूष्माण्डहोमप्रयोगः ॥

2680. BODHĀYANAKŪṢMĀṆḌAHOMA-PRAYOGAḤ.

Burnell's Catalogue No. 3884. **Page** 143. Right column. Substance—Paper. **Size**—9½ × 4½ **inches**. Sheets —10 (1-10). Lines-9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—525. Author—? Complete.

Beginning :

श्रीगणेशाय नमः ॥

अग्नीनाधास्यमानः पापस्य तारतम्यं विचार्य संवत्सरं मासं चतुर्विंशतिदिनानि द्वादशदिनानि षड्दिनानि त्रिदिनानि वा कूष्माण्डं जुहुयात् । अमावास्यायां पौर्णमास्यां वोपक्रमः । अथ कूष्माण्डहोमप्रयोगः । प्राणानायम्य, तिथ्यादि सङ्कीर्त्य । आधानाधिकारसम्पादकसमस्तपातकनिबर्हणार्थं कूष्माण्डैर्होष्ये इति सङ्कल्प्य, श्मश्रुकेशलोमनखानि वापयित्वा, स्नानादि विधाय, पुण्याहं वाचयित्वा, तिथ्यादि सङ्कीर्त्य, पूर्ववत् सङ्कल्प्य, स्थण्डिलाद्यग्निमुखान्तं कृत्वा, आघारान्तं सङ्कल्प्य, सवितारश्वरुद्रव्येण देवादीन् तत्तन्मन्त्रार्थानाज्येन स्विष्टकृतमग्निमित्यादि सङ्कल्प्य, आघारार्थं तन्त्रं कृत्वा, तत्सवितुर्व-

रेण्यमित्येतया चरुं सवित्रे हुत्वा, स्विष्टकृतमवदायान्तः-
परिधि सादयित्वा, आज्याहुतीर्जुहोति ।

End:

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुतवा करिष्यन्।
यद्देवानां चक्षुष्यागो अस्ति यदेव किंचत्प्रतिजग्राहमग्नि-
र्मा तस्मादनृणं कृणोतु ॥
यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविम् ।
यद्देवानां चक्षुष्यागो० ॥ इत्युपस्थानम् । अथ त्रयोदश्यां
समिधमादध्यात् ।
यन्मया मनसा वाचा कृतमेनः कदाचन ।
सर्वस्मात्तस्मान्मेळितो मोग्धि तं हिवेत्थं यथा तथ स्वाहा ॥
अग्नय इदम् ॥ स्विष्टकृदादि समाप्य वरदानं कृत्वाग्नेः
पुरस्तादश्वत्थपर्णे हुतशेषं निदध्यात् । यावद्धोमदिनानि
तावन्मास स्त्रीपर्यङ्कादेशयनामृतवर्जनं पयोभक्षणमशक्ता-
वोदनादि ॥

Colophon:

इति कूष्माण्डहोमः ॥

Subject: Kūśmāṇḍahomaprayoga—belonging to the Bodhāyana school of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition. The other work contained herein is 'गणहोम'. On the title page is given

'इदं बोधायनकूश्माण्डहोमपुस्तकं पुरुषोत्तमभट्ट लाण्डगेयाचे' 'सयीबायी जतकून मागून घेतल'

The hymns quoted in this Ms. are accented.

॥ कूष्माण्डहोमप्रयोगः ॥

2681. KŪṢMĀṆḌAHOMAPRAYOGAḤ.

J. L. Collection No. 280. Substance—Paper. Size— 6 × 4 inches. Sheets—7 (9-15). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—(?). Complete.

Beginning:

अथ कूष्माण्डहोमः ।

श्रीगणेशाय नमः ॥

अग्निनाधास्यमानः पापस्य तार्त(तारत)म्यं विचार्य संवत्सरं मासं चतुर्विंशतिदिनानि द्वादशदिनानि षड्दिनानि त्रीणि दिनानि वा कूष्माण्डैर्जुहुयात् । अमावास्यायां वा अन्यत्र विहितकाले पूर्वाह्णे उपक्रमः । अथ कूष्माण्डहोमप्रयोगः ॥ प्राणानायम्य, तिथ्यादि सङ्कीर्त्य ॥

End:

"यन्मया" इति मन्त्रस्य ब्रह्मा स्वयं ऋषिः अग्निर्देवतानुष्टुप्छन्दः समिद्धोमे विनियोगः । "यन्मया मनसा वाचा कृतमेनः कदाचन ।

सर्वस्माचस्मान्मेलितोमोग्धि त्वं हि वेत्थ यथा तथं स्वाहा" ।

अग्नय इदम् । यावद्धोमदिनानि तावत् (न)मांसस्त्रीपर्यङ्का दिवास्वापानृतवदना पयोभक्षणं अत्रो(श) क्षावोदनादि ॥

Colophon:

इति कूष्माण्डहोमः समाप्तः ।

श्रीकृष्णार्पणमस्तु ॥ गाम्भीरेः ॥

Subject: Kūśmāṇḍahomaprayoga.

Remarks:—The Ms. is in good condition. This Ms. belonged to one Gāmbhīri, otherwise known as Bhāskararāya son of Ghambhirarājabharatīdīkṣita. The other work contained herein is Prāyaścittaprayoga.

॥ आश्वलायनगणहोमप्रयोगः ॥

2682. ĀŚVALĀYANAGAṆAHOMAPRAYOGAḤ.

Burnell's Catalogue No. 3898 b. Page 143. Right column. Substance—Paper. Size—$10\frac{7}{8} \times 4\frac{7}{8}$ inches. Sheets—13 (11—23). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—240. Author—?. Complete.

Beginning:

अथ गणहोमः । त(त्र) सङ्ग्रहकारः ।

गणहोमं प्रवक्ष्यामि श्रौताधानादिसिद्धये ।
बौधायनमतेनैव समासेन यथातथम् ॥
आधानादि चिकीर्षुः सन् सपत्नीको धृतव्रतः ।
पूर्वाह्णे नित्यकर्मान्ते गृह्याग्निं सुसमिध्य च ॥
पाकयाज्ञिकधर्मेण स्वगृह्योक्तविधानतः ।
सह प्रणीतापात्रेण कलशं तन्तुवेष्टितम् ॥
आसाद्योदकसंपूर्णं कृत्वाग्नौश्रपयेचरुम् ।
तूष्णीं हे होमपर्याप्तं निर्वापप्रोक्षणान्वितम् ॥
जुहुयादाज्यभागान्ते सावित्र्यादाय तं स्रुचा ।
अवदाय स्विष्टकृते तत्संस्थाप्य च बर्हिषि ॥
अवशिष्टे चरौ तस्मिन्नाज्यं सिञ्चेद्यथाप्लुतम् ।
आदायमेक्षणेनैव हुनेत्तचाष्टभिर्गणैः ॥

षळृचोग्नेनयेत्याद्योऽष्टादशर्चस्तु योरुपः ।
द्वाविंशर्चामृगाराख्यो योगमिति चतुर्ऋचः ॥
यात्रामिति ततोऽष्टर्चस्ततः सप्तदशर्चकः ।
पावमानस्तु षष्ठस्यादच्छिद्रपठितस्ततः ॥
यद्देवा इति विंशर्चोऽष्टर्चो वैश्वानरोऽष्टमः ।
एवश्च त्र्युत्तरशतं मन्त्राः स्युर्गणहोमके ॥
इति हुत्वा ततः स्विष्टकृतं प्राक्स्थापितं हुनेत् ।
स्वगृह्योक्तविधानेन होमशेषं समापयेत् ॥

End:

"यस्तु द्विष्मस्तन्नु जहि" इति पठित्वा ततः "सुमित्रा न आप ओषधयः सन्तु" इति कलशादञ्जलिनोदकं गृहीत्वा "दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः" इति द्वेष्यदिशि निषिच्य, ततस्तूष्णीं तत्कलशं पृष्ठतः परास्थाय, उपस्पृश्यानवेक्षमाणो गृहमागत्य, स्नात्वाचम्य कर्म समर्पयेत् । एवं सप्ताहादि यथासङ्कल्पं त्रिषवणं कृत्वा तदन्ते ब्राह्मणान्संभोज्य गोहिरण्यादि दक्षिणां दत्वा नियतो भवेत् ॥

Colophon:

इति गणहोमः ॥

Subject: Gaṇahomaprayoga, belonging to the Āśvalāyana school of the Ṛg-Veda, giving the prayoga details of the Gaṇahoma—an expiatory ceremony to be performed by all yajamānas just before the beginning of all Vedic Sacrifices.

Remarks:—The Ms. is in fairly good condition. The other work contained herein is 'कूष्माण्डहोमप्रयोगः'

॥ बोधायनगणहोमप्रयोगः ॥

2683. BODHĀYANAGAṆAHOMAPRAYOGAḤ.

Burnell's Catalogue No. 3884 b. Page 143. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—11 (11—21). Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—(?). Complete.

Beginning :

अथ गणहोमः ॥

पूर्वाह्णे गृह्याग्निं प्रतिष्ठाप्य, प्राणानायम्य, तिथ्यादि सङ्कीर्त्य, आधानाधिकारसंपादकसमस्तपापक्षयार्थं अशेषकर्मानुष्ठानयोग्यतासिद्ध्यर्थञ्च गणहोमं करिष्ये । आघारान्तं तन्त्रं सङ्कल्प्य । अत्र प्रधानं सवितारञ्चरुद्रव्येण स्विष्टकृतमग्निमित्यादि कुर्यात् । पक्वञ्चरुं सावित्र्या हुत्वा चरौ प्रभूतमाज्यमानीय जुहुयात् । "अग्ने नय" इति षडृचस्य सूक्तस्य विश्वेदेवा ऋषयः अग्निर्देवता त्रिष्टुप् छन्दः । चरुहोमे विनियोगः ।

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम स्वाहा ॥

End :

"यमु द्विष्मस्तमुज्जहि" इति ततस्ताः पात्रगताः आपो निर्ऋत्यां दिशि स्वनैर्ऋत्याधिष्ठितायां वा दिशि निनयति । "दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः" । इति । अथ पात्रं परास्य प्रष्ठतोऽनवेक्ष्य(क्ष)माणो यथा-

गतमागत्य हस्तादि क्षाळनं कुर्यात् । कर्मान्ते ब्राह्मणान् पायसादिना भोजयित्वा गोहिरण्यादि ब्राह्मणेभ्यो दद्यात् । अथ माघादिपञ्चमासेषु श्रावण्याश्विनमार्गशीर्षमासेषु वा कृत्तिकारोहिणीपुनर्वसु पूर्वा ३ उत्तरा ३ चित्रामृगश्रवणानूराधासु ॥

Colophon:

इति कूष्माण्डगणहोमः समाप्तः ॥

Subject: Gaṇahomaprayoga according to the Bodhāyana school of the Black Yajurveda giving the prayoga details of the Gaṇahoma—an expiatory ceremony in vedic sacrifice.

Remarks:—The Ms. is in good condition. The other work contained herein is 'कूष्माण्डहोमः'

॥ कूष्माण्डगणहोमप्रयोगः ॥

2684. KŪṢMĀṆḌAGAṆAHOMAPRAYOGAḤ.

Burnell's Catalogue No. 9148 a. Page 25. Left column. Substance—Palm leaf. Size—18 × 1 inches. Leaves—7 (1—7). Lines—8 to a Page. Script—Grantha. No. of Granthas—150. Author—(?). Complete.

Beginning:

(कूष्माण्डहोम)प्रयोग उच्यते ।

अमावास्यायां पौर्णमास्यां वा केशश्मश्रुलो(मनखानि वापयित्वा अहत) वासा यजमानः प्रातरौपासनं कृत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पव................कल्पं करोति । अस्यां पुण्यातिथौ ममोपात्तदुरितक्षयद्वारा परमेश्वरप्री

……नि(यावन्त्येनांसि सम्भवन्ति तावतामेनसां नि-र्हरणद्वारा करिष्यमाणाभ्या…………………र्थं त्र्यहं कूष्माण्डैर्होष्यामि ॥

*　　　*　　　*

ब्रह्मणे वरं ददाति अभ्युदयं पुण्याहश्च कुर्यात् । सन्तिष्ठते कूष्माण्डहोमः ॥

ब्रह्मचारी कल्पेन व्रतमुपैति । संवत्सरादि त्रिरात्र्यन्तं व्रतं न मांसमश्नीयात् न स्त्रियमुपेयात् नोपर्यासीत जुगुप्सेतानृतात् पयोभक्ष इति प्रथमः इति कल्पः ॥

क्षापवित्र सहस्राक्षं मृगारां होमुचौ गणौ ।
पावमान्यश्च कूष्माण्ड्यो वैश्वानर्यऋचश्च याः ॥

घृतोदनेन ता जिह्वन् सप्ताहं सवनत्रयम् ।
एकाहं (वा) त्र्यहं वापि प्रत्यहं सकृदेव वा ॥

मौ(नं) व्रती हविष्याशी जितक्रोधो जितेन्द्रियः ।
सिंहे म इत्यपाम्पूर्णपात्रे वेक्ष्य चतुष्पथे ॥

मुच्यते सर्वपापेभ्यो महतः पातकादपि ।

उत्तरायणे पूर्वपक्षे पुण्ये नक्षत्रे प्रातरौपासनं हुत्वा प्राणानायम्य पत्न्या सह सङ्कल्पः अंह आगएनोर्निर्हर·णार्थं सप्ताहं सवनत्रयं त्रा गणैर्होष्यामि उल्लेखनादिप्राकृतो-यनिधानान्ते श्रपयित्वा अभिघारणं अग्नेः उपसमधानादि प्रणीताप्रणयनं कृत्वा कलशं पूरयित्वा उत्तरेणाग्निं दर्भेषु सादयति ब्रह्मा वागाद्यग्निमुखान्ते चरावाज्यमानीय द·

ब्योंपघातं सर्वाहुतीर्जुहोति । "अग्ने नय सुपथा + नमउक्तिं विधेम स्वाहा" । अग्नय इदं० ॥

End:

"वैश्वानरस्य सुमतौ + सूर्येण स्वाहा" । सर्वेषामग्नये वैश्वानरायेदं चरुमभिघार्य स्विष्टकृतं जुहोति । पूर्ववदुपाघातपक्ष एव । जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा परिध्यञ्जनादि पूर्ववत् ब्रह्मोद्वासनं कलशमादाय चतुष्पथं वाच्छन्तीपादौ प्रक्षाल्याचम्योपविश्य जपति ॥

Colophon:

गणहोमस्समाप्तः ॥

Subject: Kūṣmāṇḍahomaprayoga and Gaṇahomaprayoga.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 2357.

The following is given after the colophon:—

सिंहे मे मन्युः । व्याघ्रे मेन्तरामय । वृके मे क्षुत् ** "यमुद्विष्मस्तमुज्जहि" अपो दृष्ट्वा जपति । "सुमित्रा न आप 'ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान द्वेष्टि यञ्च वयं द्विष्मः" । पाप्मन् नैर्ऋत्यां निरस्य अप उपस्पृश्य ॥

॥ कूष्माण्डगणहोमप्रयोगः ॥

2685. KŪṢMĀṆḌAGAṆAHOMAPRAYOGAḤ.

Burnell's Catalogue No. 8688. Page 23. Right column Substance—Paper. Size —11×4¼ inches. Sheets—12. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—175. Author—?. Complete.

Beginning :

अथ कूष्माण्डहोमः ॥

अग्नीनाधास्यमानः सर्वदुरितपूर्वपाप(पनोदनक्ष)मः सर्वप्रायश्चित्तरूपं कूष्माण्डहोमं कुर्यात् । अमावास्यायां वा यजेत ॥ तस्यायं प्रयोगक्रमः । एनोनिर्हरणार्थं कूष्माण्डैर्होष्यामीति सङ्कल्प्य श्मश्रुकक्ष[ः]लोमनखानि वापयित्वा स्नानाद्यनन्तरं देवतादिसङ्कल्पं कुर्यात् ॥

* * *

अथ कर्माङ्गकृतः प्रयोगः

अग्न्याधेये पूर्णाहुतिं हुत्वा कूष्माण्डैर्जुहुयात्पूतो देवलोकान्समश्नुत इति ब्राह्मणम् ॥

इति कूष्माण्डहोमः ॥

अथ गणहोमः ॥

पापा(प)नोदनकामः पूर्वाह्णे गृह्याग्निं प्रतिष्ठाप्य प्राणानायम्य समस्तपापक्षयार्थं अशेषकर्मानुष्ठानयोग्यतासिध्यर्थं गणहोमं करिष्ये ॥

End :

पावमानीः॰स्वती । ऋषिभिः॰हितं स्वाहा । पा॰ इदम् । पावमानीर्दि॰ता स्वाहा । पा॰दम् । पावमानीस्व॰ श्च्युतः । ऋषिभि॰हितम् । स्वाहा । पा॰इदम् । येन दे(वाः)

Colophon : Nil.

Subject : Kūṣmāṇḍagaṇahoma Prayoga.

Remarks :— The Ms. is in good condition. This Ms. abruptly breaks off towards the end of Gaṇahoma.

॥ आपस्तम्बोत्सर्गेष्टिप्रयोगः ॥

2686. ĀPASTAMBOTSARGEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 9110 g.

Substance—Palm leaf. **Size**—$16\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaf-(7th) Lines—7 or 8 to a page. Script—Telugu. No. of Granthas—28. Author—(?). Complete.

Beginning:

अग्नीनाधास्ये । अ—विभूयासमिति सङ्कल्प्य । तत उत्सर्गेष्टिः । पुनस्सङ्कल्प्य । इष्ट्वा यक्ष्ये । "विद्युदसि" "अद्य यज्ञाय" "इमामूर्जम्" पिष्टं हविः । पौर्णमासं तन्त्रम् । पञ्चदश सामिधेन्यः । पात्रप्रयोगकाले अष्टात्रिंशत्कपालानि स्थालीस्फ्यश्च द्वन्द्वं । इतराणि प्रकृतिवत् ॥

End:

विसृज्य प्राशित्रं चतुर्धाकरणं अन्वाहर्ये दक्षिणे "यज्ञो बभूव" यज्ञशञ्च । ब्राह्मणभोजनान्तम् । श्वः प्रकृतेष्टिं कृत्वा आयतनस्थाने सर्वानग्नीन् ज्वलन्तमुत्स्पृशति ॥ ९ ॥ वर्षानुशरदि ...... ॥

Colophon : Nil.

Subject: Āpastambotsargeṣṭiprayoga—giving the **prayoga** details of the Utsargeṣṭi, according to the **Āpastamba** school of the Black Yajurveda.

Remarks: —The Ms. is in a much decaying condition. Dr. **Burnell** has failed to note this work though the No. has been **noted by** him. For the other works contained in this Ms. see the **list** under Remarks on No. 2099.

॥ काम्येष्टयः ॥

2687. KĀMYEṢṬAYAḤ.

Not Noticed by Burnell.

Substance—Paper. Size—$7\frac{1}{8} \times 6$ inches. Sheet—1. Lines—22 to a Page. Script—Devanāgarī. No. of Granthas—40. Author—(?) Incomplete.

Beginning:

अथ काम्येष्टीनां स्थाने काम्याश्चरवस्तानेव नामानाम्नोति । अनाहिताग्निः पर्वण्यौपासने कुर्यात् । तेषां पार्वणस्थालीपाकवन्नाममन्त्रेण निर्वापप्रोक्षणहोमाः । अथाग्नेयाश्चरवो विकल्पवर्जिताः प्रजाकाम इन्द्राग्निभ्यां तामेवेच्छन् पुत्रे वा जाते वा स निमेष्यं वैश्वानराय आयुष्काम आयुष्मत इन्द्राय त्रात्रे च स्वस्त्ययनकामस्वस्तिमते भूतिकामो जातवेदसे आरादादित्येभ्यो भुवद्भ्यो (?) वा पुत्रकामः पुत्रिणे तस्मा इन्द्राय पुत्रिणे च वा रुचिकामो रुक्मते तेजस्कामस्तेजस्वते सर्वमायुरेष्यन् क्षामवते ग्रहदाहे च समानेषु श्रैष्ठ्यकामो मूर्धन्वते कामस्सिद्ध्यै कामाय क्षेत्रेषु वा सजातेषु वा स्पर्धमाने यविष्ठाय क्षेत्रपतये० ॥

End:

सर्वजनमैत्रीं कृत्स्नपापापनुत्तिं पवित्रतां चेच्छन्नग्नयेऽंहोमुच इन्द्रायांहोमुचे मित्रावरुणाभ्यामागो मुग्भ्यां वायुसवितृभ्यमागो मुक् सामाश्विभ्यामागो मुग्भ्याम् । मरुद्भ्य एनोमुग्भ्यो विश्वेभ्यो देवेभ्य एनोमुग्भ्योऽनुमत्याग्नये वैश्वानराय द्यावापृथिवीभ्यामेनो मुग्भ्यामिति च दशभ्य इति पूर्वोक्तमेव कामयन्, अग्नये पवमानाय,

सरस्वत्यै प्रियायै, अग्नये पावकाय, सवित्रे सत्यमसत्रायाग्नये शुचये, वायवे नियुत्वते, अग्नये व्रतपतये, दधिक्राव्णे, अव्णोग्नये (?) वैश्वानराय, त्रिष्णात्रे शिपिविष्टायेति च दशभ्य इति ॥

काम्याः संगृह्य लिखिताः केचनात्र यथामति ।
शिष्टांस्तु श्रुतितो ज्ञेयाः सूत्रेभ्यस्तत्र तत्र तु ॥

इति ॥ श्रीः ॥

Colophon : Nil.

Subject : Kāmyeṣṭis performed for the attainment of various objects in life. This Ms. gives a complete list of Kamyeṣṭis.

Remarks :—The Ms. is in a decaying condition.

॥ आश्वलायनकुण्डलेष्टिप्रयोगः ॥

2688. ĀŚVALĀYANAKUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3951. Page 26. Left column. Substance—Paper. Size—10×4½ inches. Sheets—3. Lines —7 or 8 to a page. Script—Devanāgari. No. of Granthas —20. Author—(?) Complete.

Beginning :

श्रीगणेशाय नमः ॥

कुण्डलेष्टिप्रयोगः ॥

अस्या इष्टेः पञ्चदश सामिधेन्यः । वार्तघ्नावाज्यभागौ । अग्निस्सोमो वरुणः सरस्वत्याग्नाविष्णू च प्रधानदेवताः । स्विष्टकृत्प्रयाजादयोऽङ्गदेवा आज्यपाश्च । "नमः

प्रवक्त्रे" इत्यादि "आ वह देवान्यजमानाय । अग्निमग्न आवह । सोममावह । अग्निमावह । सोममावह । वरुणमावह । सरस्वतीमावह । अग्नाविष्णू आवह । देवाँ- आज्यपाम्" इत्यादि ।

End:

प्रिप्रीहि देवा० यजिष्ठोम ॥ ये० हेग्निं स्विष्टकृतम् ॥ "अयाळग्निरग्नेः प्रियाधामायाट्सोमस्य प्रियाधामान्यया- ळग्नेः प्रियाधामान्ययाट् सोमस्य प्रियाधामान्ययाड्वरुणस्य प्रियाधामान्ययाट् सरस्वत्याः प्रियाधामान्ययाळग्नावि- ष्णवोः प्रियाधामान्ययाड्देवानामाज्यपानाम् ।" इत्या- दि "जुषतां हविरग्ने यद्य० अद्यावौ० ॥ सूक्तवाके ॥ अग्निरिदं+कृत ॥ सोम इदं+कृत ॥ अग्निरिदं० सोम इदं ॥ वरुण इदं ॥ सरस्वतीदं ॥ अग्नाविष्णू इदं० वृधे वां महोज्यायो क्रातम् । देवा आज्यपाः" इत्यादि सं- स्थाजपान्तम् ॥ संपूर्णः ॥

Colophon: Nil.

Subject: Āśvalāyanakuṇḍaleṣṭi or Āyuṣkāmeṣṭi prayoga giving the prāyoga details of the Kuṇḍaleṣṭi (the duties of the Hotṛ priest) according to the Āśvalāyana School of the Ṛg Veda.

Remarks :—The Ms. is in good condition.

॥ आश्वलायनकुण्डलेष्टिप्रयोगः ॥

2689. ĀŚVALĀYANAKUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3952. Page 26. Left column.

Substance—Paper. Size—10×4¾ inches. Sheets—2. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—(?) Complete.

Beginning, end, colophon and subject—Same as No. 2688.

Remarks:—The Ms. is in a good condition.

॥ आश्वलायनकुण्डलेष्टिप्रयोगः ॥

2690. ĀŚVALĀYANAKUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3953. Page 26. Left column.

Substance—Paper. Size—10×4¾ inches. Sheet—1. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—(?) Complete.

Beginning, end, and subject—Same as No. 2688.

Colophon:

कुण्डलेष्टिहौत्रं समाप्तम् ॥

Remarks:—The Ms. is in a good condition.

॥ आश्वलायनकुण्डलेष्टिप्रयोगः ॥

2691. ĀŚVALĀYANAKUṆḌALEṢṬIPRAYOGAḤ.

Not Noticed by Burnell.

Substance—Paper. Size—10×3¼ inches. Sheet—1. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2688.

Remarks:—The Ms. is in good condition.

॥ कुण्डलेष्टिप्रयोगः ॥

2692. KUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3875. Page 25. Right column. Substance—Paper. Size —$10\frac{4}{8} \times 4\frac{7}{8}$ inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī No. of Granthas—50. Author—(?) Complete.

Beginning :

अथ आयुष्कामेष्टिप्रयोगः ॥ कुण्डलेष्टिः ॥

ज्योगामयावीसर्वायुष्कामी वा यः कश्चिदमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा । पत्न्या सह प्राणानायम्य शरीरे वर्तमानरोगशान्त्यर्थं आयुष्याभिवृद्ध्यर्थं समस्तपापक्षयार्थं इष्ट्या यक्षे । "त्रिवृदसि" "अद्य यज्ञाय" "इमावूर्जं पञ्चदशीम्"। ऐन्द्रं हविः । पौर्णमासतन्त्रम् ।

❀ ❀ ❀ ❀

End :

"आयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसि। सर्वं म आयुर्भूयात्। सर्वमायुर्गेषम्" एवं सव्ये । "आयुरसि० गेषम्" "अग्निरायुष्मान्" इत्यनुवाकशेषेण षड्भिर्मन्त्रैरध्वर्युर्यजमानस्य हस्तं गृह्णाति ।

❀ ❀ ❀ ❀

आग्नेयवारुणसारस्वतानां चतुर्धाकरणम् । अन्वाहार्यो दक्षिणा। यथादेवतमुज्जितयः । यज्ञो बभूव । यज्ञस्य श्रमवर्जम् । ब्राह्मणतर्पणान्तम् । सन्तिष्ठते आयुष्कामेष्टिः

Colophon :

सम्पूर्णः ॥

Subject: Kuṇḍaleṣṭi or Āyuṣkāmeṣṭi prayoga giving the prayoga details of the Kuṇḍaleṣṭi which is to be performed by those who aim at longevity.

Remarks:—The Ms. is in good condition.

॥ कुण्डलेष्टिप्रयोगः ॥

2693. KUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 9183 h. Page 24. Left column. Substance—Palm Leaf. Size—$14\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—6 (33-38). Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—100. Author—(?) Complete

Beginning:

कुण्डलेष्टिप्रयोगः ॥

ज्योगामयावी सर्वायुष्यकामी वा उत्तरया यजेत । अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह विघ्नेश्वरं ध्यात्वा प्राणानायम्य सङ्कल्पं करोति । ममोपात्तसमस्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं पञ्चहविष्कया इष्ट्या यक्ष्ये । चिररोगविमुक्त्यर्थं दीर्घायुष्यसिद्ध्यर्थमिति वा फलानिर्देशः । दर्भनिरसनादि "विद्युदसि ।" ऋत्विग्वरणम् । अग्निविहरणादि "अद्य यज्ञाय रमताम्" "इमामूर्जं पञ्चदशीम्" ऐष्टं हविः । पौर्णमासतन्त्रम् । बर्हिराहृत्य व्रतप्रवेशः । "पयस्वति" इत्यादि सप्तदश सामिधेन्यः । "यत्कृष्णोरूपम् ।" ततस्त्वां त्रयोविंशतीया सम्भरामि । वेदं कृत्वोपवेषः ॥

ततः स्विष्टकृदादि आग्नेयवारुणसारस्वतानां विरुन्ध्य प्राशित्रम् । तेषामेव चतुर्धाकरणम् । अन्वाहार्यो दक्षिणा ब्रह्मन् ब्रह्मा संत्वादि प्रकृतिवत् । सूक्तवाके यथादैवतमुज्जितयः । अग्नय इदम् "अग्नेरहमुज्जितिमनूज्जेषम्" । सोमायेदम् "सोमस्याहमुज्जितिम्" । वरुणायेदम् "वरुणस्याहमुज्जितिम्" । सरस्वत्या इदम्, "सरस्वत्याहमुज्जितिम् ।" अग्नाविष्णुभ्यामिदम्, "अग्नाविष्णोरहमुज्जितिम्" । "देवेभ्य आज्यपेभ्यः" इत्यादि । "यज्ञो बभूव" यज्ञशंचमवर्जम् । ब्राह्मणतर्पणान्तम् । इष्टिः परिसमाप्यते ।

हरिः ॐम् ॥

Colophon : Nil.

Subject: Same as No. 2688.

Remarks:—The Ms. is in good condition. For the other works contained herein see Remarks under No. 2152.

॥ जातेष्टिप्रयोगः ॥

2694. JĀTEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 9183. **Page** 24. Left column. **Substance**—Palm leaf. Size—$14\frac{1}{4} \times 1\frac{1}{4}$ **inches**. Leavss—5 (39-43). Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—80. Author—(?). Complete.

only.

Beginning:

जातेष्टिप्रयोगः ॥

पुत्रजननानन्तरं भाण्डस्पर्शादूर्ध्वं कर्तव्या । वैश्वानरं

द्वादशकपालं निर्वपेत् पुत्रे जाते। यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति। यन्नवकपालस्त्रिवृतैवास्मि-स्तेजो दधाति। यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति। यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति। यद्द्वादश-कपालो जगत्यैवास्मिन् पशून् दधाति। यस्मिन् जात एतामिष्टिं निर्वपति। पूत एव तेजस्व्यन्नाद इन्द्रि-यावी पशुमान् भवतीति ब्राह्मणम्॥

End:

हविःशेषोद्वासनादि। सूक्तवाके अग्नय इदम् "अग्ने-रहमुज्जितिमनूज्जेषम्"। अग्नये वैश्वानरायेदम् "अग्नेर्वै-श्वानरस्याहमुज्जितिम्"। देवेभ्य आज्यपेभ्य इत्यादि। उपस्थानकाले "अगन्म प्रजाम्। प्रजामगन्म सन्दशस्ते।" इत्यादि "यज्ञो बभूव" यज्ञशंचमवर्जम्। ब्राह्मणतर्पणान्त-मिष्टिः परिसमाप्यते॥

Colophon: Nil.

Subject: Jāteṣṭiprayoga giving the prayoga details of the Jāteṣṭi which is to be performed by every dvija father soon after the birth of his son for the purity and welfare of the new-born child. The peculiarity of this sacrifice is that the performer of the Iṣṭi does not attain its fruit.

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 2152.

॥ त्रैधातवीयेष्टिप्रयोगः ॥

2695. TRAIDHĀTAVĪYEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 9157 a. Page 25. Right column. Substance—Palm leaf. Size—15 × 1⅛ inches. Leaves—2 (1—2). Lines— 6 or 7 to a Page. Script—Grantha. No. of Granthas—45. Complete.

Beginning:

अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा त्रैधातवीयया यक्ष्ये । "विद्युदसि" । अग्नीन्विहृत्यान्वाधानादि । "अद्य यज्ञाय" । "इमामूर्जं पञ्चदशीम्" प्रथमं वा त्रैधातवीयं हविः । व्रतप्रवेशः । सप्तदश सामिधेन्यः । आमावास्यं तन्त्रम् । वेदं कृत्वा वेदिः । द्वादशकपालानि स्फयश्च द्वन्द्वं शूर्पद्वयम् एकमेवोलूखलं मुसलञ्च अन्वाहार्यस्थालीवर्जम् । पवित्रकरणादि वेषाय वाम् । निर्वापकाले "इन्द्राविष्णुभ्यां जुष्टं निर्वपामि" इति व्रीहीनन्वावापान्तं कृत्वा शूर्पान्तरे यवानामप्यन्वावापान्तं कृत्वा ततो व्रीहीन् । सैव देवता । "इन्द्राविष्णू हव्यं रक्षेताम्" इति तन्त्रेणोपसादनम् । "इन्द्राविष्णुभ्यां वो जुष्टं प्रोक्षामि" । व्रीहीनवहत्य यवानवहन्ति नानाबीजधर्मेण । तथैव त्रिष्फलीकरणपेषणे । कपालोपधाने अष्टाभ्य ऊर्ध्वन्तूष्णीम् । व्रीहिपिष्टानि प्रथमं समोप्यान्यस्यां पात्र्यां यवपिष्टसंवापः ॥

End:

हिरण्यं तार्प्यं धेनुरिति दक्षिणा । "ब्रह्म पिन्वस्व" इत्यवि-

कारेणोक्त्वा सहस्रधारा उत्सा अक्षीयमाणाः ता दध्रः पृथि-
वीमन्तरिक्षं दिव ... ताभिर्हिरण्यताप्यधेनुभिरतितराणि मृ-
त्युम् । ब्राह्मणाः इमा वो हिरण्यतार्प्ययेन वः । ब्रह्माणि
ब्रह्माणि स्थ ब्रह्मणे वो हुताद्य मामाहिंसिष्ट ...हुतामह्यं
शिवानि भवत एवं नपुंसकलिंङ्गेनोहः । हिरण्यतार्प्यशब्द-
योः 'नपुंसकलिङ्गसन्निपाते नपुंसकलिङ्गं शिष्यते' इति
व्याकरणस्मृतेः । ब्राह्मणा इमानि वो तार्प्यहिरण्यधेनूनि ।
नपुंसकलिङ्गपाठं प्रत्यन्तरमतम् (?) । अग्नये हिरण्यमिति
हिरण्यप्रतिग्रहः उत्तानस्त्वेति तार्प्यस्य घृताक्तवस्त्रस्य रुद्राय
गामिति धेनोः । अत्र "यज्ञो बभूव" । यजमानस्य पुनरन्वा-
हार्यत्वात् यज्ञशंचमवृष्टिवर्जं ब्राह्मणभोजनान्तम् । ॐ ॥

Colophon : Nil

Subject : Traidhātavīyeṣṭiprayoga, giving the Prayoga details of the Traidhātavīya sacrifice.

Remarks :—The Ms. is in a fairly good condition. The other work contained herein is 'भगवत्स्तुतिव्याख्या.' A transcribed copy of this Ms. is also available in the Library. See Transcript Vol. 276. the date of copying being 1920 A. D.

॥ त्रैधातवीयेष्टिप्रयोगः ॥

2696. TRAIDHĀTAVĪYEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 9172 h.

Substance—Palm leaf. Size—$16 \times 1\frac{1}{2}$ inches. Leavss—2 (78 & 79). Lines—8 to a Page. Script—Grantha. No. of Granthas—15. Author—(?) Complete

Beginning:

॥ त्रैधातवीया ॥

अथ त्रैधातवीयया यक्ष्ये । "विद्युत्"। विहृत्यान्वाधानादि । "अद्य यज्ञाय" त्रैधातवीयं हविः ॥ आमावास्यं तन्त्रम् । अन्वाधाय व्रतप्रवेशः । सप्तदश सामिधेन्यः । वेदं कृत्वा वेदिः । द्वादशकपालानि स्फ्यश्च द्वन्द्वं शूर्पद्वयं एक एवोलूखलः मुसलश्च अन्वाहार्यस्थालीवर्ज्यानीतराणि सर्वाणि निर्वापकाले वेषाय वां इन्द्राविष्णुभ्यां जुष्टमिति व्रीहीन् अन्वोप्य यवानपि इन्द्राविष्णुभ्यामित्यन्वावापान्तः । पुनर्व्रीहीनिन्द्राविष्णुभ्यामिति अन्वोप्य इन्द्राविष्णुर्हव्यं रक्षेथामिति तन्त्रेणोपसादनादि ।

End—

ब्रह्माणि ब्रह्माणीस्थो ब्रह्मणे वो ममाहि स्विष्टहुतानि मह्यं शिवानि भवत । नपुंसकलिङ्गेनैवोहः हिरण्यशब्दस्य तत्वात् । ब्राह्मणा इत्यादि । धेनुमि । उत्तानस्त्वेति तात्पर्येन घृतं वस्त्रं० । रुद्रगां, यज्ञो ब० ।

Colophon: Nil

Subject: Traidhātavīyeṣṭi Prayoga.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 2596. This work has not been noticed by Dr. Burnell.

॥ आपस्तम्बनक्षत्रेष्टिप्रयोगः ॥

2697. ĀPASTAMBANAKṢATREṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3869. Page 25. Right column.

Substance—Paper. Size—11 × 4⅔ inches. Sheets—24.

Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—640. Complete (?).

Beginning :

श्रीगणाधिपतये नमः ॥

आपस्तम्बानुसारिनक्षत्रेष्टिप्रयोगः ॥

तत्र बौधायनः ॥

'सा या वैशाख्याः पूर्णमास्याः पुरस्तादमावास्या भवति । सा सकृत्संवत्सरस्यापभरणीभिः सम्पद्यते । तस्यामारभेतेति । अपि वा पूर्णमासीममावास्यां वोपवसेद्यस्यां तल्लक्ष्म सम्पद्यते' इति । अत्र पूर्णमासीग्रहणं आश्विन्यां कार्तिक्यां वा पूर्णमास्यां भरणीयोगे सति । तत्राप्यारम्भौचित्यप्रदर्शनार्थम् । अमावास्याग्रहणं चैत्र्याः पूर्णमास्याः पुरस्तादमावास्यायाः भरणीयोगे तत्रापि तदौचित्याश्रयम् । फाल्गुनादिमासत्रये यस्यां तिथावपभरणीयोगस्तस्यां वारम्भ इत्यपि प्रायश्चित्तप्रदीपे । अधिकं प्रयोगान्ते वक्ष्यामः ॥

End :

ए० अगन्माहोरात्रार्धमासमासर्तुसंवत्सरानाप्त्वा चन्द्रमसः सायुज्यꣳ सलोकते अहोरात्रार्धमासमासर्तुसंवत्सरानाप्त्वा चन्द्रमसः सायुज्यसलोकते अगन्म० । द्वा० अगन्माहोरात्रातिमुक्तिमहोरात्राभ्यां मढानाप्तिमहोरात्रातिमुक्तिमहोरात्राभ्यां मदनाप्तिमगन्म ।०त्र० अगन्म समानानाꣳसुभगत्वं प्रियत्वं समानानाꣳ सुभगत्वं प्रियत्वमगन्म । ०च० अगन्ममनुष्याणां नक्षत्रतुल्यतां मनुष्याणां नक्षत्रतुल्यतामगन्म० पं० अगन्मं समानानां प्रतिष्ठाꣳ समानानां प्रतिष्ठामगन्म०

ष० अगन्मास्यां प्रतिष्ठामस्यां प्रतिष्ठामगन्म । स० अगन्म यज्ञेऽन्ततः प्रतिष्ठां यज्ञेऽन्ततः प्रतिष्ठामगन्म अगन्मनक्षत्रसत्रं नक्षत्रसत्रमगन्मेत्यगन्म मन्त्रगतोहाः ॥
शुभानि सन्तु ॥

Colophon: Nil

Subject: Āpastambanakṣatreṣṭiprayoga giving the prayoga details of Nakṣatreṣṭi, according to the Āpastamba School of Black Yajurveda.

Remarks:—The Ms. is in good condition. On the title page is given श्रीशामजीनायक पुण्डयौपनाम्नाम् ' i.e. the Ms. originally belonged to Śāmāji Nāyaka (puṇḍaya).

॥ आपस्तम्बनक्षत्रेष्टिप्रयोगः ॥

2698. ĀPASTAMBANAKṢATREṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3870. Page 25. Right column. **Substance**—Paper. **Size**—$10\frac{1}{2} \times 4\frac{3}{8}$ inches. **Sheets**—18 (9—26). **Lines**—11 to a Page. **Script**—Devanāgarī. **No. of Granthas**—390. **Complete.**

Beginning :

नक्षत्रसत्र आपस्तम्बप्रयोगः ॥

अथातो नक्षत्रसत्रे देवताकालादि निर्णयः । अथात्र केचिदग्न्यादय एव देवताः न कृत्तिकादयः । केवलाग्ने अष्टाकपालेन वतात्वस्य केवलसौमस्य श्यामाचरौ केवलवि तु (?)द्वादशकपाले देवतात्वस्यान्यत्र दृष्टस्येहाप्यनुसरणौ चितत्वा 'अग्नेः कृत्तिकाः प्रजापते रोहिणी' इत्यादि

वाक्येऽग्न्यादीनां प्राधान्यप्रतीतेश्च "अग्निर्नः पातु कृत्तिकाः" इत्यत्र पात्विति याज्यायां "सुविते दधातु" इत्येकवचनाभ्यामग्निप्राधान्यप्रतीतेश्चाग्नेः कृत्तिकानाञ्च देवताप्रतिपादकस्वराणां पञ्चसङ्ख्याकत्वेनाग्नीषोमीयविकारत्वमस्य यागस्य स्यात् । ततश्चान्वादो भवतीत्यर्थवादसंवादमन्त्रादानुमन्त्रणे स्यात् । स्याच्च वृत्रहानुमन्त्रणं नक्षत्रुर्धाकरणान्ता आग्नेयधर्माः ॥

End:

ऐन्द्राग्नविकाराणां यः कनीयः यथादैवतं द्विवचनबहुवचनेनोहः नुदतां नुदेतां नुदन्तामिति । ममाग्ने पञ्चहोता । हविरुपसादने अग्न्यादिप्रथमदेवताभिप्रायेण रक्षस्व रक्षेथां रक्षध्वमित्यूहः 'उपांशु कामयः इष्टयः क्रियन्ते' इति वचनात् नक्षत्रहविषां उपांशुत्वमापस्तम्बमते । बोधायनस्य तु प्रजापतिः सवितेत्युपांशु । अन्या यथाप्रकृतीति पर्वणि आरम्भ इति ऋत्विग्द्रव्यसम्पादनपूर्वकं नियमेन स्थित्वा, प्रकृतिं कृत्वा, नक्षत्रसत्रेण यक्ष्य इत्युक्त्वा, उदवासाथमथित्वा कृत्तिका नक्षत्रेष्ट्या यक्ष्य इत्यादि

Colophon:

श्रीवेङ्कटेशाय गुरवे नमः ॥

कपर्द्यनुसारेण नक्षत्रेष्टय उक्ताः ॥

Subject: Āpastambanakṣatreṣṭi prayoga giving the prayoga details of the Nakṣatreṣṭi according to the Āpastamba school of the Black Yajur Veda.

Remarks:—The Ms. is in good condition. This Ms. gives a differ-

ent version of Nakṣatreṣṭi. This is based on the opinion of Kapardi Svāmin a great commentator of the Āpastamba Śrauta Sūtras. This Ms. is full of scriptorial blunders.

॥ नक्षत्रेष्ट्यादिहौत्रप्रयोगः ॥

2699. NAKṢATREṢṬYĀDIHAUTRAPRAYOGAḤ.

J. L. Collection No. 281. Substance—Paper. Size—8¼ × 3⅛ inches. Sheets—49. Lines —6 to a Page. Script—Devanāgarī. No. of Granthas—450. Author— ? Incomplete.

Beginning:

श्रीगणेशाय नमः ।

अथ नक्षत्रेष्टिहौत्रम् ।

